1, ४०

॥आधानबौधायनकृतप्रारंभः॥

LIBRARY BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

आधान
बौ.धा.
१

श्रीगणेशाय नमः। श्रीव्यंकटेशाय नमः॥ नमत विततविश्वं यद्विलासः किला
सद्बुद्धिणविधुसवाघ्रायहिभासावभांति। निगमविटपिबीजं व्यक्तमव्यक्त
माद्यं परममितवितानं तन्मदो भावगम्यं॥१॥ मयि वस्तु किमप्यस्तु तारणा
यत्रयीमयं॥ पन्नावोपि विनायासमासन्यत्रापवर्गिणः॥२॥ ति तीर्षतां त
रिविध्वांतदुर्वारवारिधिं॥ सत्कर्मसाक्षी भवतादनंतः सगुरुर्मयि॥३॥
यद्यपि पद्धतयोन्याः संति च धन्याः कृताः कृतिभिः॥ दीपशिखेव तदर्था एम
नएवीप्येषा तनोतु विस्पष्टान्॥४॥ मुनिसत्सूत्रसंसक्तभाष्योक्तिष्टथुमो १

क्तिकैः। प्रयोगरत्नभूषेषा ग्रथ्यते शिष्टतुष्टये॥५॥ नकुर्वते त्वक्रियतेत्तु किंचनारे
इति मंत्रलिंगात्सर्वकर्मणामारंभे गणपतिः पूज्यः॥ धर्मकर्मणि मांगल्ये सं
ग्रामेद्भुतदर्शने॥ संपूज्य गंधमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेदित्यादिना
यि पुण्याहवाचनं कार्यं। आभ्युदयिकं च नांदीश्राद्धापरपर्यायं गर्भाधानादि
षु गर्भसंस्कारेषु जातकर्मादिषु पुंसंस्कारेषु अग्न्याधानादिश्रौतकर्म
कूप सु वापीतडागाद्युद्यापनादिषु देवप्रतिष्ठायां वानप्रस्थाश्रमसंन्यासस्वी
कारे तुलापुरुषादिमहादानादौ नवगृहप्रवेशे महानाम्न्यादिवेदव्रतेषु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥२॥ राज्याभिषेके शांतिकपौष्टिकादौ सर्वत्रकार्यं।तत्रनिषेककालेसोमे
चसीमंतोन्नयनेतथा।ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवत्कृतमिति
वचनात्।कर्मांगसंज्ञं।तत्रदक्षक्रतूविश्वेदेवौ।अन्यत्रवृद्धौसत्यवसु
संज्ञावितिविशेषः।निषेकादौवृद्धिश्राद्धंकर्मांगश्राद्धंचानुष्ठेयमिति
थि प्रयोगरत्नमालायां।आभ्युदैकादौचमातरःपूज्याः॥ ॥अथप्रयोगः
कर्ताकृतमंगलस्नानःपवित्रपाणिःस्वलंकृतःप्राङ्मुखोदक्षिणतःप पम
त्न्यासहाचम्यप्राणानायम्यदक्षिणतउदङ्मुखान्प्रतिवचनसमर्था ॥२॥

न्तद्दिनेश्राद्धादावभुक्तवतोनिषिद्धपतियहवर्जितान्सोत्तरीयान्प
वित्रपाणीन्युग्मान्ब्राह्मणानुपवेश्य।सुमुखश्चैकदंत॰।यत्रयोगी
श्वरःकृष्णो॰।दुर्गायैनमः।क्षेत्रपालायनमः।वास्तुपुरुषायनमः॥ल
क्ष्मीनारायणाभ्यांनमः।उमामहेश्वराभ्यांनमः।शचीपुरंदराभ्यांनमः
मातापितृभ्यांनमः।इष्टदेवताभ्योनमः।कुलदेवताभ्यो॰।ग्रामदेव
ता॰।सर्वेभ्योब्राह्मणेभ्यो॰।तीक्ष्णदंष्ट्रमहाकाय॰।देशकालौसंकीर्त्य
अमुकफलकामःपरमेश्वरप्रीतिकामोवामुककर्मकरिष्यमाणस्तदं

२ गत्वेन पुण्याहवाचनमातृकापूजननांदीश्राद्धानि तंत्रेण करिष्ये॥ तत्
त्रादौ निर्विघ्नतासिध्यर्थं गणपतिपूजनं करिष्य इति संकल्पः। अक्षता
नादाय गणानां त्वा गृत्समदो गणाधिपतिर्ज्जगती गणपत्यावाहने वि नि
योगः। गणानां त्वा गणपतिं हवामहे०। ऋद्धिबुद्धिसहितं गणपतिमा
वाहयामीत्यावाहयेत्। षोडशोपचारैः संपूज्य प्रार्थयेत्। वक्रतुंड महा
काय० सर्वदेति०। ततः स्वपुरतः मंत्रावृत्त्या भूमिं स्पृशेत्। मही द्यौः पृथि एम
वी० भरीमभिरिति। तस्यां प्रस्थमात्राणां व्रीहीणां पुंजौ करोति। ॐषध २

यः संवदंते० पारयामसीति। तयोः सलक्षणौ द्वौ कलशौ निदधाति। आकु
३ लशे० वर्द्धतेति। तौ जलेन पूरयति। इमं मे गंगे० सुषोमयेति। तत्र गंधा
न्प्रक्षिपति। गंधद्वारां० श्रियमिति। चंदनादिनानुलिप्य पुष्पमा
लाभिर्भूषितौ कृत्वा तंडुलपूरिताभ्यां सरत्नाभ्यां सफलाभ्यां पात्रा
भ्यां तदाननेपिदधाति। पूर्णा दर्वि०। शतक्रतोऽइति। ततउत्तरकल
शे वरुणमावाहयेत्। तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप् वरुणा
वाहने विनियोगः। तत्वायामि ब्रह्मणा०। प्रमौषीरिति पठित्वा वरुण

मावाहयामीत्यादिषोडशोपचारैःसंपूज्यतत्रैवंदेवताआवाहयेत्॥
कलशस्य०।कारकाः।गंगेचयमुने०कुर्विति।ततःकलशेअक्षतान्नि
क्षिपेत्।मातृदेवोभव।पितृदेवोभव।आचार्यदेवोभव।अतिथिदे
वोभवेति।ततअवनिकृतजानुमंडलःकमळमुकुळसदृशमंजळिंशि
रस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वादीर्घाना
गानद्योगिरयस्त्रीणिविष्णुपदानिच।तेनायुःप्रमाणेनपुण्याहंदीर्घ एम
मायुरस्त्विति भवंतोब्रुवंतु।ब्राह्मणाःतेनायुःप्रमाणेनपुण्याहंदीर्घ ४

मायुरस्त्वित्यादिसर्वत्रप्रतिब्रूयुः।शिवाआपःसंत्वितिभवंतोब्रुवं
तु।सौमनस्यमस्त्वितिभवंतोब्रुवंतु।गंधाःपांतुसुमंगल्यंचास्त्विति
भवंतोब्रुवंतु।अक्षताःपांत्वायुष्यमस्त्वितिभवंतोब्रुवंतु।पुष्पा
णिपांतुसौश्रियमस्त्वितिभवंतोब्रुवंतु।तांबूलानिपांत्वैश्वर्यमस्त्वि
तिभवंतोब्रुवंतु।दक्षिणाःपांतु।बहुदेयंचास्तु।दीर्घमायुःशांतिः श्रेयः
स्तुष्टि पुष्टिश्चास्तु।यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशो
भनाःप्रवर्तंते।तमहमोंकारमादिंकृत्वाऋग्यजुःसामाशीर्वचनंब
श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु॥२

५ इऋषिमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्याहंवाचयिष्ये·वाच्यतां
इतिवदेयुः।एवमुत्तरत्र।यजमानः।भद्रंकर्णेभिः। द्रविणोदाद्रविण
सः० २।सवितापश्चातात्·३।नवोनवोभवति·४।उच्चादिवि·५।
आपउंदंतुजीवसेदीर्घायुत्वायुवर्चसे·।यस्त्वाहृदा·यस्मैत्वं·संत्वा
सिंचामियजुषाप्रजामायुर्धनंच।व्रतनियमतपःस्वाध्यायक्रतुदमदा
नविशिष्टानांब्राह्मणानांमनःसमाधीयतां।विप्राःसमाहितमनसःस्मः रम
।प्रसीदंतुभवंतः।प्रसन्नाःस्मः।शांतिरस्तु।पुष्टि॰।तुष्टि॰।वृद्धि॰।अविघ्नम ५

स्तु।आयुष्यमस्तु।आरोग्यमस्तु।शिवंकर्मास्तु।कर्मसमृद्धि॰वेदस
मृद्धि॰।शास्त्रसमृद्धि॰।उत्रसमृ॰।धनधान्यसमृद्धि।इष्टसंपदस्तु॰।
अरिष्टनिरसनमस्तु।यत्पापंतत्प्रतिहतमस्तु।यच्छ्रेयस्तदस्तु।उत्त
रह रेकर्मण्यविघ्न·।उत्तरोत्तरमहरहरभिवृद्धिरस्तु।उत्तरोत्तराःक्रियाःशु
र भाःशोभनाःसंपद्यंतां।तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु।तिथि
र करणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां।तिथिकरणेमुहू र
र्त्तेनक्षत्रेसग्रहेसदैवतेप्रीयेतां।अग्निपुरोगाविश्वेदेवाःप्रीयं
दुर्गापांचाल्योप्रीयेतां।१

तां। इंद्रपुरोगा मरुद्गणाः प्रीयंतां। ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां। माहेश्व
रीपुरोगा उमामातरः प्रीयंतां। वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां। अरुं
धतीपुरोगा एकपत्न्यः प्रीयंतां। ऋषयश्छंदांस्याचार्या वेदा यज्ञाश्च प्री
यंतां। ब्रह्म च ब्राह्मणाश्च प्रीयंतां। श्रीसरस्वत्यौ प्रीयेतां। श्रद्धामे
धे प्रीयेतां। भगवती कात्यायनी प्रीयतां। भगवती माहेश्वरी प्रीयतां॥
भगवती पुष्टिकरी प्रीयतां। भगवती तुष्टिः। भगवती ऋद्धिः। भगवती वृ
द्धिः। भगवंतौ विघ्नविनायकौ प्रीयेतां। भगवान्स्वामी महासेनः सपत्नी

कः ससुतः सपार्षदः सर्वस्थानगतः प्रीयतां। हरिहरहिरण्यगर्भाः प्रीयंतां।
सर्वा ग्रामदेवताः प्रीयंतां। सर्वाः कुलदेवताः प्रीयंतां। हताः ब्रह्मद्विषः।
हताः परिपंथिनः। हता अस्य कर्मणो विघ्नकर्तारः शत्रवः पराभवं यांतु।
शाम्यंतु घोराणि। शाम्यंतु पापानि। शाम्यंत्वीतयः। शुभानि वर्द्धंतां। शिवा
आपः संतु। शिवा ऋतवः संतु। शिवा अग्नयः संतु। शिवा आहुतयः संतु॥
शिवा ओषधयः संतु। शिवा वनस्पतयः संतु। शिवा अतिथयः संतु। अहो
रात्रे शिवे स्यातां। निकामे निकामे नः पर्जन्यो वर्षतु। फलि न्यो न ओषध

७ यःपच्यंतां।योगक्षेमोनःकल्पतां।शुक्रांगारकबुधबृहस्पतिशनैश्च
रराहुकेतुसोमसहिताआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां।भगवान्ना
रायणःप्रीयतां।भगवान्पर्ज्जन्यःप्रीयतां।भगवान्स्वामीमहासेनः
पुण्याहकालान्वाचयिष्येवाच्यतां।गृह्णातेवं·पुण्यमावेदयाज्य
यायजंति·संस्कुरुते।यत्पुण्यंनक्षत्रं।तद्वत्कुर्वीतोपव्युषं।यदावैसू
र्यउदेति।अथनक्षत्रंनैति।यावंतितत्रसूर्योगच्छेत्।यत्रेजयन्योपश्ये राम
त्।तावत्कुर्वीतयत्कारीस्यात्।पुण्याहएवकुरुते।तानिवाएतानि ७
ति

यमनक्षत्राणि।यान्येवदेवनक्षत्राणि।तेषुकुर्वीतयत्कारीस्यात्॥
पुण्याहएवकुरुते।मत्स्वंसहकुटुंबिनेमहाजनान्नमस्कुर्वाणाय
आशीर्वचनमपेक्षमाणाय।अमुककर्मणःपुण्याहंभवंतोब्रुवं
तु।विप्राःओंपुण्याहं।इतित्रिः।स्वस्तयेवायुमुपब्रवामहै।भवंतु
ये नः।आदित्यउदयनीयःपथ्यैवेतःस्वस्त्याप्रयंतिपथ्यांस्वस्तिमभ्युद्यं
तिस्वस्त्येवेतःप्रयंतिस्वस्त्युद्यंतिस्वस्त्युद्यंति॥स्वस्तिनइंद्रो०।दधातु
त्रिष्टोदेवावसवःसोम्यासः।स्वस्ति।मत्स्वंसह·अमुककर्मणेस्वस्तिभवं

तोब्रुवंतु।अमुककर्मणेस्वस्तिइतित्रिः।ऋध्यामस्तोमं॰कामंमृज्ञाः।स
र्वामृद्धि॰यएवंवेद।ऋध्यास्महव्यैर्नमः॰सर्वाराः।त्रीणि त्रीणिवै॰ ति
र्मे ष्ठति।मस्यं।अमुककर्मणऋद्धिंभवंतोब्रुवंतु।ॐऋध्यतां।इतित्रिः॥
श्रियेजात॰मित्तड्रो।श्रियएवैनं॰वेद।यस्मिन्नस्त्रा॰णीयमानं।अहे
बुश्रियु॰सतां।मस्यं॰।अमुककर्मणःश्रीरस्त्विति भवंतोब्रुवंतु।ओं
अस्तुश्रीः।एवंत्रिः।वर्षशतंपूर्णमस्तु।गोत्राभिवृद्धिरस्तु।प्रधान राम
देवतानामसंकीर्त्यप्रीयतामिति।शुक्रेभिरंगै॰रजूनाः।तदप्येषश्लो ८

क॰सदइति।कर्त्तोत्तरकलशंदक्षिणेदक्षिणमुत्तरेकरेगृहीत्वाश्र
द्धपात्रेसंततंधाराद्वयंनिषिंचेत्।वास्तोष्पतेप्रतिजानी॰एधिनः॥
शिवं३ ततःपत्नीकर्त्तुरुदगुपविशेत्।उदङ्मुखास्तिष्ठंतोविप्राः।
पात्रपतितजलेनदूर्वादिभिःप्रत्यृचंपत्नीयजमानावभिषिंचेयुः।
समुद्रज्येष्ठाः॰४।आपोहिष्ठा॰४।त्रायंतामिह॰असन्।आपइद्वाउ॰
भेषजं।हस्ताभ्यां॰शामसि।इमाआपः॰तोमृताः।याभिरिंद्र॰भवेह
।मुहांतंत्वा॰नाधाय।भूर्भुवःस्वः अमृताभिषेकोस्तु॥ ॥इतिपु

९ ण्याहवाचनप्रयोगः॥ ॥अथाक्षतपुंजेषु॥ ॥गौरीपद्माशचीमे
धासावित्रीविजयाजया।देवसेनास्वधास्वाहामातरोलोकमातरः
।धृतिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवताः।ब्राह्मीमाहेश्वरीचैव
कौमारीवैष्णवीतथा।वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः॥
इत्यावाह्य॥चतुर्थ्यंतनाममंत्रेणषोडशोपचारैःसंपूज्य।गौरीर्मिमा॰
व्योमन्।इतिपुष्पांजलिंदत्वा।यवाक्षतानादाय॥सत्यवसुसंज्ञ राम
काविश्वेदेवाःनांदीमुखाःभूर्भुवःस्वःइदंवःपाद्यमियंचवृद्धिः।मातृ ९

पितामहि प्रपितामह्यःनांदीमुखाःभूर्भुवःस्वःइदंवःपितृपिताम
हप्रपितामहाःनांदीमुखाःभू॰मातामहप्रमातामहवृद्धप्रमा
तामहाःपत्नीसहिताःनांदीमुखाःभूर्भुवःस्वः॰सत्यवसु॰मुखाः
भूर्भुवःस्वःइदंवःआसनगंधाद्युपचारकल्पनं स्वाहानममेयंच
वृद्धिः॥एवंमात्रादीनांदद्यात्॥पुनःसत्यवसुसंज्ञकाइत्यादियु
ग्मब्राह्मणभोजनपर्याप्तान्नंयथाशक्तिसोपस्करंद्विगुणमामंवा
अष्टगुणंहिरण्यंवास्वाहानममेयंचवृद्धिरित्यादिदत्वागौर्यादि

वै॰आ॰ षोडशमातरःब्राह्म्यादिसप्तमातरोवइत्यनुकीर्त्योन्नादिदद्यात्। श्रा॰प्र॰
१० ततउपास्मै॰वृत्तामधुंकृतस्यनांदीश्राद्धस्यसंपूर्णतासिद्धयेद्रा
क्षामलतत्प्रतिनिधित्वेनद्रव्यंवादक्षिणात्वेनसंप्रददेनममेति
दत्वा।प्रजापते॰रयीणां।इतिमंत्रंजपित्वा॥अनेननांदीश्राद्धेननां
दीमुखाःपितरःप्रीयंतांवृद्धिरित्युक्त्वा॥मातापितामहीचैवतथैव
प्रपितामही।पितापितामहश्चैवतथैवप्रपितामहः।मातामहस्त एम
त्पिताचप्रमातामहकादयः॥एतेभवंतुसुप्रीताःप्रयच्छंतुचमंगलं॥ १०

मितिपठेत्।ततःकिंचिद्द्रव्यंइच्छामग्ने॰त्वमस्मेइतिमंत्रेणपात्रेण
संघट्टयन्नाह्वयेत्॥ततःअभ्यार॰विसर्जने॥इतिमातृकाविस
र्जयेत्॥जीवन्मातृकस्यमातृपार्वणलोपः।एवंजीवन्मातामह
स्यापि।जीवत्पितृकस्तुयेभ्यएवपितादद्यात्तेभ्योदद्यात्।नतु
जीवत्पितृकःस्वमातरिमृतायांमातामहेचमृतेसतिपितुर्माता
महादिभ्योदद्यात्।जीवत्पितामातृमातामहयोःकुर्यात्।तस्यां
जीवंत्यांमातामहस्यैवेतिगृह्यपरिशिष्टोक्तेः।वृद्धौतीर्थेचसन्न्य

स्तेतातेचपतितेमति।येभ्यएवपितादद्यात्तेभ्योदद्यात्सुतःस्वय
मितिवचस्तस्मार्तिकविषयमित्येके।शाखांतरविषयमित्यन्ये॥
कर्मांगश्राद्धेतुक्रतुदक्षसंज्ञकौविश्वेदेवौइतिविशेषः।इष्टिश्राद्धे
क्रतुदक्षाविितिवचनादित्यन्यत्रविस्तरः॥ ॥इतिमातृकापूजन
नांदीश्राद्धप्रयोगः॥अथाधिकारविचारः॥पितरिज्येष्ठसोदरेच॥
आहिताग्नौकृतदारस्यदशमेहनिआधानाधिकारः॥जायामेवा राम
प्यदशमेहन्यादधीतेतिश्रुतेः।जातपुत्रःकृष्णकेशोग्नीनादधीतेत्य ११

त्रतुनजातपुत्रत्वकृष्णकेशत्वविवक्षा।वसंतादिवाक्योत्पन्नाधा
नानुवादेनजातपुत्रत्वकृष्णकेशत्वोभयविधानेवाक्यभेदादर्ध
मंतर्वेदिमिनोहाईंबहिर्वेदीत्यत्रदेशविशेषइवावस्थाविशेष
स्यलक्षणीयत्वात्।तामाशिषमाशास्ते तंतवेज्योतिष्मतीमितिब्रू
यात्।तस्यपुत्रोजातःस्यात्।इंद्राग्नीवाएतस्यप्रजामुपगृह्णतोयो
लंप्रजायैसन्प्रजानविंदेतऐंद्राग्नमेकादशकपालंनिर्वपेत्।इ
त्यादिनाजातपुत्रस्याप्यधिकारदर्शनात्।तेनात्रदीक्षाऽप्यपेक्ष

ण विष्णुक्रमोत्सर्पणादिसमर्थ इत्यर्थः संपद्यते। पित्रादेरनाहिताग्निता
यां तु त्रिकांडमंडनः। दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं। अग्नि
होत्रं विवाहं च प्रयोगे प्रथमे स्थितं। न कुर्याज्जनके ज्येष्ठे सोदरे वाप्य
कुर्वति। क्षेत्रजादावनीजाने विद्यमानेपि सोदरे। नाधिकारविघातो
स्ति भिन्नोदर्येपि चौरसे। पंग्वंधमूकबधिरपतितोन्माददूषणे। सन्यस्ते
छिन्नहस्तादौ यद्वा षंढादिदूषणे। जनके सोदरे ज्येष्ठे कुर्यादेवोत्तरः
क्रियां। तयोस्त्वनधिकारित्वान्नैतस्याधिक्रियाक्षतिः। ज्येष्ठे श्रद्धावि एम
२२

हीने सत्याधेयं तदनुज्ञया। पितुः सत्यप्यनुज्ञाने नादधीत कदाच
न। पितर्यनाहिताग्नावप्यादधीताथवा सुतः। अग्निहोत्रं च जुहु
यादिति लौगाक्षिकारिका। पिता यस्याग्रजो भ्राता नानकुर्याद्वा पिता
महः। तपोग्निहोत्रं यज्ञं वा सर्वा कुर्यात्कठाज्ञया त्। योगरुत्वाभि
उक्ते वा कुब्जे वा वामने जडे। गद्गदे वाग्रजे दुष्टे न परिविंदन्न चानु
जः। देशांतरस्थो न ज्येष्ठो न्यायेताहित्तवानिति। कनीयानधिकारी
चेदादधीताविचारयन्। प्रोषितस्तु यदा ज्येष्ठो न न्यायेताहितानलः।

बौ·आ· षड्वत्सरान्प्रतीक्षेततथादधीतानुजस्तदेति।ज्येष्ठभ्रात्रेचपित्राप्य
१३ नुज्ञातस्यपुत्रस्याग्न्याधानप्राप्तौचतुर्विंशंमते॥अनुज्ञातोपिसन् ति
पित्रानादध्यादिति।यत्तुसुमंतुनोक्तं।पितुर्यस्यतुनाधानंकथंपुत्रस्त
कारयेत्।अग्निहोत्राधिकारोस्तितां।स्वस्यवचनंयथेत्यादितत्पितुर्वै
धुर्यादिनाप्रतिबंधेद्रष्टव्यं।तस्मात्पितरिदेशांतरस्थेवाजडत्वादिदो
षयुक्तवतिपुत्रस्यतदाज्ञयाधिकारः।वैधुर्येप्यात्यंतिकानिच्छायां एम
भवति।सन्यस्तेतुभवत्येवाधिकारइतिदिक्।किंच।स्वाध्यायविधिसं १३

सिद्धकृत्स्नवेदार्थवेदनः।यद्वाध्ययनसंसिद्धानुष्ठेयमखमात्रवित्
यद्वाध्ययनसंसिद्धविज्ञानरहितोपिसन्।नातीवाधिक्रियाशून्य
इतित्रिकांडमंडनः।कर्मणांत्रय्यधीनत्वादाध्वर्यवस्यचयजुर्वेद
विहितत्वात्तस्यचबहुशाखत्वेबह्वृचानांकुत्राधिकारइतिसंदे
हेत्रिकांडमंडनः।श्रौतंस्मार्तंतुयत्कर्मस्वशाखायांनविद्यते।बोधा
यनोदितंग्राह्यंबह्वृचादिभिरादरात्।एतस्यासंभवेग्राह्यमन्यस्मा
द्यजुषोपिवेति।शौनकः॥यजुषोबहुशाखत्वात्संदेहेसमुपस्थिते।

२५ कांक्षास्वामवलंबेरंस्तादृशी बह्वृचा इति।आध्वर्यवं याजमानं याज्यं
बौधायनीयकं।अन्यथा पित्ततो ज्ञेय इति बौधायनाम्नाय इति॥य
त्रपार्श्वे त्विममेव पवित्वा।यस्यापस्तंबशाखीयो भवेन्मातामहो य
दि।तस्य बौधायनाभावे तत्सूत्राधानमिष्यते।अन्यथा सूत्रदंडः
नं स्यादित्युक्तं।तत्र अर्द्धाधानं सर्वाधानं वा कार्यं।तत्स्वरूपमाह लौगा
क्षिः॥अर्द्धाधानं स्मृतं श्रौतस्मार्त्ताग्न्योः पृथक्कृतिः।सर्वाधानं राम
तयोरैक्यकृतिः पूर्वयुगाश्रयेति।पूर्वयुगाश्रया अनादिः।अयं विक २५

ल्पः सर्वयुगसाधारण इत्यर्थः।यत्तु चत्वार्यब्दसहस्राणि चत्वार्यब्द
शतानि च।कलेर्यदागमिष्यंति तदा त्रेतापरिग्रहः।संन्यासश्च न क
र्तव्यो ब्राह्मणेन विजानतेति व्यासवचनं।तत्त्रिदंडसंन्यासनिषेध
परं॥विधुराधाननिषेधपरं च।तन्निषेधकवाक्यांतरैरेकश्रुतिकल्प
नालाघवात्॥अग्निहोत्रं गवालंभं संन्यासं पलपैतृकं।देवरात्सुतो त्व
त्पत्तिः कलौ पंच विवर्जयेदित्यनेन निषिद्धेषु पंचसु यावद्वेदाः प्रवर्त्तं
त इति द्वयोः प्रतिप्रसवार्थं।अन्यथा वाक्यवैयर्थ्यात्॥इत्येके॥यत्तु

केचित्। चत्वार्यब्दसहस्राणीति व्यासवचनमुदाहृत्य तत्र त्रेता
शब्देनाग्नित्रयं व्याख्याय तस्यापि सर्वाधानपरत्वं वर्णयंति साधक
त्वेन लौगाक्षिवचनं चोदाहरंति। तच्चिंत्यं। त्रेताशब्देनाग्नित्रयं व
दद्भिः सभ्यावसथ्याभ्यां सहितस्याग्निपंचकस्य तौ विनाग्नित्रयस्य
वा विकल्पानुष्ठानप्रसक्तौ कलावुक्तकालानंतरं अग्निपंचकरक्ष
णं पूर्वं त्वग्नित्रयरक्षणमिति व्यवस्थायास्त्वेवमुचितत्वात्। स्मार्ता राम
ग्नितः श्रौतत्वसाधारण्येन सभ्यावसथ्ययोर्झटित्युपस्थितिः। किंच।

तेषां कलावुक्तकालानंतरं पंचाग्निरक्षणमनुतिष्ठतः सर्वाधानेपि त्रे
ताभावान्न दोष इत्यापद्यते। वस्तुतस्तु अग्नित्रयमिदं त्रेतिकोशोक्ते ते
र्वाधानेपि त्रेतापरिग्रहस्य प्रसिद्धत्वान्नाभिमतसिद्धिः। यत्तु लौगाक्षि
वचनं तत्र कर्मद्वयस्तुत्यर्थमंते पठितस्य विशेषणस्य परिसंख्याश्र
यणेन कलौ तदुत्तरार्द्धं वा निषेधपरताया अनुचितत्वात्। पूर्वं चत
द्युगं चेति कर्मधारयस्य पूर्वनिपातात् बलीयस्त्वेन चतुर्षु प्रसिद्धस्य यु
गशब्दस्य कलिमात्रपरताया अनौचित्याच्च। एतेनाग्निहोत्रं गवालं

भमितिवचसाकलौनिषिद्धयोरग्निहोत्रसंन्यासयोःसर्वाधानप्रति
प्रसवार्थयावद्वर्णविभागोस्तीतिदेवलवचनमित्यपिपरास्तं।वे
दप्रवृत्तिवर्णविभागाभावेनुष्ठानाधिकारासंभवात्न्यायप्राप्तानु
वादमात्रत्वेनवचोवैयर्थ्यापातात्।व्यासवचनेननिवारितयो
स्तयोर्वर्णविभागादिसत्वेदेवलवचसःप्रतिसवार्थत्वंवक्तुंयु
क्तं।कालस्यमुख्यगौणत्वेनविरोधपरिहारात्।तस्मात्सकलदेशस्थ एम
शिष्टाचारविरुद्धमुक्तकालोत्तरंसर्वाधानंसंन्यासंचनिषिद्धंवदंतः। १६

किंबलादितिनविद्मइत्यन्ये।इत्यधिकारिनिरूपणं।सत्यधिकारे
नाहिताग्निःकालांतरआदिधित्सुःप्रायश्चित्तपूर्वकमादध्यात्॥
अथप्रायश्चित्तविधिः।जन्मप्रभृतिज्ञाताज्ञातसंभावितविवि
धपातकोपहतदेहशुध्यैबुद्धिपूर्वमबुद्धिपूर्वंवागृहस्याग्निविच्छे
दजनितप्रत्यवायपरिहारायसत्यधिकारेनाहिताग्निजनितप्रत्य ता
वायपरिहारायप्रायश्चित्तंचिकीर्षुर्गणपतिंसंपूज्यत्रीनेकंवाध्या
त्मविन्मंब्राह्मणंपर्षत्वेनोपवेश्यपत्न्यासहकृतस्नानःक्लिन्नवा

८ साश्रभुंजानोमनसाहूयमानः पर्षदंप्रदक्षिणीकृत्यसाष्टांगंप्रण
मेत्। ततस्तैः। किंतेकार्यंकिमर्थंवासदा मृगयसेद्विजान्। पर्षदि
ब्रूहितत्सर्वंयत्कार्यंहितमात्मनः। सत्येनद्योततेराजासत्येनद्यो
ततेरविः। सत्येनद्योततेवह्निः सर्वंसत्येप्रतिष्ठितं। भूर्भुवः स्वस्त्रयो
लोकास्तेपिसत्येप्रतिष्ठिताः। अस्माकंचैवसर्वेषांसत्यमेवपरंब
लं। यदिचेद्रक्ष्यसेसत्यंनियतंप्राप्स्यसेशुभं॥ यद्यागतोसिसत्येन एम
नत्वंशुध्यसिकेनचित्। सत्येनतुविशुध्यंतिशुद्धिकामाश्चमानवाः ८

तस्मात्त्वहृदयत्सत्यमादिमध्यावसानकं। एवंतैःसमनुज्ञातःसर्वंब्रू
यादशेषतः। पर्षदग्रेगोवृषयोःप्रत्येकंप्रत्याम्नायत्वेनयथाशक्ति
द्रव्यंनिधायामुकस्यमेजन्मप्रभृतिअद्ययावत्ज्ञाताज्ञातका
माकामसकृदसकृत्कायिकवाचिकमानसीकसांसर्गिकस्पृष्टास्पृ
ष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघु
पातकसंकलीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरण
प्रकीर्णपातकानांनिरासार्थंबुद्धिपूर्वमबुद्धिपूर्वंवागृह्याग्निविच्छेद

१८ जनितप्रत्यवायपरिहारार्थं सत्यधिकारे नाहिताग्निनाजनितप्रत्य
वायपरिहारार्थं चानुग्रहं कृत्वा प्रायश्चित्तमुपदिष्टं तु भवंतः। सर्वे
धर्मविवेक्तारो गोप्तारः सकला द्विजाः। मम देहस्य संशुद्धिं कुर्वंतु द्वि
जसत्तमाः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं। प्रसादः क्रिय
तां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतः पवित्रोऽहं भवेयं द्विजसत्तमै
रिति संप्रार्थ्य मामनुगृह्णंतु भवंत इति प्रणमेत्॥ ततस्ते तमुत्सार्य त
स्य शारीरद्रव्यादिशक्तिमुत्तममध्यमादिपक्षांश्च विचार्यास्मिन्पक्षे यं शा १८

क इति निश्चित्यानुवादकस्याग्रे पुस्तकवाचनपूर्वकं कथयेयुः। प्रत्या
म्नायांश्च शक्त्या कल्पयेयुः। तत्र ज्ञाताज्ञातदोषे षडब्दं त्र्यब्दं सार्द्धाब्द
मित्यादि। गृह्याग्निविच्छेदे बुद्धिपूर्वके द्वादशाहपर्यंतं यथाशक्ति सु
वर्णदानं। मासद्वयपर्यंतं विच्छेदे कृच्छ्रं मासचतुष्टयपर्यंतं विच्छेदे
अतिकृच्छ्रं। षण्मासपर्यंतं पराकः। अब्दपर्यंतं मासं पयोव्रतं। अब्द
पूर्तौ त्रैमासिकं। ततः प्रत्यब्दं त्रैमासिकावृत्तिरिति। अबुद्धिपूर्वके तु
त्रिरात्रं प्राणायामशतं॥ विंशतिरात्रमेकदिनोपवासः। मासद्वये त्रिरा

१९ त्रोपवासः। अब्दे प्राजापत्यकृच्छ्रः। अनाहिताग्नितायां अब्दादर्वाक् प्र
तिमासं त्रिरात्रं। ततः प्रत्यब्दमासं पयोव्रतमशक्तस्य। शक्तस्य तु चान्द्रा
ण यणमित्यभियुक्ताः। अनाहिताग्नितायाउपपातकत्वेन निर्देशं चक्रतुर्विष्णुया
ज्ञवल्क्यौ॥ प्रायश्चित्तं च। उपपातकिनस्त्वेते कुर्युश्चान्द्रायणं नराः प
राकमथवा कुर्युरिति॥ उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा। पय
सा वापि मासेन पराकेणाथवा पुनरिति। अत्र माधवः। एकैकस्य शक्तं एम
प्रति पराकः। अशक्तं प्रति चान्द्रायणं। इत्याद्यकामकारे शक्त्यपेक्षया द्र १९

ष्टव्यं। कामकारे तु मनूक्तं त्रैमासिकमिति। आहिताग्नेरग्नित्यागे तु। का
मकारे मनुः। अग्निहोत्र्यपविध्याग्नीन्मासादूर्ध्वं तु कामतः। कृच्छ्रं चान्द्रा
यणं चैव कुर्यादेवाविचारयन् इति। हारीतः। संवत्सरोत्सन्नमग्निहोत्रं
कृत्वा पुनरादध्यात्। द्विवर्षोत्सन्ने सोमायनं चान्द्रायणं। त्रिवर्षोत्सन्ने सं
ति वत्सरं कृच्छ्रमभ्यस्य पुनरादध्यादिशंखः। अप्युत्सादे संवत्सरं प्राजाप
तू त्यं चरेद्गां च दद्या दिति॥ भारद्वाजः॥ द्वादशातिक्रमे त्र्यहमुपवासः॥
मासातिक्रमे द्वादशाहं॥ संवत्सरातिक्रमे मासोपवासः। पयोभक्षणं चे

२० ति।अकामकारेतु॥भारद्वाजगृह्ये॥प्राणायामशतमादशरात्रं॥उप
वासः स्यादाविंशतिरात्रं॥त्रिरात्रमुपवसेदाषष्टिरात्रं।अतऊर्ध्वमा
सं।संवत्सरात्प्राजापत्यं।ऊर्ध्वंकालबहुत्वेदोषबहुत्वमिति।नास्ति
क्यात्यागेतुव्याघ्रः।योग्निंत्यजतिनास्तिक्यात्प्राजापत्यंचरेद्द्विजः॥
अन्यत्रपुनराधानेदानमेवतथैवचेति॥प्राजापत्योपलक्षणत्वात्।
त्यागकालस्यगौरवेणव्रतांतराण्यपूह्यानिइतिमाधवः।अतीतका एम
लंजुहुयादग्नौविप्रायवायवौ।नष्टेग्नौविधिवद्दत्वाकृत्वाधानंपुनर्द्वि २०
नू

जइतिजातूकर्ण्योक्तंऔपासनविषयं।प्राजापत्यःकृच्छ्रइतिपर्यायः।कृ
च्छ्रमितिप्राजापत्यमितिदेवलस्मरणात्।तत्स्वरूपमाहमनुः॥त्र्यहंप्रा
तस्त्र्यहंसायंत्र्यहमद्यादयाचितं।त्र्यहंपरंतुनाश्नीयात्प्राजापत्यंच
रन्द्विजइति॥अस्यैवाधिकारभेदेनप्रयोगांतरमाहवसिष्ठः।अहःप्रा
तं तरहर्नक्तमहरेकमयाचितं।अहःपराकंतत्रैवमेवंचतुरहौपरौ।अनु
ग्रहार्थंविप्राणांमनुर्धर्मभृतांवरः॥बालवृद्धातुराणांचशिशुकृच्छ्र
मुवाचहेति।एतदुभयमप्याहयाज्ञवल्क्यः॥एकभक्तेननक्तेनतथैवा

२१ याचितेनतु।उपवासेनचैवायंपादकृच्छ्रःप्रकीर्त्तितः।यथाकथंचित्त्रि
गुणःप्राजापत्योयमुच्यतइति॥अयंपादकृच्छ्रएवयथाकथंचित्त्रि
सुस्थानविवृध्यादंडकारित्तवदावृत्त्यावात्रिरभ्यस्तःप्राजापत्यइ
त्यर्थः॥एकभुक्तादिग्राससंख्यांपरिमाणंचाहापस्तंभः।सायंद्वाविंश
तिर्ग्रासाःप्रातःषड्विंशतिःस्मृताः।चतुर्विंशतिरयाच्याःपरेनिरशनास्त्र
यः।कुक्कुटांडप्रमाणंतुयथावास्यंविशेन्मुखमिति।चतुर्विंशतिमते रम
तु।प्रातःसुद्वादशग्रासाःसायंपंचदशैवतु।अयाचितौतुद्वावष्टौत्र्यहं २१

तुमारुताशनमिति।प्रकारांतरेणसंख्याश्रूयते।तत्रशक्तितारतम्येन
व्यवस्थाबोध्या॥आपस्तंबस्तु॥चतुरःपादकृच्छ्रान्कृत्वातेषांवर्णभे
देनव्यवस्थामाह॥त्र्यहंनिरशनंपादःपादश्चायाचितंत्र्यहं॥सायं
त्र्यहंतथापादःपादंप्रातस्तथात्र्यहं॥प्रातःपादंचरेच्छूद्रःसायंवैश्य
स्यदापयेत्॥अयाचितंतुराजन्येत्रिरात्रंब्राह्मणेस्मृतमिति॥सएवा
र्द्धकृच्छ्रपादोनकृच्छ्रयोरपिस्वरूपमाह॥सायंप्रातर्विनार्द्धंस्यात्पादो
नंनक्तवर्जितमिति।यत्तुसायंप्रातस्तथैवोक्तंदिनद्वयमयाचितं।दिन

२२ इयं तु नाश्नीयात् कृच्छ्रार्द्धं तद्विधीयत इति तच्छक्त्यपेक्षया द्रष्टव्यं। गौ
तमेनात्र जपहोमादिवर्ज्यं गजातमुक्तं मन्वादिभिस्तु न तत्र ब्राह्मणशू
द्रादिभेदेन व्यवस्था द्रष्टव्या। अत एवांगिराः॥ तस्माच्छूद्रं समासाद्य
सदा धर्मपथे स्थितं। प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति। अ
तिकृच्छ्रलक्षणं चतुर्विंशतिमते। एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पू
र्ववत्। त्र्यहं चोपवसेन्नित्यमतिकृच्छ्रं चरन् द्विज इति॥ यत्तु याज्ञवल्क्यः
अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनमिति। तदशक्तविषयं॥ पा २२

णिपूरान्नस्य ग्रासपरिमाणाधिक्यात्। पराकलक्षणमाह याज्ञवल्क्यः।
द्वादशाहं निराहारो यतात्मा संशितव्रतः। कृच्छ्रः पराकनामैष सर्वपा
पप्रणाशन इति। मासं पयोव्रते सार्द्धप्राजापत्यद्वयमिति मिताक्षरायां
चांद्रायणलक्षणमाहांगिराः॥ तिथिवृद्ध्याचरेत्पिंडान् शुक्ले शिख्यंडसं
मितान्। एकैकं ह्रासयेत्पिंडं कृष्णे चांद्रायणं चरन्निति। एतदेव शुक्लादि
कृष्णांतं यवमध्यं। कृष्णादि शुक्लांतं पिपीलिकामध्यमुच्यते॥ अत्र बौ
धायनः। चांद्रायणमारभमाणः चतुर्दश्यामुपोष्य केशादि वापयित्वा

२३ पर्वणि पंचदश ग्रासनियमं कुर्यादिति। अथैतदनुष्ठानाशक्तौ प्रत्याम्ना
याश्चतुर्विंशतिमते। कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयं। तिलहो
मसहस्रं च वेदपारायणं तथा। विप्रा द्वादश वा भोज्याः पावकेष्टिस्त
थैव च॥ अप्सु न्यापावमानेष्टिः समान्याहुर्मनीषिण इति॥ वेदः संहि
तामात्रं। अपरार्के तु॥ समिद्घृतहविर्धान्यं तिलान्वा मारुताशनः। हु
त्वा द्वादशसाहस्रं गायत्र्या कृच्छ्रमाप्नुयात्॥ द्वादशैव सहस्राणि ज राम
पेद्देवीमुपोषितः। जलांते विधिवन्मौनी प्राजापत्याय मुच्यते॥ अन्न २३

दानं हिरण्येन द्वादश ब्राह्मणान् शुचीन्। तर्पयेन्मारुताशी च श्रोत्रि
यान् कृच्छ्रमुच्यते। उपोष्य श्रद्धया युक्तास्तिलपात्राणि धर्मतः। द्वाद
शब्रह्मवादिभ्यः प्राजापत्येन तत्समं। स्वयमाहृत्य यो मूर्ध्ना चणभा
रमुपोषितः। दद्यादग्नौ मंडले कृच्छ्रे द्वादशैव न संशयः। प्राणायामशतं
कृत्वा द्वित्रिंशोत्तरमार्तिषु। अहोरात्रोषितस्तिष्ठन्प्राङ्मुखः कृच्छ्रमु
च्यते। नमस्कारसहस्राणि द्वादशैव दयाव्रतः॥ गोविप्रपितृदेवेषु
कुर्यात्कृच्छ्रत्रयं भवेदिति। तिलपात्रप्रमाणं कौर्मे॥ तिलपात्रं त्रिधा

प्रोक्तं कनिष्ठोत्तममध्यमं। ताम्रपात्रं दशपलं जघन्यं परिकीर्तितं। द्विगु
णं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतमिति। भारो द्विसहस्रपलमितः।
पाराशरः॥ कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयं। पुण्यतीर्थेनार्द्रशि
रःस्नानं द्वादशसंख्ययेति। स्मृत्यर्थसारे॥ सर्वत्र कृच्छ्रसंख्यायोजनसं
ख्ययास्यादिति। वसिष्ठः। गोमूत्रेण समायुक्तं यावकं चोपयोजयेत्॥ कृ
च्छ्रमेकाह्निकं प्रोक्तं दृष्टमंगिरसा स्वयमिति। निश्यासीनो दिवातिष्ठेन्त्रि राम
रात्रं मारुताशनः। प्राजापत्यं विजानीयात् कूश्मांडैर्जुहुयाद्घृतमिति च २४

माधवीये। प्राजापत्यं चरन् विप्रो यद्यशक्तः कथंचन। अर्हानि पंच वि
प्राग्र्यान् भोजयेत्सम्यगीप्सितान्। एकमध्यैनं कुर्यात् प्राजापत्यमथा य
पि वा। दद्याद्द्वादशसाहस्रं गवां पुष्टिं विचक्षण इति। अत्रापि शक्त्यादि
तारतम्येन व्यवस्था ज्ञेया। कृच्छ्रो देव्ययुतं चैव गदवासस्तथैव च। धे
नुप्रदानं विप्राय सममेतच्चतुष्टयं। धेनोरभावे दातव्यं मूल्यं तुल्यं न सं
शयः। ब्रह्मपुराणे गवामभावे निष्कश्चलोकशास्त्रयोरेकवाक्यतायां
माषाश्चत्वारिंशत् ४० तदर्धं २० तदर्धं १० वा मुख्यं तु सुवर्णं तदशक्तौ र

२५ जतं ग्राह्यं स्यात्तदर्धं पादमेव वा। निष्कः सुवर्णाश्चत्वार इति याज्ञव
ल्क्यः। एतत्परिमितं हेमरूप्यं चेति वृद्धाः। अत्राप्यशक्तौ पादार्द्धं। त
त्समं धान्यं चेति स्मृत्यर्थसारः। एवं विप्रभोजनं उपवासप्रत्याम्नायः
। नक्तस्य रूप्यमाषदानमिति शूलपाणिः। षड्त्रिंशन्मते। प्राजापत्ये तु
गामेकामति कृच्छ्रे द्वयं स्मृतमिति। चतुर्विंशतिमते॥ प्राजापत्ये तु गा
मेकां दद्यात्सांतपने द्वयं॥ ॥पाराके तप्तकृच्छ्रे तु तिस्रः स्तिस्र एता
स्मृताः। अष्टौ चांद्रायणे ज्ञेया स्तिस्रो वा शक्त्यपेक्षयेति। चांद्रायणं तु २५

कुर्वाणाः कुर्युः कृच्छ्रचतुष्टयं। चांद्रायणपराकाभ्यां निष्कृतिं यो न गच्छ
ति। स करोत्यात्मशुध्यर्थं प्राजापत्यस्य पंचकं। अत्रापि गुरुलघुकृच्छ्रा
दिभेदेन शक्ताशक्तभेदेन वा व्यवस्था द्रष्टव्या। माधवीये॥ यत्र या
वत्संख्यया प्राजापत्यान्यावर्तयितव्यानि भवंति॥ तत्र तावत्संख्य
या गोदानान्यावर्तनीयानि। उक्तं च चतुर्विंशतिमते॥ जन्मप्रभृति पा
पानि बहूनि विविधानि च॥ अर्वाक् तु भ्रूणहत्यायाः षडब्दं कृच्छ्र
माचरेत्॥ प्रत्याम्नाये गवां देया न्यशीतिर्धनिनाशतं। तथाष्टादशल

क्षाणि गायत्र्या वा जपेच्छुध्द इति। चांद्रायणादीनां प्रत्याम्नायः। चांद्रा
यणं मृगारेष्टिः पवित्रेष्टिस्तथैव च। मित्रविंदा पशुश्चैव कृच्छ्रं मासत्र
यं तथा। तिलहोमायुतं चैव पराकद्वयमेव च। गायत्र्या लक्षजप्यं च
समा न्याह बृहस्पतिरिति। तपस्यसमर्थस्य धान्यवतउक्तं तत्रैव॥ कृ
च्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये चत्वारिंशच्चतप्ते
गुणिता विंशतिः स्यात्पराके॥ कृच्छ्रे सांतपने स्ववे भवति षडधिका विं
शतिः सैव हीना द्वाभ्यां चांद्रायणे स्यान्न परिकृषबलो भोजयेद्विप्रमु

ख्यान्। अहरहरिति सर्वत्र संबध्यते। प्राजापत्ये द्वादश ब्राह्मणभोज
नविधानं तु अशक्तविषयं। धनिकस्य तु प्रत्यहं पंचेति द्वादशादिने
षु षष्टिविधानात्। प्राजापत्ये तु गामेकामित्यपि निर्धनविषयं। तृण
दानं चातिनिर्धनविषयं बोध्यं। तथाशक्तिमतस्तीर्थयात्रादि। तानि
माधवीये देवलः॥ अभिगम्य तु तीर्थानि त्युपक्रम्य। सर्वाः समुद्रगाः
पुण्याः सर्वे पुण्या नगोत्तमाः। सर्वमायतनं पुण्यं सर्वे पुण्या मनाश्रमाः
॥ अथ॥ गंगा। सरस्वती। यमुना। नर्मदा। विशापा। वितस्ता। कौशिकी

२७ नंदा।विरजा।चंद्रभागा।शरयू।रुक्षवती।सिंधुः।कृष्णवेणी।।शो
णा।तापी।परावती।पाषाणा।।गोमती।गंडकी।बाहुदा।पंपा।देवि
का।कावेरी।ताम्रपर्णी।चर्मण्वती।वेत्रवती।गोदा।तुंगभद्रा।सुच
क्षुरणाचेति।महानद्यः।।गंगाद्वारं।कनखलं।शक्रावतारं।सौकरं।प्र
यागोगंगासागरमितिगंगातीर्थानि।प्लाक्षं।प्रस्रवणं।वृद्धकन्यकं।सा
रस्वतं।आदित्यतीर्थं।बदरं।पाबालं।वैजयंतं।पृथूदकं।नैमिषं।वि एम
नशोलं।वसोद्भेदं।प्रभासमितिसारस्वतानि।कावेरीसंगमं।सरस्वतीसं २७

गमं।गंधमादनमितिसामुद्राणि।पुष्करं।पुष्वेकं।गयाशिरः।कुरु
क्षेत्रमितिपुण्यक्षेत्राणि।वाराणसी।महाभैरवदेवदारुवनं।।सौ
रं।प्राचीनवहः।केदारं।मध्यमं।महारौद्रं।महाकालयं।कुमारमहाल
यं।रुद्रावतारं।गलांडं।विष्णुशिवं।महाकालं।पुरुषोत्तमं।जंबुग्रामं
चैतान्यायतनानि।हिमवान्।उदयः।महेंद्रः।विविदरः।शतशृंगः।श्री
पर्वतः।देवपर्वतः।विंध्यः।पारियात्रश्चेतिपर्वताइति।एवंजातिगुणा
न्दृष्ट्वासकृद्बुद्धिकृतंलघु।अनुबंधादिकंदृष्ट्वाकल्पंसर्वंयथागमं।त

२८ तःसभ्याःप्रायश्चित्तिनमनुवादकेनाकारयेयुः।सोस्मिन्कालेगंधादि
भिर्निबंधपूजांसभ्यानुवादकपूजांकुर्यात्।निबंधपूजात्वेनयथा
शक्तिद्रव्यंविधायानुवादकायचभृतिरूपांदक्षिणांदत्वाश्चित्त
स्याग्रेसभ्योपदिष्टंविधिमनुवादकोवदेत्।अनेनयथावत्सभ्यो
पदिष्टेनामुकप्रत्याम्नायद्वाराप्राच्योदीच्यांगसहितेनाचीर्णेनामु
कप्रायश्चित्तेनतवजन्मप्रभृतिअद्ययावत्ज्ञाताज्ञातकामाकाम राम
सकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्ट २८

भुक्ताभुक्तपीतापीतसकलपातकोपपातकलघुपातकसंकलीक
रणमलिनीकरणापात्रीकरणजातिभ्रंश करप्रकीर्णकपातकानां
बुद्धिपूर्वमबुद्धिपूर्वंवागृह्याग्निविच्छेदजनितप्रत्यवायस्यसत्यधि
कारेनाहिताग्नित्वाजनितप्रत्यवायस्यचपरिहारोभविष्यतिनेतत्त्वं
कृतार्थोभविष्यसीतित्रिरुपदिशेत्।शृणुध्वमिदंविप्रायन्त्रआदि
शतेव्रतं।तत्तेयत्नेनकर्त्तव्यमन्यथाहृथाभवेदितिवदेत्।ततः
प्रायश्चित्ती निवेदितप्रायश्चित्तंभवदनुग्रहइत्यंगीकृत्यसन्मानपू

र्वकंप्रणम्यपर्षदंविसृजेत्।अस्मिन्नहनिशक्तस्तूपवसेदशक्तोह
विष्यमश्नीयात्।इदंचसर्वंदेवालयादौकुर्यात्।अनुवादकःसभ्या
श्चापिप्रायश्चित्तमुपदिश्यत्वात्मशुध्यर्थंप्रायश्चित्तानुसारेणस्वयम
पिप्रायश्चित्तंचरेयुः।तदाहहारीतः।प्रायश्चित्तंतुनिर्दिश्यकथंपापा
त्प्रमुच्यते।यत्पवित्रंविजानीयाज्जपेद्वावेदमातरमिति।पवित्रंकृ
च्छ्रादिचरित्वावेदमातरंजपेदितिमाधवः।अथप्रायश्चित्तीकस्यांचि राम
ड्रिक्तायांदिनांतेगंगादौदेशकालौसंकीर्त्यअमुकप्रत्यवायपरिहा २९

रार्थंपर्षदुपदिष्टंप्रायश्चित्तंपूर्वोत्तरांगसहितमाचरिष्यइतिसंकल्प्य।
यानिकानिचपापानिब्रह्महत्यासमानिच।केशानाश्रित्यतिष्ठंतित
स्मात्केशान्वपाम्यहं।आत्मनःशुद्धिकामोवापितॄणांतृप्तिहेतवे।वप
नंकारयिष्यामिदेवाग्निद्विजसन्निधाविति।शिखाकक्षोपस्थवर्जंश्म
श्रुखनदश्मश्रुखोवाश्मश्रुपूर्वकंशिखावर्जंशिरोवापयित्वानखानिसं
हृत्य।आयुर्बलंयशोवर्चःप्रजाःपशून्सुखानिच।ब्रह्मप्रज्ञांचमेधांच
त्वन्नोदेहिवनस्पतइतिविहितवृक्षीयद्वादशांगुलदंतकाष्ठेनदंतान्

आधाने संशोध्य जिह्वामुल्लिख्य स्नात्वा भस्मादिस्नानानि कुर्यात्। अग्निहोत्रा प्रायश्चि
२०
दिभस्म गृहीत्वा। कुंडाग्निहोत्रजं भस्म यथा पापविनाशनं। पावनं च
तथैवेदं भस्म पापात्पुनातु मामिति संप्रार्थ्य। ईशानाय नम इति शि
रसि। तत्पुरुषाय नम इति मुखे। अघोराय नम इति हृदये। वामदेवाय
नम इति गुह्ये। सद्योजाताय नम इति पादयोः। प्रणवेन सर्वांगे। ईशाना
दिपंचोपेतैर्मंत्रैर्वा गात्राणि शोधयेत्।। इति लिंगोक्तभस्मस्नानं।। यद्वा ज एम
लमिति भस्मेति मंत्रेण कुर्यात्।। अथ गोमयेन।। प्रातरुत्सृष्टं गोमयमं ३०

तरिक्षस्थं भूमिस्थं वोपर्यधश्चोत्सृज्य मध्यस्थं गृहीत्वा दक्षिणभागं
दिक्षु क्षिप्त्वोत्तरं तीर्थे प्रक्षिप्य मध्यमं मानस्तोक इत्यभिमंत्र्य गंधद्वा
रामित्यृचा मूर्द्धादि सर्वांगमालिप्य प्रांजलिर्हिरण्यशृंगेति द्वाभ्यां अ
वते हेळ इति द्वाभ्यां प्रसंम्राजमिति सूक्तेन तीर्थं प्रार्थ्य।। याः प्रवत इ
त्येतयाभिमृश्यावगाह्य द्विराचम्य मार्जयेदिति परिशिष्टोक्तगोमय
स्नानं। यद्वा।। अग्रमग्रं चरंतीनामिति मंत्रेण कुर्यात्। अथ मृदा।। अ
श्वक्रांते इति स्मृत्वा मंत्रेणामंत्र्य मृत्तिकां। उद्धरेदु हंसीति मंत्रेण सु
ता

३१ समाहितः।नमोमित्रस्येतिऋचादर्शयित्वाचभौवि॥अंहूरणेनेतिमं
त्रेणसमालभ्यहिराचमेदितिश्रेवोक्तंमृत्स्नानं।यद्वा।बलित्थापर्व
तानां॰महि नीति।भूमिंप्रार्थ्य।मावोरिषत्खनि॰तुरं॥इतिखनित्वा
।स्योनापृथिवि ॰प्रथः॥इतिमृदमादाय।आयनेते॰ग्रहाइमे॥इतिदू
र्वामादाय।गायत्र्यामृदमभ्युक्ष्य॥भूमौनिधायाचम्यदेशकालौस्मृ
त्वामृत्स्नानंकरिष्यइतिसंकल्प्यमृदंकुशोदकेनाभ्युक्षयेत्॥ततो
यथाक्रमंदिक्षुक्षिपेत्॥त्रातारमिंद्र॰न्द्रिंइः॥इतिपूर्वस्यां॥युमायुम ३१

तत्सूर्यरोदसी॰उपरिष्टात्अधःपश्यस्व॰अधः।२

धुमत्तमंराज्ञेहव्यंजुहोतन॥इदंनमऋषिभ्यःपूर्वजेभ्यःपूर्वेभ्यःप
थिकृद्भ्यः॥इतिदक्षिणस्यां॥तत्त्वायामि॰प्रमोषीरितिपश्चिमतः।वु
यंसोम॰।सचेमहि।इत्युत्तरतः।ततोंगेषु।सहस्रशीर्षेतिशिरसि।अ
क्षीभ्यांते॰हामिते।इतिमुखे।ग्रीवाभ्यस्त॰मिते॥इतिग्रीवायां।आंत्रेभ्य
स्तइतिहृदये।नाभ्यानाभिंनु॰माईहेइतिनाभौ।त्वमिंद्रसजोषस॰इति
बाह्वोः।सोमानंस्वरणं॰इतिकक्ष्योः।यःकुक्षिः सोमपातमः॰कुंदः॥
इतिकुक्ष्योः॥बह्वीनांपिता॰पस्तत॰इतिपृष्ठे॥ऊरुभ्यांतेअष्ठी॰मितेइ

३२ त्सुर्वोः। मेहनाद्दुर्तुंकरणाल्लो॰ इतिजान्वोः। एतत्‌वानस्येतिपादयोः। अं
गादंगाल्लोम्नो॰मिति॥ ऊरुषसूक्तेनसर्वांगे॥ अश्वक्रांतेरथक्रांतेवि
ष्णुक्रांतेवसुंधरा॥ शिरसाधारयिष्यामिरक्षस्वमांपदेपदे॥ भूमिर्धेनु
र्धरणीलोकधारिणी। उद्धृतासिवराहेणकृष्णेनशतबाहुना। मृत्तिके
हनमेपापंयन्मयादुष्कृतंकृतं। मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमं
त्रिता। मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं। मृत्तिकेप्रतिष्ठितेसर्वंत
न्मेनिर्णुदमृत्तिके। त्वयाहतेनपापेनगच्छामिपरमांगतिं। सतिलदूर्वाशि ३२

रसिनिधायतीर्थंप्रार्थयेत्। हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहिया
चितः। यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः। यन्मेमनसावाचा
कर्मणावादुष्कृतंकृतं। तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतु
पुनःपुनः। आपोअस्मान्मातर॰ एमि। गंगागंगेति। ततस्त्रिर्मज्जनंकृत्वा
। समुद्रज्येष्ठाः॰४॥ एतोन्विंद्रंस्त॰ सिपासत्सि। तरत्समंदीतिसूक्तेन।
पावमानीभिः। यःपावमानीरध्येत्यृ॰ सर्पिर्मधूदकं॥ आपोहिष्ठे
ति तृचेनमार्जनंकृत्वा। इमंमेगंगेइत्युदकमालोड्यऋतंचेति

आ॰धा॰
३३

तृचंजपन्अघमर्षणंकुर्यात्।ततःप्रवाहाभिमुखस्त्रिवारंमज्जेत्॥
इतिमृत्तिकास्नानं॥ततोवारिस्नानंब्रह्मांडे॥आपोअस्मानित्युक्त्वा
भास्कराभिमुखस्थितः॥इदंविष्णुर्जपित्वाचप्रतिस्रोतोनिमज्जती
ति।अथपंचगव्यस्नानंमात्स्योक्तं॥सावित्र्यागोमूत्रेण॥गंधद्वारामि
तिगोमयेन।आप्यायस्वेतिक्षीरेण॥दधिक्राव्णइतिदध्ना।तेजोसिशु
क्रमसि धामनामासि।प्रियंदेवानामनाधृष्टंदेवयजनमसि।इतिस
र्पिषा।देवस्यत्वा॰हस्ताभ्यामभिषिंचामि।इतिकुशोदकेन।स्त्रीणाम

राम
३३

मंत्रकाणि॥इतिदशविधस्नानानिविधायस्नानांगतर्पणंचकृत्वा
धौतेवाससीपरिधायद्विराचम्यविष्णुश्राद्धंचकुर्यात्।व्रतांगभूतंवि
ष्णुश्राद्धंकरिष्यइतिसंकल्प्य।त्रिभ्योधिकान्युग्मान्ब्राह्मणान्भो
जयेत्।द्विगुणान्यामानिवादद्यात्।इदमेवप्रायश्चित्तांगंविष्णुश्राद्ध
मुच्यते।ततोव्रतांगमादिगोदानंप्रत्यक्षंनिष्क्रयद्वारावाकरिष्यइति
संकल्प्य।गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश।यस्मात्तस्माच्छिवंमे
स्यादतःशांतिंप्रयच्छमे॥इतिमंत्रेणादिगोदानंकुर्यात्।अथाग्निस्था

श्राधा· प्राय·

३८ पनादिपूर्वकमाज्येनाष्टाविंशतिरष्टोत्तरशतंवाहुतीःपापापहामहावि
ष्णूद्देशेनव्याहृतिभिर्जुहुयात्।पापापहामहाविष्णवइदमितिसर्व
त्रत्यागः।अत्रेध्मसंभरणादिस्थालीपाकतंत्रंकार्यमित्येके।नेत्यपरे।
ततःपंचगव्यंकुर्यात्।सुवर्णादिपात्रेपलाशादिपात्रेवाताम्रायागोमूत्र
मष्टमाषप्रमाणंगायत्र्यादायश्वेतायाःषोडशमाषमितंशकृत्गंधद्वा
रामित्यादायपीतायाःक्षीरंद्वादशमाषपरिमितमाप्यायस्वसमेत्या एम
दायनीलायादधिदशमाषमितंदधिक्राव्णइत्यादाय।कृष्णायाघृत ३४

मष्टमाषमितंतेजोसिशुक्रमसीत्यादायदेवस्यत्वेतिकुशोदकंचतु
र्माषमितंचादायप्रणवेनालोड्यप्रणवेनैवयज्ञियकाष्ठेननिर्मथ्यप्र
णवेनाभिमंत्र्याछिन्नाग्रैःसप्तपत्रैर्हरितैःकुशैर्जुहुयात्।ॐइरावती
धेनुम०।मयूखैःस्वाहा॥पृथिव्याइदं॥इदंविष्णुर्विच०क्रमेस्वाहा।
विष्णवइदं।मानस्तोके०।हवामहेस्वा०।रुद्रायेदं।शान्नइंद्राग्नी०वा
जसातौस्वाहा।इंद्राग्निभ्यामिदं॥एतावत्यःस्मृत्यर्थसारमते।मरी
चिस्तु।अग्नयेस्वाहा।अग्नयइदं।सोमायस्वाहा०।इदंविष्णुः।मानं

आधा॰ ३५ स्तोके।गायत्र्या।प्रजापतेनत्वदेतान्यन्यइत्याहुतीराह।माधवीयेप्रजा
पतिः।अग्नयेचैवसोमायसावित्र्याप्रणवेनस्विष्टकृच्चेत्येताआह॥
इष्ट्वाक्ता।स्वप्रयोगेस्मृत्यर्थसारोक्ताहुत्वाब्रंसजज्ञानंअग्नयेस्वाहा
सोमायस्वाहा।गायत्र्यासूर्यायप्रणवेनप्रजापतयेस्वा॰।ॐभूर्भुवः
स्वःस्वाहा।अग्नयेस्विष्टकृतेस्वाहेतिदशाहुतिः॥अथव्रतग्रहणं॥
पंचगव्यप्राशनंव्रतमितिमहार्णवः॥प्रायश्चित्तसंकल्पोव्रतमिति एम
तुमाधवः॥व्रतग्रहणंकरिष्यइतिविप्रान्प्रार्थ्यतैःकुरुष्वेत्यनुज्ञातः ३५

प्रणवेनसर्वंहुत्वाशेषंपंचगव्यंपिबेत्।पंचगव्येपरिमाणंस्मृत्यंतरे॥
गोमूत्रंत्रिपलंग्राह्यंअंगुष्ठार्द्धंचगोमयं।पयःसप्तपलंग्राह्यंदधिस
प्तपलंतथा।घृतमेकपलंग्राह्यंपंचगव्यविधिःस्मृतइति।उदङ्मुख
स्त्रिराचम्यगृह्णीयादितिब्राह्मेजाबालिः।स्त्रीणांहोमोनदातव्यःपं
चगव्येतथैवचेति।स्त्रीशूद्रस्यतुशुध्यर्थंप्राजापत्यंसमाचरेत्।पंच
गव्यंचकुर्वीतस्नात्वापीत्वाशुचिर्भवेदितिपाराशरः।महार्णवेस्त्रीशू
द्रयोःपंचगव्येसंकल्प मभिधायप्राशनपक्षेशूद्रेणकापिलंनपेयमि

आधा· प्रा·
३६

त्युक्तं। स्मृत्यर्थसारे तु॥ स्त्रीशूद्रौ विप्रैः कारयित्वा तूष्णीं पिबेत् इत्या
ह। व्रतं च निशामुखे ग्राह्यं। इदं च ग्रामाद्बहिर्नदीतीरे कार्यं॥ विहित
परिमाणपंचगव्यग्रहणाशक्तस्तु स्वल्पमेव पंचगव्यं कुर्यात्॥ सर्व
स्यापेयत्वात्। ततो गृहमागत्य तस्मिन्दिने उपवासो हविष्यं वाश्नी
यात्। मौनी विष्णुं स्मरन् निशामतिवाह्यानंतरं प्रक्रांतप्रायश्चित्तसंक
ल्पानुसारेण कृत्वोत्तरांगानि कुर्यात्। तत्र पूर्ववद्व्याहृतिभिर्हुत्वो राम
त्तरांगं विष्णुश्राद्धं कृत्वोत्तरांगं गोदानं च कुर्यात्॥ यथोक्तपूर्वांगसहि ३६

तं यथाशक्त्याचीर्णममुकप्रायश्चित्तं संपूर्णमस्त्विति ब्राह्मणान्वाच
यित्वा पापहं महाविष्ण्वर्पणं कुर्यात्। एतच्च सर्वं प्राजापत्याधिकप्रा
यश्चित्ते। न तु त्रिरात्रे। तत्र तूपोषणत्रयमात्रमित्याहुः। दशदानान्य
पि कुर्यात् इत्युक्तं महार्णवे। तानि च। गोभूतिलहिरण्याज्यं वासो धा
न्यं गुडानि च। रौप्यं लवणमित्याहुर्दशदानानि पंडिता इति। देहशु
द्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं दशदानानि करिष्ये इति संकल्प्य। गवा
मंगेष्विति गां दद्यात्। सर्वभूताश्रया भूमिर्वराहेण समुद्धृता। अनंत

३१ सस्यफलदाश्रतः शांतिंप्रयच्छमे। इतिभूदानं॥ महर्षेर्गोत्रिसंभूताःका
श्यपस्यतिलाःस्मृताः। तस्मादेषांप्रदानेनममपापंव्यपोहतु॥ इतिति
लान्॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः। अनंतःशांतिंप्रयच्छ
मे॥ इतिहिरण्यं॥ कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थितं। देवानामा
ज्यमाहारंअतःशांतिंप्रयच्छमे॥ इत्याज्यं॥ शरण्यंसर्वलोकानांलज्जा
यारक्षणंपरं। सुवेशधारिवस्त्रत्वमतःशांतिंप्रयच्छमे॥ इतिवस्त्रं॥
सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत्॥ प्राणिनांजीवनोपायमतःशां ३१

तिंप्रयच्छमे। इतिधान्यं॥ यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः। सा
मवेदस्तुवेदानांमहादेवस्तुयोगिनां। प्रणवःसर्वमंत्राणांनारीणांपा
र्वतीयथा। तथारसानांप्रवरःसदेवेषुरसोमतः। ममतस्मात्परांलक्ष्मी
ंददस्वगुडसर्वदेतिगुडं॥ प्रीतिर्यतःपितॄणांचविष्णुशंकरयोस्तथा॥
शिवनेत्रोद्भवंरौप्यमतःशांतिंप्रयच्छमे। इतिरजतं॥ यस्मादन्नरसाःस
र्वेनोत्कृष्टालवणंविना। शंभोःप्रीतिकरंनित्यमतःशांतिंप्रयच्छमे। इ
तिलवणं॥ एतत्परिमाणंच॥ निवर्त्तनमिताभूमिर्द्रोणत्रयमितास्तिलाः

३८ स्ववर्णनिष्कमात्रंतुघृतंसप्रस्थमाढकं।सूक्ष्मवस्त्रद्वयंचैवगुडंचपल
षष्टिकं।सार्द्धखारीद्वयंव्रीहीन्लवणंसार्द्धखारिकं।निष्कत्रयमितंरौ
प्यंदशदानप्रमाणकमितिपरशुरामप्रतापे॥इतिदशदानानिसप्रमा
णानि।यस्तुपित्रादिपाकोपजीवीविद्याध्ययननिष्ठश्चतस्यसत्यप्यधि
कारेनाहिताग्नितायांनकृछ्राद्यपेक्षा॥पितृपाकोपजीवीवाभ्रातृपा
कोपजीवकः॥ज्ञानाध्ययननिष्ठोवानदुष्यताग्निनाविनेतिगार्ग्योक्तेः राम
इतिप्रायश्चित्तप्रयोगःसमाप्तः॥ ॥अथविछिन्नस्यगृह्याग्नेःपुनःसंधा ३८

नप्रयोगः॥ ॥यजमानःपत्न्यासहकृतनित्यक्रियोदेशकालौसंकीर्त्य
अग्निविछेदकालगणनयालुप्तानांसायंप्रातर्होमानांआरंभेचदर्श
पूर्णमासस्थालीपाकानांसंपत्तिपर्याप्तंव्रीह्यादिद्रव्यमाज्यंचब्राह्मणा
यसंप्रददेइतिदद्यात्॥ततःपुनराचम्यप्राणानायम्यपत्न्यासहदेश
कालौसंकीर्त्यविछिन्नस्यगृह्याग्नेःपुनःसंधानंकरिष्यइतिसंकल्प
स्थंडिलाद्यग्निस्थापनांतंकृत्वान्वादध्यात्।तद्यथा।इहसमिधौगृही
त्वादेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिनन्वाहितेग्नाविध्या

दिआघारांतमुक्त्वात्रप्रधानंत्रिरग्निंपवमानंसकृदग्निंप्रजापतिंचाजे
नअर्यमणमग्निंवरुणमग्निंपूषणमग्निंप्रजापतिंचलाजद्रव्येणच
तुःसूर्यासावित्रीमाज्यद्रव्येणशेषेणाग्निंस्विष्टकृतमित्यादिसंघोय
क्ष्येइत्यंतमुक्त्वासमिद्द्वयमग्नावाधायपरिसमूहनादिपात्रासादनका
लेलाजाञ्शूर्पेदधिप्राशनपक्षेदधिचासाद्यआज्यसंस्कारकालेसला
जंत्रिःपर्यग्निकृत्वोत्पूयलाजां त्रिःप्रोक्ष्याज्यंबर्हिष्यासाद्यतद्दक्षि राम
णतःलाजांश्चासाद्यअग्न्यलंकरणादिआघारांतेअग्नआयूंषीतित्ति ३९

स्तृणांत्रात्तंवैखानसाऋषयः।अग्निःपवमानोदेवतागायत्रीछंदः।
अग्निपुनःसंधानप्रधानाज्यहोमेविनियोगः॥अग्नआयूंषि०।अग्नि
ऋषिः०अग्नेपवस्वस्वपा०३अग्नयेपवमानायेदं०।त्वमर्यमावसु
श्रुतोग्निस्त्रिष्टुप्।त्वमर्यमा०॥अग्नयइदं०॥प्रजापतेहिरण्यगर्भः प्र
जापतिस्त्रिष्टुप्।प्रजापते०॥प्रजापतयइदं०॥अथपत्न्याःप्रक्षालितं
जलौपतिराज्येनोपस्तीर्यहि लाजानोप्यत्रिर्जामदग्न्याः॥शूर्पस्था
नवत्तांश्चाभिघार्यस्वयमुपविष्टएवतिष्ठंत्याअंजलिंदक्षिणपाणिना

ध्यात्वाअर्यमणंवरुणंपूषणमितितिसृणांवामदेवोर्यमाग्निर्वरुणो
ग्निःपूषाग्निरनुष्टुप्।गृह्योग्नि·लाजहोमे०॥मंत्रांतेंजलिमविछिंदंती
अंगुल्यग्रैर्वामपार्श्वेनवापत्नीजुहुयात्॥पतिःअर्यम्णेग्नयइदं·॥
एवंवरुणं॥पूषणं·।ततःकर्त्तापत्न्यन्वारब्धःशिष्टान्लाजान्शूर्प
कोणेनाभ्यात्मप्रजापतिंध्यायन्स्वाहाकारेणजुहुयात्।प्रजापतय
स्ति इदं·॥लाजानांस्विष्टकृत्तंनो॥ततःस्रुवेणाज्यंजुहुयात्।आनःप्रजा एम
मितिचतसृणांसूर्यासावित्रीसूर्यासावित्री।आद्याजगती।द्वितीयात्रि ४०

ष्टुप्।अंत्येद्वेअनुष्टुभौ।पुनःसंधानप्रधानाज्यहोमे·।आनःप्रजां·॥
अघोरचक्षुः०॥इमांत्वमिंद्र·॥संम्राज्ञी०॥४॥सर्वत्रसूर्यासावित्र्याइ
दं०॥समंजंतुसूर्यासावित्रीविश्वेदेवाअनुष्टुप्।आज्यशेषेणदधि
प्राशनेहृदयांजनेविनियोगः॥अनेनदधिप्राश्यस्रुवगताज्यशेषे
णानामिकयास्वहृदयांजनंवाकृत्वातत्स्त्रीपत्न्याअपिकुर्यात्।हस्तं
प्रक्षाल्याज्यशेषेणस्विष्टकृतंहुत्वाप्रायश्चित्तादिहोमशेषंसमा
प्यकर्मेश्वरार्पणंकृत्वापवित्रग्रंथिंविस्रस्यशुद्धदेशेक्षिप्त्वाब्राह्म

४१ णान्भोजयेत्॥ ॥इतिरघुनाथोन्नीतपुनःसंधानप्रयोगःसमाप्तः॥
श्री॥अथाधिकारसिध्यै बौधायनोक्तःकूश्मांड होमप्रयोगः॥
कृतस्मार्तकृच्छ्रादिप्रायश्चित्तोमावास्यायांपूर्णिमास्यांवाकृतरौपास
नि नःकेशश्मश्रूपपक्षलोमनखान्वापयित्वास्नातःपवनादिकृत्वापुण्या
हंवाचयेत्॥तत्रदेवाआदित्यादयःसवित्रादयोवाप्रीयंतामिति
विशेषः॥ततःपश्चादौपासनस्यदर्भेष्वासीनोदर्भान्धारयमाणःप्रा राम
णायामंकुर्यात्।पत्न्यप्यमंत्रकं॥अथविस्तुंध्यात्वादेशकालौसंकी ४१

त्यैनोनिबर्हणेनाधानाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंकूश्मां
डैर्होष्यामीतिसंकल्प्यान्वादध्यात्॥तत्रचक्षुषीआज्येनेत्यंतेसवि
रं तारंवरुणा॥देवानादित्यान्विश्वान्देवान्द्यावापृथिव्यौसरस्वतीमिं
द्राग्निमित्रावरुणसोमधातृबृहस्पतीजातवेदसमग्निंगार्हपत्ये
ज्योतिरग्निमग्निंगार्हपत्यमग्निमग्निंगार्हपत्यमग्निंगार्हपत्यंअग्नि
मग्निंगार्हपत्यमापःस्तुंधनीरापोहिरण्यवर्णावरुणंवरुणमग्नीव
रुणौअग्नीवरुणौअग्निमयसंअग्नीद्रौ।उग्रंपश्यारा ष्ट्रभृत्तावप्सरसौ

निर् कृत्यां निर्ऋतिं। दुःशंसानुशंसं संघणानुघणान्।२ कूश्मां.

आधा.

४२ उग्रं पश्याराष्ट्रभृतो॥ वरुणं४ अग्नीवरुणौ अग्नीवरुणौ। सं कुसुक
विकुसुक निर्ऋथ सस्वनानु त्वष्टारं४ अग्निमायुर्दमग्निमग्निं वरुण आयुष्मंतं
मदितिं विश्वान्देवानग्निं पवमानमग्निं पवमानमग्निं पवमानमग्निं जा
तवेदसमग्निं वृत्रहणमग्निं ज्ञषसं निम्रुचं देवाजातवेदसमग्निमग्निं
वैश्वानरं स्विष्टिं४ अग्निमभ्यावर्तिनं४ एताः प्रधानदेवता आज्य द्र
व्येण शेषेणाग्निं स्विष्टकृतमित्यादि पूर्णपात्रनिधानांते स्थालीपाक एम
वत्कृते शूर्पे पवित्रे निधाय तूष्णीं चतुरो मुष्टीन्निरूप्य तूष्णीं चतुर्वारं ४२

प्रोक्ष्यावघाताद्याज्यभागांते कृते चरोरवदानधर्मेणावदाय गाय
त्र्या विश्वामित्रः सविता गायत्री। चरुहोमे विनियोगः। भूर्भुवः स्वरो
मित्यनुद्रुत्य तत्सवितुर्वरेण्यं भ० प्रचोदयात्स्वाहा॥ सवित्र इदं॥
अथ स्विष्टकृतमवदाय तं तः परिधिसादयित्वाज्याहुतीर्जुहुयात्।
यद्दैवा देवहेळनं देवासश्चकृमा वयं। आदित्यास्तस्मान्मामुंचतर्त
स्यर्तेन मामित स्वाहा॥ देवेभ्य आदित्येभ्य इदं॥ देवा जीवनकाम्या
यद्वाचानृतमूदिम॥ तस्मान्न इह मुंचत विश्वेदेवाः सजोषसः स्वाहा।

४३ विश्वेभ्यो देवेभ्य इदं॰। कृतेन द्यावापृथिवी कृतेन त्वꣳ सरस्वति। कृता
न्नः पाह्येनसो यत्किंचानृतमूदिम स्वाहा। द्यावापृथिवीभ्याꣳ सरस्वत्या
इदं॰॥ इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः। ते नो मुंचंत्वेनसो
यदन्यकृतमारिम स्वाहा। इन्द्राग्नि मित्रावरुणसोम धातृबृहस्पति
भ्य इदं॰॥ सजातशꣳसादुत जामिशꣳसाज्ज्यायसः शꣳसादुत वा क
नीयसः। अनाधृष्टं देवकृतं यदेनस्तस्मात्वमस्माञ्जातवेदो मुमुग्धि एम
स्वाहा। जातवेदस इदं॰॥ यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीव ४३

ध्याꣳ शिश्नैर्यदनृतं चकृमा वयं। अग्निर्मा तस्मादेनसो गार्हपत्यः प्र
मुंचतु चकृम यानि दुष्कृता स्वाहा। अग्नये गार्हपत्यायेदं॰॥ येन त्रितो
अर्णवान्निर्बभूव येन सूर्यं तमसो निर्मुमोच। येनेन्द्रो विश्वा अजहा
दरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आक्षि स्वाहा। ज्योतिष इदं॰
यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि। एतत्तदग्ने अ
नृणो भवामि जीवन्नेव प्रति तत्ते दधामि स्वाहा। अग्नये इदं॰। यन्म अनृणापे
यि माता गर्भे सत्येनश्चकार यत्पिता। अग्निर्मा तस्मादेनसो गार्हपत्यः

श्राधा· प्रमुंचतुडुरितायानिचकृमकरोतुमामनेनसं स्वाहा। अग्नयेगार्ह
४४ पत्यायेदं॥ यदापिपेषमातरंपितरंपुत्रःप्रमुदितोधयन्॥ अहिं
सितोपितरौमयातत्तदग्नेअनृणोभवामिस्वाहा॥ अग्नयेंइदं·। यदं अनृणाये
तरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिंसिम। अग्निर्मातस्मा
देनसोगार्हपत्यःप्रमुंचतुडुरितायानिचकृमकरोतुमामनेनसं
स्वाहा। अग्नयेगार्हपत्यायेदं·॥ यदाशसांनिशसायत्पराशसायदे एम
नश्चकृमानूतनंयत्पुराणं॥ अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतु ४४

डुरितायानिचकृमकरोतुमामनेनसं स्वाहा। अग्नयेगार्हपत्याये
दं·॥ अतिक्रामामिडुरितंयदेनोजहामिरिप्रंपरमेसधस्थे। यत्रयंति
सुकृतोनापिडुष्कृतस्तमारोहामिसुकृतान्नुलोकं स्वाहा। अग्नय
इदं·॥ त्रितेदेवाअमृजतैतदेनस्त्रितएतन्मनुष्येषुमामृजे। ततोमा
यदिकिंचिदानशेअग्निर्मा तस्मादेनसोगार्हपत्यःप्रमुंचतुडुरिता
यानिचकृमकरोतुमामनेनसं स्वाहा॥ अग्नयेगार्हपत्यायेदं·॥ दि
विजाताअप्सुजातायाजाताओषधीभ्यः॥ अथोयाअग्निजाआपस्ता

आधा· ४५

नः स्वधं तु ऋणं धनी स्वाहा। अग्नये ऋणं धनीभ्य इदं॥ यदापो नक्तं दुरितं च
राम यद्वा दिवा नूतनं यत्पुराणं। हिरण्यवर्णास्तत उत्पुनीतन स्वाहा।
अग्नये हिरण्यवर्णाभ्य इदं॥ इमं मे वरुण श्रुधी हवमद्या च मृळय॥
त्वामवस्युराचके स्वाहा॥ वरुणायेदं॥ तत्त्वा यामि ब्रह्मणा वन्दमान
स्तदाशास्ते यजमानो हविर्भिः॥ अहेळमानो वरुणेह बोध्युरुशꣳ
स मान आयुः प्रमोषीः स्वाहा। वरुणायेदं॥ त्वन्नो अग्ने वरुणस्य वि रम
द्वान्देवस्य हेळोऽवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा ४५

द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा। अग्नीवरुणाभ्यामिदं॥ स त्वन्नो अग्ने
ऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणꣳ रराणो
वीहि मृडीकꣳ सुहवो न एधि स्वाहा॥ अग्नीवरुणाभ्यामिदं॥ त्वमग्ने
ग्ने अयास्ययासन्मनसा हितः॥ अयासन्हव्यमूहिषेऽया नो धेहि भेष
जꣳ स्वाहा। अग्नयेऽयस इदं॥ यद्दीव्यन्नृणमहं बभूवादित्सन्वा
संजगर जनेभ्यः। अग्निर्मा तस्मादिंद्रश्च संविदानौ प्रमुंचतांꣳ स्वाहा।
अग्नेंद्राभ्यामिदं॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजि

आधा
४६ ग्नेमानः॥ तुरग्नं पुनस्याचरा इष्टभच्युतान्यसुरसावनुदन्ता मृणानि स्वाहा॥ त
ग्नं पश्या इष्टभङ्गामस्मरोभ्या मिदं॥ तग्नं पनस्युए इष्टभूकिल्बिषाणि पद्
क्षवेत्तु मन्तेदन्तमुतन। नेन्नेकृणा नृणवृइत्समानो यमस्य लोके अधि
रज्जु एयु स्वाहा॥ तग्नं पनस्यायेरा इष्टभतइदं। अव ते हेळो वरुण नमोभि
रव यज्ञेभिरीमहे हविर्भिः॥ क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि
शिश्रथः कृतानि स्वाहा॥ वरुणायेदं॥ उदुत्तमं वरुण पाशमस्मदवा एम
धमं विमध्यमं श्रथाय॥ अथा वयमादित्य व्रते तवानागसो अदितये ४६

कूष्मांड

स्याम स्वाहा॥ वरुणायेदं०॥ इमं मे वरुण० तत्त्वायामि०॥ त्वन्नो अग्ने०
स त्वन्नो अग्ने०॥ संकुसुको विकुसुको निर्ऋथो यश्च निस्वनः॥ तेऽस्म
द्यक्ष्ममनागसो दूराद्दूरमचीचतं स्वाहा॥ संकुसुक विकुसुक निर्ऋ
थ निस्वनेभ्य इदं॥ निर्यक्ष्ममचीचते कृत्यां निर्ऋतिं च। तेन योऽस्मत्
संमृच्छातै तमस्मै प्रसुवामसि स्वाहा॥ कृत्यायै इदं०॥ दुःशंसानुशं निर्ऋतय
साभ्यां घणेनानुघणेन च। तेनान्योऽस्मत्संमृच्छाते तमस्मै प्रसुवाम
सि स्वाहा॥ इदं०॥ संवर्चसा पयसा संतनूभिरगन्महि मनसा
दुःशंसानुशंस घणानुघणेभ्य

४७ संᳫं शिवेन॥ त्वष्टा नो अत्र विदधातु रायो नु मार्ष्टु तन्वो ऽ यद्विलिष्टं
स्वाहा। त्वष्ट्र इदं॰॥ आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः॥ पुनस्ते प्रा
ण आयाति परा यक्ष्मᳫं सुवामि ते स्वाहा॥ अग्नय इदं॰॥ आयुर्दा अ आयुष्मते
ग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु ग
व्यं पितेव पुत्रमभिरक्षतादिमᳫं स्वाहा॥ आयुर्दे ऽग्नय इदं॰॥ इममग्न
आयुषे वर्चसे कृधि तिग्ममोजो वरुण सᳫं शिशाधि॥ माते वा स्मा राम
अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् स्वाहा॥ अग्नये वरुणा ४७

यादित्यै विश्वेभ्यो देवेभ्य इदं॰॥ अग्न आयूᳫंषि पवस आसुवोर्ज
मिषं च नः॥ आरे बाधस्व दुच्छुनाᳫं स्वाहा॥ अग्नये पवमानायेदं॰॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं। दधद्रयिं मयि पोषᳫं स्वाहा
अग्नये पवमानायेदं॰॥ अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहि
तः। तमीमहे महागयᳫं स्वाहा॥ अग्नये पवमानायेदं॰॥ अग्ने जातान्
प्रणुदा नः सपत्नान्प्रत्यजातान् जातवेदो नुदस्व॥ अस्मे दीदिहि सु
मना अहेडञ्छर्मन्ते स्याम त्रिवरूथ उद्भौ स्वाहा। अग्नये जातवेदस इ

आधा· कूश्मांड

४८ दं·॥सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्वा। अ
धि नो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान्स्वाहा। जात
वेदस इदं०।५। अग्ने यो नो भितो जनो वृको वारो जिघांसति। तांस्त्वं
वृत्रहन्जहि वस्वस्मभ्यमाभर स्वाहा। अग्नये वृत्रघ्न इदं०॥ अग्ने यो नो
भिदासति समानो यश्च निष्ट्यः॥ तं वयं समिधं कृत्वा तुभ्यमग्नेपिद
ध्मसि स्वाहा॥ अग्नय इदं०॥ यो नः शपादशपतो यश्च नः शपतः श एम
पात्। उषाश्च तस्मै निम्रुक्च सर्वं पापं समूहतां स्वाहा। उषसे निम्रुच ४८

इदं·। यो नः सपत्नो यो रणो मर्त्तो भिदासति देवाः। इध्मस्येव प्रक्षायतो
मा तस्योच्छेषि किंचन स्वाहा। देवेभ्य इदं·॥ यो मां द्वेष्टि जातवेदो यं
चाहं द्वेष्मि यश्च मां। सर्वांस्तानग्ने संदह यांश्चाहं द्वेष्मि ये च मां स्वा
हा। जातवेदसे अग्नय इदं·॥ यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते ज
नः। निंदाद्यो अस्मां दिप्साच्च सर्वांस्तान्मष्मषा कुरु स्वाहा। अग्नय
इदं·॥ संशितं मे ब्रह्म संशितं वीर्यं १ बलं। संशितं क्षत्रं मे जिष्णु
यस्याहमस्मि पुरोहितः स्वाहा। अग्नय इदं·। उदेषां बाहू अतिरमुद्व

४९ चैत्रथो वलं। क्षिणो मित्रं स्तेणा मित्रान्नुया प्रियस्तां स्रहः स्वाहा। अग्न
यइदं·। पुनर्मनः पुनरायुर्म आगन् पुनश्चक्षुः पुनः श्रोत्रं म आगन् पु
नः प्राणः पुनराकूतं म आगन् पुनश्चित्तं पुनराधीतं म आगात्॥ वै
श्वानरो मेदब्धस्तनूपा अवबाधतां दुरितानि विश्वा स्वाहा। वैश्वा
नरायेदं॰॥ सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या॥
इंद्रं या देवी सुभगा जजान सा न आगन् वर्चसा संविदाना स्वाहा॥ त्वि राम
ष्या इदं·॥ या राजन्ये दुंदुभावायतायामश्वस्य क्रंदे पुरुषस्य मायौ॥ ४९

इंद्रं या देवी सुभगा जजान सा न आगन् वर्चसा संविदाना स्वाहा॥ त्वि
ष्या इदं·। या हस्तिनि द्वीपिनि या हिरण्ये त्विषिरश्वेषु पुरुषेषु गोषु॥
इंद्रं या दे·ना स्वाहा। त्विष्या इदं·। रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये
वरुणस्य शुष्मे। इंद्रं या देवी·ना स्वाहा॥ त्विष्या इदं·॥ अग्ने भ्यावर्तिन्न्
भि न आवर्तस्वायुषा वर्चसा सन्या मेधया प्रजया धनेन स्वाहा। अग्नये
अभ्यावर्तिन इदं·। अग्ने अंगिरः शतं ते संत्वावृतः सहस्रं त उपावृतः॥
तासां पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि स्वाहा। अ

आधा कूश्मांड

५० ग्नये अभ्यावर्तिन इदं॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा। पुन
र्नः पाहि विश्वतः स्वाहा। अग्नये अभ्यावर्तिन इदं। सह रय्या निवर्त
स्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परि स्वाहा॥ अग्नये अभ्या
वर्तिन इदं॥ अथ स्वासने तिष्ठन्समित्पाणिः॥ ॥वैश्वानराय प्रतिवेद
यामो यदीनृणं संगरो देवतासु॥ स एतान्पाशान्प्रमुचन्प्रवेद स नो
मुंचातु दुरितादवद्यात्॥ वैश्वानरः पवयान्नः पवित्रैर्यत्संगरमभिधा राम
वाम्याशां॥ अनाजानन्मनसा याचमानो यदत्रैनो अव तत्सुवामि॥ ५०

अमी ये सुभगे दिवि विचृतौ नाम तारके॥ प्रेहामृतस्य यच्छतामेतद्बद्ध
कमोचनं। वि जिहीर्ष्व लोकान्कृधि बन्धान्मुंचासि बद्धकं। योनेरिव प्रच्यु
तो गर्भः सर्वान्पथो अनुष्व। स प्रजानन्प्रतिगृभ्णीत विद्वान्प्रजापतिः
प्रथमजा ऋतस्य। अस्माभिर्दत्तं जरसः पुरस्तादछिन्नं तंतुमनुसंच
रेम। ततं तंतुमन्वेके अनुसंचरंति येषां दत्तं पित्र्यमायवत्। अबंध्वे न
के ददतः प्रयच्छाद्दातुं चेच्छक्नवांसः स्वर्ग एषां॥ आरभेथामनुसंर
भेथां समानं पंथामवथो घृतेन। यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गो

आधा कूष्मांड

५२ त्रीयेहज्जायापत्तीसंरंभेथां॥यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपित
रंवाजहिंसिम।अग्निर्मातस्मादेनसोगार्हपत्यउन्नोनेषद्दुरितायानि
निचकृम।भूमिर्माताऽदितिर्नोजनित्रंभ्रातांतरिक्षमभिशस्त्ते एनः
द्यौर्नःपितापित्र्याच्छंभवासिजामिमित्वामाविवित्सिलोकात्॥य
त्रसुहार्दःसुकृतोमदंतिविहायरोगंतन्व१ंस्वायां।अश्लोणांगैर
ह्रुताःस्वर्गेतत्रपश्येमपितरंचपुत्रं।यदन्नमस्म्यनृतेनदेवादास्य एम
न्नदास्यन्नुतवाकरिष्यन।यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्रति ५१
स्य

जग्राहमग्निर्मातस्मादनृणंकृणोतु।यदन्नमद्मिबहुधाविरूपंवासो
हिरण्यमुतगामजामविं।यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्र
तिजग्राहमग्निर्मातस्मादनृणंकृणोतु॥ ॥इतिद्वादशर्चेनसूक्ते
नोपस्थायाग्नौसमिधमादध्यात्॥यन्मयामनसावाचाकृतमेनःक
दाचन।सर्वस्मात्तस्मान्मेलितोमोग्धित्वंहिवेत्थयथातथंस्वा
हेति॥अग्नयेवैश्वानरायेदं॥अथपूर्वावत्तेस्विष्टकृतंजुहुयात्
हव्यवाहमभिमातिषाहंरक्षोहणंपृतनासुजिष्णुं॥ज्योतिष्मंतंदी

आधा कृ०

५२ यत्तं त्वरं धिमग्निं स्विष्टकृतमाहुवे मां स्विष्टमग्ने अभितत्पृणाहि वि
श्वा देव पृतना अभिष्य । उरुं नः पंथां प्रदिशन्विभाहि ज्योतिष्मद्धे
ह्यजरं न आयुः स्वाहा । अग्नये स्विष्टकृत इदं ॥ ततः संस्रवहनादि हो
मशेषं समाप्य ग्रेणाग्निमश्वत्थपत्रे हुतशेषं निदधाति । एवं संव
त्सरं मासं चतुर्विंशति रात्रीः द्वादश रात्रीः षड्रात्रीस्तिस्रो रात्रीर्वा जु
हुयात् । आ समाप्तेः पय एव भुंजीत हविष्यं वेति बोधायनोक्तः कू राम
श्मांडहोमप्रयोगः ॥ अथ तदुक्त एव गणप्रयोगः ॥ ॥ पूर्ववत्संक ५२

ल्पांतं विधायान्वादध्यात् ॥ तत्र चक्षुषी आज्येनेत्यंते सवितारं चरु
णा ॥ अग्निं द्रुतहषं नारायणं ८ अग्निमंहोमुचमग्निमंहोमुचं इंद्र
मंहोमुचमिंद्रमंहोमुचं मित्रावरुणावागोमुचौ मित्रावरुणावा
गोमुचौ वायुसवितारा वागोमुचौ २ अश्विना वागोमुचौ २ मरुत ए
नोमुचो २ विश्वान्देवानेनोमुचो २ अनुमतिमनुमतिं अग्निं वैश्वान
रं २ द्यावापृथिव्यावंहोमुचौ २ अग्निमग्निं मिंद्रावरुणावंहोमु
चौ ४ इंद्रावरुणयोरस्मै त्वामग्निं मिंद्रावरुणयोर्द्विपात्स्वपशुत्वामग्निं

आधा

५२ द्रावरुणयोरश्व तुष्पात्स्तःपशुषुस्त्वाममिंद्रावरुणयोर्गोष्ठेस्त्वाममिं
द्रावरुणयोर्गृहेषुस्त्वाममिंद्रावरुणयोरप्सुस्त्वाममिंद्रावरुणयोरो
षधीषुस्त्वाममिंद्रावरुणयोर्वनस्पतिषुस्त्वामंपवमानंदेवजनमनु
विश्वायुषोजातवेदसमग्निमग्निंदेवंसवितारंवैश्वदेवींपुनतींवै
श्वानरंवातमिषिरंद्यावापृथिव्यृतावरीःसवितारमग्निंब्रंह्माणंपा
वमानीःब्रंह्माणंइंद्रंसुनीत्यासहितंसोमंस्वस्त्यासहितंवरुणं एम
समीच्यासहितंयमंराजानंनृमृणाभिःसहितंजातवेदसमूर्जयंत्या ५२

गणहो

सहितंदेवानादित्यान्अग्निंगार्हपत्यंद्यावापृथिव्योसरस्वतींजात
वेदसमग्निंगार्हपत्यंहूरेपन्स्याराछुऋतावप्सरसावग्निंगार्हपत्यंम
ग्निंगार्हपत्यमग्निंअग्निंगार्हपत्यमग्निंगार्हपत्यंअग्निं।अग्निंगार्ह
पत्यमापःशुंधनीरापोहिरण्यवर्णाःवरुणंवरुणंअ .ग्नीवरुणाव
ग्नीवरुणावग्निमप्सुसमग्निंवैश्वानरं।एताःप्रधानदेवताःचरुद्र
व्येणशेषेणाग्निंस्विष्टकृत्तमित्यादि।।पात्रप्रयोगेप्रणीतापात्रेण
सहतंतुवेष्टितंकलशंप्रमुनक्ति।।प्रणीताआसाद्यकलशेपवित्रेनि

५४ धायापआनीयप्रणीतोत्तरतोनिदधाति। निर्वापकालेतूष्णीमाहुतीः
१०३ चतुर्गुणसंख्ययाव्रीहीन्निरुप्यतथैवप्रोक्षणंकुर्यात्॥ आज्य
भागांतेचरुमवदायपूर्ववत्सावित्र्याहुत्वास्विष्टकृतंचावदाय
स्थापयित्वामेक्षणेनावघातंजुहोति॥ ॥अग्नेनयसुपथाराये अ
स्मान्विश्वानिदेववयुनानिविद्वान्॥ युयोध्यस्मज्जुहुराणमेनोभूयि
ष्ठांतेनमउक्तिंविधेमस्वाहा॥ अग्नयइदं॥ प्रवःशुक्रायभानवेभर राम
ध्वं॰हव्यंमतिंचाग्नयेसुपूतं॥ योदैव्यानिमानुषाजनूंष्यंतर्विश्वानि ५५

विद्मनाजिगातिस्वाहा। अग्नयइदं॰॥ अच्छागिरोमतयोदेवयंतीर
ग्निं यंतिद्रविणंभिक्षमाणाः॥ सुसंदृशं॰सुप्रतीकं॰स्वंचं॰हव्यवा
हमरतिंमानुषाणां॰स्वाहा। अग्नयइदं॰॥ अग्नेत्वमस्मद्युयोध्यमी
वाअनग्नित्राअभ्यमंतकृष्टीः॥ पुनरस्मभ्यं॰सुवितायदेवक्षांवि
श्वेभिरमृतेभिर्यजत्रस्वाहा। अग्नयइदं॥ अग्नेत्वंपारयानव्योअ
स्मान्स्वस्तिभिरतिदुर्गाणिविश्वा। पूश्चपृथ्वीबहुलानउर्वीभवाती
कायतनयायशंयोःस्वाहा॥ अग्नयइदं॥ प्रकारवोमनुनावच्यमाना

देवद्रीचींनयथदेवयंतः।दक्षिणावाङ्गाजिनीप्राच्येतिहविर्भरंत्यग्न
येघृताचीस्वाहा।अग्नयइदं॥सहस्रशीर्षा०दशांगुलं स्वाहा।पुरु
षायनारायणायेदमित्यासूक्तसमाप्ति॥पुरुषएवेदंसर्वं०२एता
वानस्यमहिमा०३॥त्रिपादूर्ध्वउदैत्पुरुषः०४।तस्माद्विराळजायत०
५॥यत्पुरुषेणहविषा०६॥सप्तास्यासन्०७॥तंयज्ञंबर्हिषि०८तस्मा
द्यज्ञात्सर्वहुतःसंभृतं०९॥तस्माद्यज्ञात्सर्वहुतऋचः१०॥तस्माद राम
श्वाअ०११॥यत्पुरुषंव्यदधुः०१२॥ब्राह्मणोस्य०१३॥चंद्रमामनसो ५५

जातः०१४॥नाभ्याआसीदंतरिक्षं०१५॥वेदाहमेतंपुरुषंमहांतमादि
त्यवर्णंतमसस्तुपारे॥सर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वा
भिवदन्यदास्तेस्वाहा॥१६॥धातापुरस्ताद्यमुदाजहारशक्रःप्रवि
द्वान्प्रदिशश्चतस्रः॥तमेवंविद्वानमृतइहभवतिनान्यःपंथाअय
नायविद्यतेस्वाहा॥१७॥यज्ञेनयज्ञमयजंतदेवाः०१८॥अग्नेर्मन्वे
प्रथमस्यप्रचेतसःपांचजन्यंबहवःसमिंधते॥विश्वस्यांविशिप्र
विविशिवांसमीमहेसनोमुंचत्वंहसः स्वाहा।अग्नयेअंहोमुच

इदं ।यस्येदं प्राणं निमिषद्यदेजति यस्य जातं जनमानं च केवलं। स्तौ
म्यग्निं नाथितो जोहवीमि स नो मुंचत्वंहसः स्वाहा। अग्नये अंहोमु
च इदं ॥ इंद्रस्य मन्वे प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः
।यो दाशुषः सुकृतो हवमुपगंता स नो मुंचत्वंहसः स्वाहा। इंद्रा
यांहोमुच इदं ॥३॥ यः संग्रामं नयति सं वशी युधे यः पुष्टानि सं
सृजति त्रयाणि ॥ स्तौमि इंद्रं नाथितो जोहवीमि स नो मुंचत्वंहसः
स्वाहा ॥ इंद्रायांहोमुच इदं ॥४॥ मन्वे वां मित्रावरुणा तस्य वित्तं

सत्यौजसा दृंहणा यं नुदेथे। या राजानं सरथं याथ उग्रा ता नो मुं
चतमागसः स्वाहा ॥ मित्रावरुणाभ्यामागोमुग्भ्यामिदं ॥५॥ यो वां
रथं ऋजुरश्मिः सत्यधर्मा मिथुश्चरंतमुपयाति दूषयन् ॥ स्तौमि मि
त्रावरुणा नाथितो जोहवीमि तौ नो मुंचतमागसः स्वाहा। मित्राव
रुणाभ्यामागोमुग्भ्यामिदं ॥६॥ वायोः सवितुर्विदथानि मन्महे या
वात्मन्वद्विभृतो यौ च रक्षतः। यौ विश्वस्य परिभू बभूवथुस्तौ नो मुं
चतमागसः स्वाहा। वायुसवितृभ्यामागोमुग्भ्यामिदं ॥७॥ उप श्रेष्ठा

आभा गएहे
५७

नआशिषोदेवयोधर्मेअस्थिरन।तौमिंवायुंसवितारंनाथितो
जोहवीमितोनोमुंचतुमागसःस्वाहा।वायुसवितृभ्यामागोमुष्या
मिदं॥८॥रथीतमोरथीनामह्वऊतयेशुभंगमिष्ठोसुयमेभिरश्वैः।
पयोवांदेवौदेवेषुनिशितमोजस्तोनोमुंचतुमागसःस्वाहा॥अ
श्विभ्यामागोमुष्यामिदं।यदयातंवहतुंसूर्यायास्त्रिचक्रेणसं
सदमिच्छमानौ।तौमिंदेवावश्विनौनाथितोजोहवीमितौनोमुंच एम
तुमागसःस्वाहा।अश्विभ्यामागोमुष्यामिदं॥१०॥मरुतांमन्वेअ ५७

धिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे।आशून्दुहेसुयमानूतये
तेनोमुंचंत्वेनसःस्वाहा।मरुद्भ्यएनोमुग्भ्यइदं॥११॥तिग्ममायुधंवी
डितंसहस्वद्दिव्यंशर्द्धःपृतनासुजिष्णु।तौमिंदेवान्मरुतोना
थितोजोहवीमितेनोमुंचंत्वेनसःस्वाहा।मरुद्भ्यएनोमुग्भ्यइदं॥
१२॥देवानांमन्वेअधिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे।आशू
न्दुहेसुयमानूतयेतेनोमुंचंत्वेनसःस्वाहा।विश्वेदेवेभ्यएनोमुग्भ्य भ्यो
इदं॥१३॥यदिदमिदमभित्रोचतिपौरुषेयेणदैव्येन॥तौमिंविश्वान्दे

५८ वान्नो थ्रितो जोहवीमि ते नो मुंचंत्वेनसः स्वाहा। विश्वेभ्यो देवेभ्य एनोमु
ग्भ्य इदं॰१४॥ अनु नोद्यानुमतिर्यज्ञं देवेषु मन्यतां। अग्निश्च हव्यवा
हनो भवतां दाशुषे मयः स्वाहा॥ अनुमत्या इदं॰॥१५॥ अन्विदनुमते
त्वं मन्यासै शं च नः कृधि। क्रत्वे दक्षाय नो हिनु प्रण आयूंषि ता
रिषः स्वाहा। अनुमत्या इदं॰१६॥ वैश्वानरो न ऊत्या प्रयातु परावतः॥
अग्निरुक्थेन वाहसा स्वाहा॥ अग्नये वैश्वानरायेदं॰१७॥ पृष्टो दिवि एम
पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश। वैश्वानरः सहसा ५८

पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं स्वाहा॥ अग्नये वैश्वानराये
दं॰१८॥ ये अप्रथेतामभितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनां॥
स्तोमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः स्वाहा।
द्यावापृथिवीभ्याममंहोमुग्भ्यामिदं॰॥१९॥ उर्वी रोदसी वरिवः कृ
णोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातं॥ स्तोमि द्यावापृथिवी नाथितो
जोहवीमि ते नो मुंचतमंहसः स्वाहा॥ द्यावापृथिवीभ्याममंहो
मुग्भ्यामिदं॰॥२०॥ यत्ते वयं पुरुष पुत्राय विद्याविद्वांसश्चकृमा कच्च

५८ नागः॥ कृधी स्वस्मांॅ अदितेरनागान्येनांॅसि श्रथो विषगग्ने स्वाहा॥
अग्नय इदं०॥२१॥ यथा हृत इस वो गुर्धं चित्सु दिषितामसुंचता यज
त्राः। एवा त्वमस्मत्प्रमुंचा व्यंॅहः प्रातार्यग्ने प्रतरान्न आयुः स्वाहा॥
अग्नय इदं०॥२२॥ या वा मिंद्रावरुणा यतव्या तनूस्तयेममंॅहसो मुं
चतंॅ स्वाहा। इंद्रावरुणाभ्याममंॅहो मुग्भ्यामिदं०॥१॥ या वा मिंद्राव
रुणा सहस्या तनूस्तयेममंॅहसो मुचतंॅ स्वाहा। इंद्रावरुणाभ्या एम
मंॅहोमुग्भ्यामिदं०॥२॥ या वा मिंद्रावरुणा रक्षस्या तनूस्तयेममंॅह ५९

सो मुचतंॅ स्वाहा। इंद्रावरुणाभ्याममंॅहो मुग्भ्यामिदं०॥३॥ या वा
मिंद्रावरुणा तेजस्या तनूस्तयेममंॅहसो मुंचतंॅ स्वाहा। इंद्रावरु
भ्या णा॰मंॅहोमुग्भ्यामिदं०॥४॥ यो वा मिंद्रावरुणावग्नौ स्नाम तं वा
मेतेनावयजे स्वाहा। इंद्रावरुणयोरग्नौ स्नामायेदं०॥५॥ यो वा मिं
द्रावरुणा द्विपात्सु पशुषु स्नाम तं वा मेतेनावयजे स्वाहा॥ इंद्रा
वरुणयोर्द्विपात्सु पशुषु स्नामायेदं०॥६॥ यो वा मिंद्रावरुणा च
तुष्पात्सु पशुषु स्नाम तं वा मेतेनावयजे स्वाहा॥ इंद्रावरुणयोश्च

नुष्यास्फपशुषुस्तामायेदं॰॥७॥योवामिंद्रावरुणागोष्ठेस्तामूर्त्तंवा
मेतेनावयजेस्वाहा॥इंद्रा॰गोष्ठेस्तामायेदं॰॥८॥योवा॰गृहेषुस्ता
मूर्त्तंवामेतेनावयजेस्वाहा॥इंद्रा॰गृहेषुस्तामायेदं॰॥९॥योवामिं
द्रावरुणाप्सुस्तामूर्त्तंवामेतेनावयजेस्वाहा॥इंद्रावरुणयोरप्सुस्ता
मायेदं॰॥१०॥योवामिंद्रावरुणौषधीषुस्तामूर्त्तंवामेतेनावयजेस्वा
हा॥इंद्रावरु॰रोषधीषुस्तामायेदं॰॥११॥योवामिंद्रावरुणावनस्प एम
तिषुस्तामूर्त्तंवामेतेनावयजेस्वाहा॥इंद्रावरु॰र्वनस्पतिषुस्तामाये ६०

दं॰॥१२॥पवमानःसुवर्जनःपवित्रेणविचर्षणिः॥यःपोतासपुना
तुमास्वाहा॥पवमानायेदं॰॥१॥पुनंतुमादेवजनाःपुनंतुमनवो
धिया।पुनंतुविश्वआयवःस्वाहा॥देवजनमनुविश्वायुभ्यइदं
॥२॥जातवेदःपवित्रवत्पवित्रेणपुनाहिमा॥शुक्रेणदेवदीद्यद
ग्नेक्रत्वाक्रतूंरनुस्वाहा॥जातवेदसेग्नयइदं॰॥३॥यत्तेपवित्र
मर्चिष्यग्नेविततमंतरा॥ब्रह्मतेनपुनीमहेस्वाहा॥अग्नयइदं॰
४॥उभाभ्यांदेवसवितःपवित्रेणसवेनच॥इदंब्रह्मपुनीमहेस्वा

हा। देवायसवित्रइदं०॥५॥ विश्वेदेवीपुनतीदेव्यागाद्यस्यैबह्वीस्त
न्वोवीतपृष्ठाः। तयामदंतःसधमाद्येषुवयंस्यामपतयोरयीणा
ंस्वाहा॥ वैश्वदेव्यैपुनन्त्याइदं०॥६॥ वैश्वानरोरश्मिभिर्मापुना
तुवातःप्राणेनेषिरोमयोभूः॥ द्यावापृथिवीपयसापयोभिर्ऋता
वरीयज्ञियेमापुनीतांस्वाहा। वैश्वानरायवातायेषिरायद्यावा
पृथिवीऋतावरीभ्यइदं०॥७॥ बृहद्भिःसवितस्तृभिर्वर्षिष्ठैर्देवम
न्मभिः॥ अग्नेदक्षैःपुनाहिमास्वाहा। सवित्रेग्नयइदं०॥८॥ येनदे

वाअपुनतयेनापोदिव्यंकशः। तेनदिव्येनब्रह्मणेदंब्रह्मपुनी
महेस्वाहा॥ ब्रह्मणइदं०॥९॥ यःपावमानीरध्येत्यृषिभिःसंभृत
ंरसं॥ सर्वंसपूतमश्नातिस्वदितंमातरिश्वनास्वाहा। पावमानी
भ्यइदं०॥१०॥ पावमानीर्योअध्येत्यृषिभिःसंभृतंरसं॥ तस्मैस
रस्वतीदुहेक्षीरंसर्पिर्मधूदकंस्वाहा॥ पावमानीभ्यइदं०॥११॥
पावमानीःस्वस्त्ययनीःसुदुघाहिपयस्वतीः॥ ऋषिभिःसंभृतो
रसोब्राह्मणेष्वमृतंहितंस्वाहा॥ पावमानीभ्यइदं०॥१२॥ पाव

६२ पावमानीर्दिशन्तु न इमं लोकमथो अमुं॥ कामान्समर्धयन्तु नो देवीर्देवैः स
माभृताः स्वाहा। पावमानीभ्य इदं॥३॥ पावमानीः स्वस्त्ययनीः
सुदुघा हि घृतश्चुतः॥ ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हि
तं स्वाहा। पावमानीभ्य इदं॥४॥ येन देवाः पवित्रेणात्मानं पुनते
सदा॥ तेन सहस्रधारेण पावमान्यः पुनन्तु मा स्वाहा। पावमानीभ्य
इदं॥५॥ प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयं॥ तेन ब्रह्मवि राम
दो वयं पूतं ब्रह्म पुनीमहे स्वाहा। ब्रह्मण इदं॥६॥ इन्द्रः सुनीती ६२

सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या॥ यमो राजा प्रमृणा
भिः पुनातु मा जातवेदा मोर्जयन्त्या पुनातु स्वाहा। इन्द्राय सुनी
त्या सहिताय सोमाय स्वस्त्या सहिताय वरुणाय समीच्या स
हिताय यमाय राज्ञे प्रमृणाभिः सहिताय जातवेदस ऊर्जयन्त्या
सहिताय इदं॥७॥ यद्दैवा देवहेडनं देवासश्चकृमा वयं। आदि
त्यास्तस्मान्मा मुंचतर्तस्यर्तेन मामुत स्वाहा॥ देवेभ्य आदित्ये
भ्य इदं॥८॥ देवा जीवनकाम्या यद्वाचानृतमूदिम॥ अग्निर्मा त

LIBRARY BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

आथा॰ स्मादेनसो गार्हपत्युः प्रमुंचतु दुरितायानि चकृम करोतु मामनेन गएहो॰
६३ सं॰ स्वाहा। अग्नये गार्हपत्याये दं॰॥१॥ ऋतेन द्यावापृथिवी ऋ
तेन त्वं सरस्वति ॥ कृतान्मामुंचतांहसो यदन्यकृतमारिम
स्वाहा। द्यावापृथिवीभ्यां सरस्वत्या इदं॰॥३॥ सजातशंसादु
त वा जामिशंसाज्ज्यायसः शंसादुत वा कनीयसः। अनाज्ञातं
देवकृतं यदेनस्तस्मात्वमस्माज्जातवेदो मुमुग्धि स्वाहा। जातवे ९भ
दस इदं॰॥४॥ यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां शि ६२

श्नैर्यदनृतं च कृमा वयं। अग्निर्मा तस्मादेनसो गार्हपत्युः॰ दुरिता
यानि च कृम करोतु मामनेनसं स्वाहा॥ अग्नये गार्हपत्याये दं॰।
५॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानः।
दूरेपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि स्वाहा॥ दूरे
पश्याराष्ट्रभृद्भ्यामप्सरोभ्यामिदं॰॥६॥ अदीव्यन्नृणं यदहं च
कार यद्वादास्यं संजगारा जनेभ्यः॥ अग्निर्मा तस्मादेनसो॰ स्वा
हा॥ अग्नये गार्हपत्यायेदं॰॥७॥ यन्मयि माता गर्भे सत्येनश्चकार

आधा यत्पिता ॥ अग्निर्मा॰ स्वाहा ॥८॥ यदापिपेष मातरं पितरं॰ स्वाहा । अग्न गए॰
६४ यइदं॰ ॥९॥ यदन्तरिक्षं॰ स्वाहा ॥ अग्नये गार्हपत्यायेदं॰ ॥१०॥ यदा
शसा निशसा यत्पराशसा॰ स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥११
अतिक्रामामि दुरितं यदेनो॰ स्वाहा ॥ अग्नय इदं॰ ॥१२॥ त्रिते देवा
अमृजतैतदेनः॰ स्वाहा ॥ अग्नये गार्हपत्यायेदं॰ ॥१३॥ दिविजाता
अप्सुजाता॰ स्वाहा ॥ अद्भ्यः ओषधीभ्य इदं॰ ॥१४॥ यदापीनकं दुरि एम
तं चरामि॰ स्वाहा ॥ अग्नो हिरण्यवर्णाभ्य इदं॰ ॥१५॥ इममे वरुण॰ ६४

---

१६ तत्वायामि॰ १७ त्वन्नो अग्ने॰ १८ सत्वन्नो अग्ने॰ १९ त्वमग्ने अया
स्यु॰ २०॥ वैश्वानरो न ऊत्या प्रयातु परावतः ॥ अग्निरुक्थेन वाहसा
स्वाहा । अग्नये वैश्वानरायेदं॰ ॥१॥ ऋतावानं वैश्वानरमृतस्य ज्यो
तिषस्पतिं ॥ अजस्रं घर्ममीमहे स्वाहा । अग्नये वैश्वानरायेदं॰ ॥
२॥ वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः । उ
भा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा स्वाहा ।
अग्नये वैश्वानरायेदं॰ ३॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो

६५ विश्वा ओषधीरा विवेश। वैश्वानरः सहसा पृष्ठो अग्निः सनो दिवास
रिषः पातुनक्तं स्वाहा॥ अग्नये वैश्वानरायेदं०४॥ त्वमग्ने शोचिषा
शोशुचान आरोदसी अपृणाजायमानः। त्वं देवां अभिशस्तेरमु
ञ्चो वैश्वानर जातवेदो महित्वा स्वाहा॥ अग्नये वैश्वा०५॥ जातो य
दग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा॥ वैश्वानर ब्रह्मणे वि
दं गातुं यूयं पात स्वस्तिभिः सदा नः स्वाहा॥ अग्नये वैश्वानरायेदं०॥ रम
॥६॥ अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यं। वयं ६५

जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः स्वाहा। अ
ग्नये वैश्वानरायेदं०॥७॥ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवना
नामभिश्रीः॥ इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण
स्वाहा॥ अग्नये वैश्वानरायेदं०॥८॥ भूः स्वाहा। अग्नय०। भुवः स्वा
हा। वायव इदं०॥ स्वः स्वाहा। सूर्यायेदं०॥ भूर्भुवः स्वः स्वाहा। प्र
जापतय इदं०॥ इत्युपहोमानाज्यात् स्रुवेण हुत्वा पूर्ववत्स्विष्टकृ
तादि होमशेषं समाप्य सोदित जलकलशमादाय चतुष्पथं गत्वा

गोमयेनोपलिप्य तत्र कलशं निधाय पत्न्या सह तत्र प्रतिबिंबित
मात्मानमवेक्ष्यमाणो जपति॥ ॥सिंहो मे मन्युर्व्याघ्रो मेन्तरामयो
वृको मे क्षुदश्वो मे घृष्टिर्ध्वनिर्मे पिपासाजगरो मे शानसर्पो मे नि
तंद्रिर्गर्दभो मे   रिणः शल्यको मे ह्रीरश्वत्थो मे पृथुः कूर्मो मे गणगो वे
बलो मे पसर्यो प्रियो मे मृत्युर्भ्रातृव्यो मे पाप्मा सपत्नो मे निर्ऋतिर्दु
ष्कीर्त्तौ मे वृद्धिः प्रस्वलितं मे समृद्धिः खड्गो मे आर्त्तिर्गवयो मे आधिर्गो - णम
रो मे बाधिर्यमृक्षो मे शोको गोधायां मे स्वेदो जरायां मे हिमः कृसरकु ६६

नौ मे भीरुता कङ्गो मे पापगंधो लूको मे श्वभ्रूराः क्रोकौ मे ईर्ष्या मर्क
टो मे दुर्हृद्धिः कुलले मे मृत्स्यो लले मे प्रध्याउष्ट्रो मे तृष्णाः शंखो मे भ्रमो
व्यां मे आव्यं कौशो मे गंधः कुमार्यां मे लंकारः सूकरो मे क्रादथुः पृदा
खुनि मे खुम्रो जगरो मे दुःस्वप्नो विघ्नति मे स्मयो लो भार्यायां मे क्लेदः शा
रभो मे पाप्मा लक्ष्मीः स्त्रीषु मे नृत्तम् जासु मे कर्कशो ब्राह्मणे मे ईर्ष्या
शूद्रे मे स्तेयं वैश्ये मे कार्मकृत्यं राजन्यबंधुनि मे ज्ञानं नैषादे मे ब्र
ह्महत्या कलिंगे मे क्षवथुः फलले मे विलासं गडिनि मे वमतिः किंपु

आधा॰
६७

हृषेमेरोदोह्नीपिनिमेनिष्टपह्नुत्तिनिमेकिलासःश्रुतिमेडुरित्र स्त्रा
वृन्येषुमेस्लेंक्लोविदेहेषुमेशीपुथोमद्वावृषेषुमेग्लोमूजवत्सुमेत
न्नाद्वुंदुभौमेकाशिकेक्ष्वाकुषुमेपुत्रंकलिंगेषुमेमूध्यमेश्वतं यां
मेप्रजस्ताप्तुंश्वल्यांमेडुश्चरित्रमाखुनिमेदंतरोगोमक्षिकायांमे
श्वल्कगाःश्रुकेमेहरिमामयूरेमेजल्प्याहकैमेजराचाषेमेपापवा
दोसुमेश्रुमोब्रुस्लोस्तेमेकिल्विषं॥अपेहिपाप्मनपुनरपुनाशिनो एम
भवानःपाप्मत्सुकृतस्यलोकेपाप्मन्धेद्यविहृतोयोनःपाप्मन्नजे ६७

हातितमुत्वाजहिमोवयमन्यत्रास्मिन्निविंशानाःसहस्राक्षोत्र
मर्त्यौपोनोद्वेष्टिसरिष्यतुयमुद्विष्मस्तमुजहि।अथैताआपो ज
लिनोपगृह्णाति॥सुमित्रानआपओषधयःसंतु॥नेऋत्यांनिरस्य
ति।दुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मइति।पात्रंपर
स्परंप्रतीनवेक्ष्यमाणोयथेतमेत्यहस्तौपादौचप्रक्षाल्याचामेत
एवंसंव त्सरायनर्तुमासपक्षसमाहस्त्रहेकाहंवासवनत्रयंकु
र्यात्॥समासोपायसेनब्राह्मणान्भोजयित्वागोहिरण्यादि दत्वाभ

आधा गवदर्पणं कुर्यादितिगणहोमप्रयोगः॥ ॥अथाधानकालः॥ । कालः
६८ आश्वलायनमते कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशा
खयोरुत्तरयोः प्रोष्ठपदयोर्वा॥ बौधायनमते पुनर्वसु चित्रास्वपि।आ
पस्तंबमते श्रवणमघानूराधेष्वपि॥ वसंते पर्वणि ब्राह्मण आदधी
त॥ ग्रीष्मे राजन्यः॥ शरदि वैश्यः॥ सर्वे वा सर्वेषु॥ अत्रोक्तऋतुनक्ष
त्रपर्वणां समुच्चितानामंगत्वमिति दैत्रातः॥ पर्वणो नक्षत्रस्यैवेति राम
सिद्धांतभाष्यवृत्तिकृन्नृसिंहाः॥ वसंतादयश्चांद्रमासद्वयात्मका इ ६८

व२

ति वृत्तिकृता। तत्र ऋतुमासानां सौरचांद्रात्मना द्वैविध्यात् वसंतादी
नामपि द्वैविध्यं॥ तत्रापि मीनमेषौ मेषवृषौ वा वसंत इत्यादि द्वैविध्या
त् फाल्गुनादिषु सवितुर्मीनराश्याद्यनुप्रवेशोपि कार्यः। रोहिण्याम
ग्निमादधीतेति बौधायनसूत्राच्चांद्रवैशाखमारोहिणीयुक्तमुख्य
तमः कालः। तद्युक्तपर्वांतरं मुख्यतरः॥ तद्युग्यजनीयतिथियोगो मु
ख्यः। तदभावे केवलरोहिणी वा। तस्याप्यभावे उक्तनक्षत्रयुक्तं
पर्व॥ तद्युक्तं यजनीयाहः। केवलनक्षत्रं वेत्याह॥ उदगयने पूर्वपक्षे

आधा कालः

६१ रोहिण्यादिष्विति देवः ॥ दक्षिणायनेपीति केशवः ॥ एवं योगोग्नि
त्रयाधाने संभवन्न संभवन्वाहवनीयाधान आवश्यकः । यथाह
शौनकः । वसंते कुर्व्यां रोहिण्यासंयोगे यजनीये वाहनि वह्नीना
दधीतोत्तमं वानोत्तममतिवर्त्तयीते ति ॥ उत्तममाहवनीयं ॥ वसि
ष्ठस्तु । आदधीतानलं विप्रो वसंतग्रीष्मयोरपि ॥ ग्रीष्मे वर्षास्वपि
क्ष्मापः शिशिरः सार्ववर्णिक इत्याह ॥ तथापि ॥ आदधीतानला एम
न्विप्रो नाषाढे मासि कर्हिचित् ॥ भाद्रे मासि न राजन्यो नाश्विने पूरु ६१

जः कचिदिति कात्यायनोक्तेराषाढादीन्परित्यज्य तत्र तत्र तैस्त
त्कर्त्तव्यं ॥ आपस्तंबीये तु माघादिपंचमासेषु त्रिवर्णाधानमिष्य
ते । केवले फाल्गुने वा स्यादारंभो वोत्र एयण इति । रेणुकारिकायां च
। माघादिपंचमासेषु श्रावणे चाश्विने तथा । मार्गशीर्षे शुक्लपक्षे आ
धानमथ कारयेदित्युक्तं । सोमपूर्वाधानं तु यस्मिन्कस्मिंश्चिहत्तौ
भवतीत्याहाश्वलायनः ॥ आर्त्तोतिवेलं श्रद्धालुर्वा नर्त्तुं पृच्छेन्न नक्ष न
त्रमित्यपि सः । यदहरेवैनं श्रद्धोपनमेत् तथादधीतेति श्रुतेः ॥ आ

७०

ग्न्याधानस्यसद्यस्कालतायुक्ताकर्मांते।अथातीयान्यग्न्याधेयानि
च्यारभ्यास्यामोविपक्षेआपूर्यमाणपक्षआदधानोयावानवका
शःस्यात्तदहर्विदधीतपौर्णमास्यांसद्यस्कालमित्यादिना।जाया
मवाप्यदर्शमेहनीतिद्वैधादपिनक्षत्रादिनियमःसर्वाधानेषु।इदंच
पितर्यग्रजेचाहिताग्नावेव॥अग्रजेविदेशस्थेतदाज्ञया धिका दे
रंसिध्यति॥नपितुः॥कामयुक्तान्यप्यग्न्याधेयान्युक्तानिकर्मांते॥ एम
कामयुक्तान्यग्न्याधेयानिभवंतिकृत्तिकास्वग्निमादधीतेत्यादि ७०

ना।एतेषामपिसद्यस्कालत्वं॥अत्रगुरुशुक्रबाल्यवार्धिकका
लावर्ज्यौः।मलमासश्च।विशेषोगुरुग्रंथेबोध्यः॥ ॥अथविहा
रः॥ ॥प्रागुदक्प्रवणंसमचतुरस्रंदीर्घचतुरस्रंवाप्राक्दक्षिणा
भ्यांद्वाभ्यांयुक्तंधूमनिर्गमक्षमगवाक्षोपशोभितमगारंपरिक
ल्प्यतत्रगणपतिंसंपूज्यसूत्रेविश्वकर्माणंचपूजयित्वाथमध्य
चिन्हायप्रागायतांपृष्ठ्यापरपर्यायांरज्जुंधृत्वासप्तविंशत्यंगुल
विष्कंभगार्हपत्यायतनंकर्तुंसार्धत्रयोदशांगुलमितयारज्ज्वात्र

७१ मणं कृत्वा वृत्तमवनमयेत्। गार्हपत्यमध्य शंकोः पुरस्तात् द्वादशप
देऽएकादशपदेऽष्टापदे वाहवनीयमध्यशंकुः। अष्टासु प्रक्रमेषु
ब्राह्मणोऽग्नीनादधीत एकादशसु राजन्यो द्वादशसु वैश्य इति श्रु
त्वे। तावन्मितां तां उभयतः पाशां रज्जुं पंचधा षोढा वा संभुज्य ष
ष्ठे सप्तमे वा गंतुकं भागं संयोज्य तामुभयतः पाशां पुनः पंचधा कृ
त्वा परां तात् भागद्वयमतीत्य तत्र चिह्नं कृत्वा गार्हपत्याहवनी एम
यमध्यशंक्वोः पाशौ प्रतिमुच्य कृतचिह्नेन दक्षिणाकृष्य तत्र शंकुं ७२

निहन्यात्। एवमेवार्जवायोत्तरतोऽपरं निहन्यात्। रज्जुं विपर्यस्यो
त्तरत आकृष्य लक्षणे शंकुं निहन्यात् स उत्करदेशो भवति। दक्षि
णशंकोः फदग्देशे द्वादशतिलाधिकमंगुलद्वयमपहाय शंकुं नि
हन्यात्। उभयतः पाशां तिलद्वयाधिकां पदप्रमितां रज्जुं कृत्वा शं
कौ पाशं प्रतिमुच्यापरेण मंडलं विलिखेत्॥ मंडलोत्तर रेखायां
मध्यशंकोरार्जवेन शंकुं निहत्य तस्मिन्पाशं प्रतिमुच्यापरं
मंडलं निर्माय मंडलयोः संधी नियम्य उत्तरं पार्श्वमपहाय दक्षि

आधा॰ विहारः

७२ पापार्श्वे दक्षिणाग्न्यायतनं कुर्यात्। आहवनीयायतनं कर्तुं तन्म
ध्यशंकोः पश्चात्पुरस्ताच्च प्रादेशे शंकुं निहत्योभयतः पाशामर
त्निद्वयमितां रज्जुं कृत्वा तस्याः द्वादशांगुले ष्टादशांगुले च चिह्नं
कृत्वा पाशौ पूर्वापरशंक्वोः प्रतिमुच्याष्टादशांगुलचिन्हं दक्षिण
तउत्तरतश्चाकृष्य द्वादशांगुलचिन्हे शंकुं निहन्यात्॥ व्यत्य
स्य पाशावपरत्र तथैव निहन्यात्। तच्चतुरस्रमाहवनीयायतनं। राम
एवं त्रीण्यप्यायतनानि भवंति॥ ॥अथ वेदिः॥ ॥आहवनी ७२

याप रशंकोः पश्चात्षण्णवत्यंगुले शंकुं निहत्य तावन्मितामुभय
तः पाशां रज्जुमध्यर्द्धां कृत्वा प्रमाणांते प्राच्यर्थं चत्वारिंशदंगुलेन्यं
छनार्थं द्वात्रिंशदंगुले श्रोण्यर्थं चतुर्विंशत्यंगुले अंसार्थमेवं चिन्हा
नि कृत्वा शंक्वोः पाशौ प्रतिमुच्यान्यं छनं दक्षिणतश्चोत्तरतश्चाकृष्य
श्रोण्यंसान्कुर्यात्॥ ॥अथ सन्नमनं॥ तां पार्श्वमानीं द्वादशधा कृ
त्वा त्रयोदशेन वर्धयित्वा श्रोण्यंसयोरुदक् त्रयोदशे शंकुं निह
त्य तयोः शंक्वोः पाशौ प्रतिमुच्य श्रोण्यंसशंक्वोरंतरालमधिरज्जुप

७३ रिलिखेत्।एवंदक्षिणतःश्रोण्यंसयोःकोर्दक्षिणतस्त्रयोदशाद्ध्याप
रिलिखेत्॥एवंपूर्वोत्तरतः॥एतत्सप्तमतं॥कुंडानिद्वादशांगुलो
त्सेधानि।तत्तदायतनाकाराणिकार्याणि।तेषुमेखलाः॥प्रथमाः
षडंगुलोत्सेधास्तदायामाः।द्वितीयाःषडंगुलोत्सेधाश्चतुरंगुला
यामाःकार्याः॥वेदिःषडंगुलोत्सेधा।तस्यामाद्यमेखलाचतुरंगु
लोत्सेधायामा।द्वितीयाद्व्यंगुलोत्सेधायामेतिविहारः॥ ॥अथ एम
पात्राणि॥ ॥ध्रुवाग्निहोत्रहवण्यौवैकंकत्याव ग्निहोत्रहवणी ७३

पर्णमयीवा॥जुहूःपर्णमयी।उपभृदाश्वत्थीधृष्टिर्मेक्षणंच।स्रुवः
खादिरः॥स्फ्यशम्याप्राशित्रपात्रमुसलानिच॥इडादारुपात्र्यावा
श्वत्थ्यौचमसौनैय्यग्रोधऔदुंबरोवा॥कपालानिमृन्मयानिका
र्याणिएतदाकृतिपरिमाणानितु॥स्रुचो हस्त्योष्ठहंसमुख वाय
सपुच्छान्यतमासेचनाःबाहुमात्राअ रत्निमात्राःप्रादेशमात्रावा।
त्वक्कआसनाअग्रासेचनामूलदंडाश्चकार्या॥तत्रप्रादेशारत्निमा
त्रासुदंडआयामार्धेनबिलंहस्त्योष्ठाअष्टांगुलं॥हंसमुख्यावाय

७४ स्रुच्छिकायाश्च बिलं पंचांगुलं त्र्यंगुलं वा कार्यं। अग्रं तु यथाप्रमाण
बिलावशिष्टं भवति। बाहुमात्रा स्रुत्तु बिलाग्रयोस्तादवसस्थ्याहं
डस्यैवाभिवृद्धिः॥ यथाशोभं वा सर्वाणि बिलानि कार्याणि॥ स्रुवोर
त्निमात्रोंगुष्ठपर्वमात्रवृद्धिबिलोवशिष्टदंडः॥ धृष्टिमिक्षणोप्यरत्निमा ष्टि
त्रो। चतुरंगुळविस्तृता ग्रे। उलूखलं द्वादशांगुलायामं तदर्धविस्ता
रं॥ अरत्निमात्रं तदर्धविस्तारं वा॥ अरत्निद्वयविस्तारमरत्न्यायामं एम
वा॥ तत्त्रिगुणायामो मुसलः॥ प्राशित्रं प्रादेशमात्रं चतुरंगुलदंडं ७४

गोकर्णाकृति। स्फ्यः खड्गाकारः चतुरंगुलविस्तारोरत्निमात्रः। चमसः
प्रादेशमात्रश्चतुरंगुलदंडोष्टांगुलचतुरस्रबिलः। शम्याषड्विंशांगु
लाष्टांगुलकं वा शोपदंडा। इडादारुपात्रे अप्यरत्निमात्रे चतुरंगुल
दंडे अंगुलाधिकाश्वपदमात्रविस्तारेऽवशिष्टायामे। कपालानि द्व्यंगु
लायामोत्सेधानि। मध्यमानि समचतुरस्राणि। कोणस्थानि वक्रत्रि
ग कोणानि। यथायोग्यान्यानि पात्राणि भवंति॥ ॥इतिपात्राणि॥ अ
थारण्याहरणविधिः॥ आधानात्पूर्वं॥ ॥हेमंते वा शरत्काले शुक्ल

आधा ७५ पक्षे शुभे दिने। नांदीश्राद्धं पतिः कुर्यात्कृत्वा पुण्याहवाचनं॥१॥ प्राची
दिशमुदीचीं वा कांचिद्ग्रामतो बहिः॥ अध्वर्युसहितो गत्वा शुक्ल
स्रग्वस्त्रभूषणः॥२॥ सूनः श्वेतां कराश्वत्थादाहरेदरणीद्वयं॥ स च
शम्यासंसक्तमूलो वा शमीछायागतोपि वा॥ शमीकोटरगो वापि श
मीगर्भो निगद्यते॥ तस्माद्वाप्यशमीगर्भाच्चतुरंगुलमुन्नतां॥ द्वाद
शांगुलविस्तारां षोडशांगुलमायतां॥ यद्वा प्रादेशसंमानामष्टितश्च रामः
तुरंगुलां॥ चतुरंगुलमुत्सेधां शाखां विनिपातयेत्॥ विदारित्ता ७५

यां निष्पन्ने तस्या नाम धरोत्तरे॥ अरणी नियते यद्वाप्युदक्शाखाग
तेपि ते। अरणी कृमिदष्टा चेत्साभवेत्पुत्रहानिदा। जायाहंत्री ग्रंथि
युक्ता दुःखानिःशाटिता भवेत्॥ सुषिरेण समायुक्ता यजमानविना
शिनी॥ अरण्याहरणं साकं सर्वे यज्ञियकेतुभिः॥ अध्वर्युणा यो अ
श्वत्थः शमीगर्भ आरुरोह त्वे सचा॥ तं ते हरामि ब्रह्मणा यज्ञियैः
केतुभिः सहेत्यरण्याहरणे क्रियमाणे॥ आश्वलायनो यजमानः।
यो अश्वत्थः०॥ तं त्वेत्याहरेत्॥ अथ संभाराः॥ ॥सिकताः॥१॥ऊषाः

आध० ७६

२॥ आखूत्करः॥३॥ वल्मीकवपाः॥४॥ सूदं॥५॥ वराहविहतं॥६॥ पु
ष्करपर्णं॥७॥ शर्कराश्चेत्यष्टौ॥८॥ पार्थिवीः॥ अश्वत्थः॥१॥ उदुंबरः॥
२॥ पर्ण३ शमी४ विकंकतः५॥ अशनिहतः॥६॥ सूर्वोक्तारणी॥७॥ मुं
जकुलायं॥८॥ तिस्रस्त्रिवृत्रियाश्वत्थसमिधः॥१०॥ त्रीणि सौवर्णश
कलानि त्रीणि राजतानीति षट्॥९॥ अश्वः॥११॥ ब्राह्मौदनिका व्रीह
यः॥१२॥ तिलमाषयवप्रियंगुव्रीहिगोधूमकुलित्थाः सप्त ग्राम्याः॥ श्यामा एम
कनीवारगवेधुकजर्तिल गार्मुतकुरुविंदवेणुयवाः सप्तार ७६

ण्याः सर्वौषधमिति॥ कल्माषोऽजः अविकमंडलुर्वा। वासिष्ठो ब्रह्मा
वैश्वामित्रो होता आंगिरसोऽध्वर्युर्यास्य उद्गाता आग्नीध्रश्च अत्रिः
यतगोत्रा वा देवतादिसंपन्ना विनोज्ञातारं चतुरो वा ऋत्विजः॥ तावंतो
विष्टराः पाद्यार्घ्याचमनीयमधुपर्कपात्राणि दधिमधुनी वस्त्रयज्ञोप
वीतादि गोपि दृयज्ञीयवासांसि क्षौमे समित्कुशं त्रयः शरावाश्च षडु
दकुंभाश्च क्षत्रियकर्तृकत्वे एकोनपंचाशदक्षान्बैभीतकांश्च एकोप
बर्हणे औदुंबरीदर्वी इति स्रवास्तिस्रोऽश्वत्थादिसमिधः॥ दूर्वा उष्णगंधफ

आधा· ७७ लानिस्युस्तेयवाश्वेति॥सिकताःसूक्ष्मवालुकाः॥ऊषाःऊखरमृत्तिकाः॥
आखूत्कराःनवमूषकबिल मृत्तिकाः॥वल्मीकवदनमृत्तिकाः॥सूद
ऽदमृत्॥कुलीरबिलस्थावा॥वराहविहतंवनवराहदंष्ट्रोत्खातं॥
पुष्करपत्रं॥पद्मिनीपत्रं॥मुंजकुलायं॥मुंजतृणनिर्मितपक्षिनीडं॥मुंज
पुष्पंवा॥जीर्णपर्णंवा॥चित्रियोग्रामादिचिन्हभूतःप्रसिद्धोवाश्वत्थः
॥ ॥आधानात्पूर्वेद्युःरात्रौपुण्याहंवाचयित्वाश्वोभूतेपरेऽह्निनांदी राम
मुखंकुर्यात्॥तत्रदक्षक्रतूविश्वेदेवौ॥ततोरात्रावुदकशांतिप्रतिस ७७

रबंधौकुर्यात्॥गोमयेनगोचर्ममात्रंचतुरस्रंस्थंडिलमुपलिप्य॥तत्र
युग्मान्ब्राह्मणान्प्रक्षालितपाणिपादान्प्राचमय्यप्रतिदिङ्मास
नेषूपवेश्यपश्चात्प्राङ्मुखमाचार्यंचतस्यदक्षिणतोयजमानोदर्भे
ष्वासीनोदर्भान्धारयमाणःपवित्रपाणिःपत्न्यासहप्राङ्मुखःप्राणानाय
म्यतिथ्यादिसंकीर्त्यकरिष्यमाणाधानांगभूतावुदकशांतिप्रतिस
३ रबंधौतंत्रेणकरिष्येइतिसंकल्प्यानयोरुदकशांतिप्रतिसरबंधयोः
आचार्यंत्वाऽन्यांश्चजपकर्तृत्वेनवृणुयात्॥ततआचार्यःभस्मके

७८ आघयुक्तानाऽईपंचत्रस्लसिकतामयंचतुरंगुलंप्राचीनमुच्छ्रितंपंचां
गुलंपश्चिमतऊर्ध्वांगुलिविशेषंदक्षिणतऊर्ध्वांगुलिविहीनंउत्तरतोह
स्तमात्रंचतुरस्रंस्थंडिलंकुर्यात्॥तदद्भिरभ्युक्ष्ये त॥ततःसुवर्णरजतता
म्रशकलेनव्रीहिभिर्यवैर्दर्भैर्वांगुष्ठोपकनिष्ठिभ्यांचोपसंगृह्यस्थंडि
लमध्यतःप्राचीनंसंततंप्रादेशमात्रं।ब्रह्मजज्ञानंप्रथमंपुरस्तादिति सी
मतःसुरुचोवेनआवः॥सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमस राम
तश्चविवः इतिउल्लिखेत्॥तद्दक्षिणतःतथैवनाकेसुपर्णमुपयत्पतं ७८

तं हृदावेनंतोअभ्यचक्षतत्वा॥हिरण्यपक्षंवरुणस्यदूतंयमस्य
योनौशकुनंभुरण्यु॥इत्युल्लिखेत्॥तथैव॥आप्यायस्वसमेतुतेवि
श्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे इति पूर्वस्याउत्तरतउल्लिखेत्।
ततःस्थंडिलमध्येदक्षिणमारभ्योत्तरपर्यंतंउदगपवर्गंपूर्ववत्।यो
रुद्रोअग्नौ योअप्सुयओषधीषुयोरुद्रोविश्वाभुवनाविवेशतस्मै
रुद्रायनमोअस्तु॥इत्युल्लिखेत्॥तस्याःपश्चिमतःदक्षिणामूलमार
भ्योत्तरमूलपर्यंतंपूर्ववत्॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमू

ढमस्यपांसुरे॥ इत्युल्लिखेत्॥ मध्यमायाःपूर्वतःदक्षिणांत मारभ्यो
त्तरांतपर्यंतं॥ इंदुंविश्वाअवीवृधंत्समुद्रव्यचसंगिरः॥ रथीतमंरथी
नांवाजानांसत्पतिंपतिं॥ इतिपूर्ववदुल्लिखेत्॥ ततउल्लेखनसाध
नंस्थंडिलेनिधायदेवस्यत्वेत्यादायभूर्भुवःसुवरितिस्थंडिलादुत्तर
तोनिरस्यापउपस्पृश्याद्भिरभ्युक्ष्यस्थंडिलादुत्तरतःप्रागग्रान्दर्भाना
स्तीर्यतेषुप्रोक्षणींआलेयनंदुलाकंसंस्थापयेत्॥ सफलान्शुभान् एम
नवांतुमयंसूत्रंगंधाढ्यंतत्रनिक्षिपेत्॥ सूत्रवेष्टितमुदकुंभंचसाद ७९

यित्वादर्भैःप्रच्छाद्यपवित्रंकृत्वाप्रोक्षणीमुत्तानांकृत्वातस्यामुदगग्रं
पवित्रंनिधायोदकमासिच्यतूष्णींत्रिरुत्पूयप्रोक्षणींपवित्रेणप्रोक्ष्यो
दकुंभमुत्तानंकृत्वापवित्रेणप्रोक्ष्यधूपयित्वास्थंडिलंदूर्वादर्भैःप्रा
गग्रैरवकीर्यगंधोदकेनाभ्युक्ष्यफलपुष्पैरवकीर्यस्थंडिलमध्यप्र
मो।ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः।सबुध्नि
याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ इतिउदकुंभंनिधा
यस्थंडिलंपरिस्तरेत्।देवस्यत्वा॰भ्यांपरिस्तृणामीतिअच्छिन्नाग्रैरवि

८०
वर्णैर्दग्धमूलैरुदगग्रैःषोडशपरिमितैर्दर्भैःपुरस्तात्।दक्षिणतोभू
र्भुवःस्वरितिसप्तदशपरिमितैःप्रागग्रैः।उदगग्रैरष्टादशपरिमितैः
उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं॥देवंदेवत्रासूर्यमगन्मज्योति
रुत्तममितिपश्चात्॥उदकप्रागग्रैःसप्तदश परिमितैः॥अग्नआ
याहिवीतयेगृणानोहव्यदातये।निहोतासत्सिबर्हिषि।इतिपरि
स्तीर्यत्तिरःपवित्रमपआनयज्जपति॥तत्सवितुर्वरेण्यमिति॥ततःकुं राम
भेयवाक्षततंडुलानावपति।भूर्भुवःस्वरोमिति।अथउदकुंभस्यस ८०

मंतात्पुष्पैर्दूर्वाफलैश्चावकीर्यगंधपुष्पधूपदीपैःकुंभंपूजयित्वादू
र्वादर्भैःतंप्रच्छाद्यशन्नोदेवीरभिष्टयआपोभवंतुपीतये॥शंयोरभि
स्रवंतुनः॥इत्यभिमृशति॥कुंभस्योत्तरतःशालितंडुलोपरिगंधानु
लिप्तंप्रतिसरसूत्रंनिधायाचार्यमुखाःत्रीन्प्राणायामान्धारयित्वा
तैःसहोदकुंभमन्वारभ्यव्याहृतिपूर्वांसावित्रींपच्छोर्धर्चशःसर्वाम
नवानमुक्त्वावेदादीन्जपति॥अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्वि
जं॥होतारं रत्नधातमं॥इषेत्वोर्जेत्वावायवस्थोपायवस्थ॥अग्नआ

८२ याहि वीतये गृणानो हव्यदातये॥ नि होता सत्सि बर्हिषि। शन्नो देवी
रभिष्टय आपो भवन्तु पीतये। शंयोरभि स्रवन्तु नः॥ अथ रक्षोघ्नम
न्त्रवाकं जपति। कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ
इभेन॥ तृष्वीमनु प्रसितिं द्रूणानो स्तासि विध्य रक्षसस्तपिष्ठैः। तव
भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः॥ तपूंष्यग्ने जु
ह्वा पतंगानसंदितो विसृज विष्वगुल्काः॥ प्रति स्पशो विसृज तूर्णि राम
तमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरे अघशंसो यो अन्त्य ८२

ग्ने माकिष्टे व्यथिरादधर्षीत्। उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्रां ओ
षतात्तिग्महेते॥ यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं
न शुष्कं। ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अ
व स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्॥ स ते जा
नाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्॥ विश्वान्यस्मै सुदिना
नि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत्॥ सेदग्ने अस्तु सुभगः सुदानु
र्यस्त्वा नित्येन हविषा य उक्थैः॥ पिप्रीषति स्व आयुषि दुरोणे विश्वे

दस्मै सुदिना सासदिष्टिः। अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता
जरतामियं गीः॥ स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु
द्यून्। इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून्॥ क्री
डंतस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानां॥ यस्त्वा स्व
श्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन॥ तस्य त्राता भवसि तस्य स
खा यस्त आतिथ्यमानुषग्जुजोषत्। महो रुजामि बंधुता वचोभि
स्तन्मा पितुर्गोतमादन्वियाय। त्वं नो अस्य वचसश्चिकिद्धि होत ८२

र्यविष्ठ सुक्रतो दमूनाः। अस्वप्नजस्तरणयः सुशेवाऽअतंद्रासो
वृकाऽअश्रमिष्ठाः। ते पायवः सध्र्यंचो निषद्याग्ने तव नः पांत्वमू
र। ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन्। ररक्ष
तान्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः। त्वया वयं स
धन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान्। उभा शंसा सूदय सत्य
ताते नुष्ठुया कृणुह्यह्रयाण। अया ते अग्ने समिधा विधेम प्रति स्तो
मं शस्यमानं गृभाय॥ दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्र

३८०
८३ मह्वो अवयात॥ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपया
मि शर्म। शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु न
क्तं। वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा। प्रा
देवीर्मायाः सहते दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे। उत स्वानासो
दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ। इंद्रं वो विश्वतस्परि हवा
महे जनेभ्यः। अस्माकमस्तु केवलः। इंद्रं नरो नेमधिता हवंते यत्पा एम
र्या युनजंते धियस्ताः। शूरो नृषाता शवसश्चकान आ गोमति व्रजे भ ८३

जा त्वं नः। इंद्रियाणि शतक्रतो या ते जनेषु पंचसु। इंद्र तानि त आ वृ
णे। अनु ते दायि मह इंद्रियाय सत्रा ते विश्वमनु वृत्रहत्ये। अनु क्षत्र
मनु सहो यजत्रेंद्र देवेभिरनु ते नृषह्ये॥ आ यस्मिन्त्सप्त वासवास्तिष्ठं
ति स्वारुहो यथा॥ ऋषिर्ह दीर्घश्रुत्तम इंद्रस्य घर्मो अतिथिः। आमा
सु पक्वमैरय आ सूर्यं रोहयो दिवि॥ घर्मं न सामं तपता सुवृक्तिभिर्जु
ष्टं गिर्वणसे गिरः॥ इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः॥ ब्रह्मा
णस्त्वा शतक्रतवुद्वंशमिव येमिरे॥ अंहोमुचे प्र भरेमा मनीषामोषि
+ इंद्रं वाणीरनूषत। गायंति त्वा गायत्रिणोर्चंत्यर्कमर्किणः॥ २

उ·
८४ ष्वदाव्नेसुमतिंगृणानाः॥इदमिंद्रप्रतिहव्यंगृभायसत्याःसंतुयजमा
नस्यकामाः।विवेषयन्माधिषणाजजानस्तवैपुरापार्यादिंद्रमह्नः।अं
हसोयत्रपीपरद्यथानोनावेवयांतमुभयेहवंते॥प्रसम्राजंप्रथमम
ध्वराणामंहोमुचंवृषभंयज्ञियानां॥अपांनपातमश्विनाहयंतम
स्मिन्नरइंद्रियंधत्तमोजः॥विनइंद्रमृधोजहिनीचायच्छपृतन्यतः॥
अधस्पदंतमींकृधियोअस्माँअभिदासति॥इंद्रक्षत्रमभिवाममो एम
जोजायथावृषभचर्षणीनां॥अपानुदोजनममित्रयंतमुरुंदेवे ८४

भ्योअकृणोरुलोकं।मृगोनभीमःकुचरोगिरिष्ठाःपरावतआजगामा
परस्याः।सृकंसंशायपविमिंद्रतिग्मंविशत्रूंताढिविमृधोनुदस्व।
विशत्रून्विमृधोनुदविवृत्रस्यहनूरुज॥विमन्युमिंद्रभामितोमित्र
स्याभिदासतः॥त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिं
द्रं।ह्वयेनुशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः॥मातेअ
स्यांसहसावन्परिष्टावघायभूमहरिवःपरादै॥त्रायस्वनोवृकेभि
र्वरूथैस्तवप्रियासःसूरिषुस्याम॥अनवस्तेरथमश्वायतक्षंत्वष्टाव

उदक ज्योँतिरुहन्तधुमंतं ॥ ब्रह्माणइंद्रंमहयंतोअर्कैरवर्धयन्नहयेहंतवा
८५ उ ॥ वृहत्येयज्ञेवृषणोअर्कमर्च्चानिंद्रग्रावाणोअदितिःसजोषाः । अनु
श्वासोयेपवयोरथाइंद्रेषिताअभ्यवर्त्तंतदस्यून ॥ यत्तइंद्रभयामहे
ततोनोअभयंकृधि ॥ मघवंछग्धितवतन्नऊतयेविद्विषोविमृधो
जहि ॥ स्वस्तिदाविशास्पतिर्वृत्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनः
स्वस्तिदाअभयंकरः ॥ सुत्राऽइंद्रोवज्रबाहुःषोडशीशर्मयछतु ॥ एम
स्वस्तिनोमघवाकरोतुहंतुपाप्मानंयोस्मान्द्वेष्टि ॥ सजोषाइंद्रसग ८५

णोमरुद्भिःसोमंपिबवृत्रहंछूरविद्वान ॥ जहिशत्रूंरपमृधोनुद
स्वाथाभयंकृणुहिविश्वतोनः ॥ येदेवाःपुरःसदोग्निनेत्रारक्षोहण
स्तेनःपांतुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहा ॥ येदेवादक्षिणसदो
यमनेत्रारक्षोहणस्तेनःपांतुतेनोवंतुतेभ्योनमस्तेभ्यस्वाहा ॥ येदेवाः
पश्चात्सदःसवितृनेत्रारक्षोहणस्तेनःपांतुतेनोवंतुतेभ्योनमस्तेभ्य
स्वाहा ॥ येदेवाउत्तरसदोवरुणनेत्रारक्षोहणस्तेनःपांतुतेनोवंतु
तेभ्योनमस्तेभ्यस्वाहा ॥ येदेवाउपरिषदोबृहस्पतिनेत्रारक्षोहण

उदक॰ स्तेनः पांतु ते नो ऽवंतु तेभ्यो नमस्तेभ्यु स्वाहा॥५॥ अग्नये रक्षोघ्ने स्वाहा।
८६ यमाय रक्षोघ्ने स्वाहा॥ सवित्रे रक्षोघ्ने स्वाहा॥ वरुणाय रक्षोघ्ने स्वाहा।
बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा॥५॥ अग्निरायुष्मान्स वनस्पति
भिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि॥ सोम आयुष्मान्स ओषधी
भिरायुष्मांस्तेन त्वा०॥ यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तेन त्वा०
ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वा०॥ देवा आयुष्मंतस्तेऽमृतेनायु एम
ष्मंतस्तेन त्वायुषायुष्मंतं करोमि॥५॥ यावामिंद्रावरुणा यतव्या त ८६

नूस्तयेममंहसो मुंचतं॥ यावामिंद्रावरुणा सहस्या तनूस्तयेममं
हसो मुंचतं॥ यावामिंद्रावरुणा रक्षस्या तनूस्तयेममंहसो मुंचतं।
यावामिंद्रावरुणा तेजस्या तनूस्तयेममंहसो मुंचतं॥४॥ यो वामिंद्रा
वरुणावग्नौ स्रामस्तं वामेतेनावयजे॥ यो वामिंद्रावरुणा द्विपात्सु प
शुषु स्रामस्तं वामेतेनावयजे॥ यो वामिंद्रावरुणा चतुष्पात्सु पशुषु
स्रामस्तं वामेतेनावयजे॥ यो वामिंद्रावरुणा गोष्ठे स्रामस्तं वामेतेना
वयजे॥ यो वामिंद्रावरुणा गृहेषु स्रामस्तं वामेतेनावयजे॥ यो वामिं

उदक°
८१ द्रावरुणा   प्सुस्रामस्तंवामेतेनावयजे॥योवामिंद्रावरुणौष
धीषुस्रामस्तंवामेतेनावयजे॥योवामिंद्रावरुणावनस्पतिषुस्राम
स्तंवामेतेनावयजे॥८॥अग्नेयशस्विन्यशसेममर्पयेंद्रावतीमपचि
तीमिहावह॥अयंमूर्द्धापरमेष्ठीसुवर्चाःसमानानामुत्तमश्लोकोअ
स्तु॥भद्रंपश्यंतउपसेदुरग्रेतपोदीक्षामृषयःसुवर्विदः॥ततःक्षत्रं
बलमोजश्चजातंतदस्मैदेवाअभिसन्नमंतु॥धाताविधातापर राम
मोतसंदृक्प्रजापतिःपरमेष्ठीविराजा॥स्तोमाश्छंदांसिनिविदोम ८१

आहुरेतस्मैराष्ट्रमभिसन्नमाम।अभ्यावर्तध्वमुपमेतसाकमयं
शास्ताधिपतिर्वोऽअस्तु॥अस्यविज्ञानमनुसंरभध्वमिमंपश्चादनु
जीवाथसर्वे॥ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसऊर्जो
नामसइदंब्रह्मक्षत्रंपातुताइदंब्रह्मक्षत्रंपांतुतस्मैस्वाहाताभ्यःस्वा
हा॥संहितोविश्वसामासूर्योगंधर्वस्तस्यमरीचयोप्सरसआयुवःसु
षुम्नःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोबेकुरयोभुज्युः
सुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसस्तवाःप्रजापतिर्विश्वकर्मा

उ० ८८

मनो गंधर्वस्तस्य ऋक्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गं
धर्वस्तस्यापो अप्सरसो मुदा भुवनस्य पते यस्य त उपरि गृहा इह च॥ स
नो रास्व ज्यानिं रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्तिं॥ परमेष्ठ्य
धिपतिर्मृत्युर्गंधर्वस्तस्य विश्वमप्सरसो भुवः सुक्षितिः सुभूतिर्भद्रकृ
त्स्वर्वान्पर्जन्यो गंधर्वस्तस्य विद्युतो अप्सरसो रुचो दूरेहेतिरमृडयो मृ
त्युर्गंधर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो गंध राम
र्वस्ताधयो अप्सरसः शोचयंतीर्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म ८८

क्षत्रं पांतु तस्मै स्वाहा ताभ्यः स्वाहा॥ स नो भुवनस्य पते यस्य त उपरि
गृहा इह च॥ उरु ब्रह्मणे अस्मै क्षत्राय महि शर्म यच्छ॥ नमो अस्तु स
र्पेभ्यो ये के च पृथिवीमनु॥ ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥
ये दो रोचने दिवो ये वा सूर्यस्य रश्मिषु॥ येषामप्सु सदः कृतं तेभ्यः
सर्पेभ्यो नमः॥ या इषवो यातुधानानां ये वा वनस्पतीँरनु॥ ये वाव
टेषु शेरते तेभ्यः सर्पेभ्यो नमः॥ ॥ अयं पुरो हरिकेशः सूर्यरश्मि
स्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुंजिकस्थला च कृत

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

उ० ८९ स्थलाचाप्सरसौयातुधानाहेतीरक्षाꣳसिप्रहेतिस्तेभ्योनमस्तेनोमृड
यंतुतेयंद्विष्मोयश्चनोद्वेष्टितंवोजंभेदधामि॥अयंदक्षिणाविश्वकर्
मातस्यरथस्वनश्चरथेचित्रश्चसेनानिग्रामण्यौमेनकाचसहजन्या
चाप्सरसौदंक्ष्णवःपशवोहेतिःपौरुषेयोवधःप्रहेतिस्तेभ्योनमः०।
अयंपश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेनानिग्रामण्यौ
प्रम्लोचंतीचानुम्लोचंतीचाप्सरसौसर्पाहेतिर्व्याघ्राःप्रहेतिस्तेभ्योन यम
मः०॥अयमुत्तरात्संयद्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानिग्रामण्यौ ८९

विश्वाचीचघृताचीचाप्सरसावापोहेतिर्वातःप्रहेतिस्तेभ्यो०अय
मुपर्यर्वाग्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानिग्रामण्यावुर्व
शीचपूर्वचित्तिश्चाप्सरसौविद्युद्धेतिरवस्फूर्जन्प्रहेतिस्तेभ्योनम
०॥५॥आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां
।संक्रंदनोनिमिषएकवीरःशतंसेनाअजयत्साकमिंद्रः॥संक्रंद
नेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥तदिंद्रेणज
यततत्सहध्वंयुधोनरइषुहस्तेनवृष्णा॥सइषुहस्तैःसनिषंगिभिर्व

उ० ९० श्रीसंꣳस्रष्टासयुधइंद्रोगणेन॥संꣳसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्व
धन्वाप्रतिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेनरक्षोहामित्राꣳ
अपबाधमानः॥प्रभंजन्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यविता
रथानां॥गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥
इमꣳसजाताअनुवीरयध्वमिंद्रꣳसखायोअनुसꣳरभध्वं॥बलविज्ञा
यःस्थविरःप्रवीरःसहस्वान्वाजीसहमानउग्रः॥अभिवीरोअभिस एम
त्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्॥अभिगोत्राणिसहसागा ९०

हमानोदयोवीरःशतमन्युरिंद्रः॥दुश्च्यवनःपृतनाषाडयुध्यो
स्माकꣳसेनाअवतुप्रयुत्सु॥इंद्रआसांनेताबृहस्पतिर्दक्षिणाय
ज्ञःपुरएतुसोमः॥देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्व
ग्रे॥इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांꣳशर्धउग्रं॥महा
मनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात्॥अस्माकमिं
द्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्ताजयंतु॥अस्माकंवीराउत्तरे
भवंत्वस्मानुदेवाअवताहवेषु॥उद्धर्षयमघवन्नायुधान्युत्सत्वं

उ० नांमामकानांमनाᳫंसि॥उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजय
९१ तांयंतुघोषः॥उपप्रेतजयतानरःस्थिरावःसंतुबाहवः॥इंद्रोवः
शर्मयछत्वनाधृष्यायथासथ॥अवसृष्टापरापतशरव्येब्रह्मस
ᳫंशिता॥गछामित्रान्प्रविशमैषांकंचनोछिषः॥मर्माणितेवर्म
भिश्छादयामिसोमस्त्वाराजामृतेनाभिवस्तां॥उरोर्वरीयोवरि
वस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः॥यत्रबाणाःसंपतंतिकुमा एम
राविशिखाइव॥इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयछतु॥शंच ९१

स
मेमयश्चमेप्रियंचमेनुकामश्चमेकामश्चमेसौमनश्चमेभद्रंचमेश्रे
यश्चमेवस्यश्चमेयशश्चमेभगश्चमेद्रविणंचमेयंताचमेधर्ताचमे
क्षेमश्चमेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमे
प्रसूश्चमेसीरंचमेलयश्चमऋतंचमेमृतंचमेयक्ष्मंचमेनामयच्च
मेजीवातुश्चमेदीर्घायुत्वंचमेनमित्रंचमेभयंचमेसुगंचमेशयनं
चमेसूषाचमेसुदिनंचमे॥ ॥ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेंधा
नास्तन्वंपुषेम॥मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेणपृतनाज

उ.
९२ येम। ममदेवा विहवे संतु सर्व इंद्रावंतो मरुतो विष्णुरग्निः॥ ममांतरि
क्षमुरुगोपमस्तु मह्यंवातः पवतां कामे अस्मिन्॥ मयिदेवाद्रविण
मायजंतां मय्याशीरस्तु मयिदेवहूतिः॥ दैव्याहोतारवनिषंतुपू
र्वेरिष्टास्याम तन्वासुवीराः॥ मह्यंयजंतु ममयानिहव्याकूतिःसत्या
मनसोमे अस्तु॥ एनोमानिगांकतमच्चनाहं विश्वेदेवासोअधिवो
चतामे॥ देवीःषडुर्वीरुरुणःकृणोत विश्वेदेवासइहवीरयध्वं॥ राम
माहास्महिप्रजयामातनूभिर्मारधामद्विषतेसोमराजन्॥ अग्नि ९२

र्मन्युंप्रतिनुदन्पुरस्तादद्ब्धोगोपाःपरिपाहिनस्त्वं। प्रत्यंचोयं
तुनिगुतःपुनस्तेमैषांचित्तंप्रबुधाविनेशात्॥ धाताधातृणांभुव
नस्ययस्पतिर्देवंसवितारमभिमातिषाहं॥ इमंयज्ञमश्विनोभा
बृहस्पतिर्देवाःपांतुयजमानंन्यर्थात्॥ उरुव्यचानोमहिषःशर्म
यंसदस्मिन्हवेपुरुहूतःपुरुक्षुः॥ सनःप्रजायैहर्यश्वमृडयेंद्र
मानोरीरिषोमापरादाः॥ येनःसपत्नाअपतेभवंत्विंद्राग्निभ्यामवबा
धामहेतान्॥ वसवोरुद्राआदित्याउपरिस्पृशंमोग्रंचेत्तारमधिरा

७
९३ जमक्रन॥ अर्वाचमिंद्रममुतोहवामहे योगोजिद्धनजिदश्वजिद्यः। इ
मन्नोयज्ञंविहवेजुषस्वास्यकुर्मोहरिवोमेदिनंत्वा॥ अग्नेर्मन्वेप्रथम
स्यप्रचेतसःपांचजन्यस्यबहुधायमिंधते॥ विशोविशःप्रविविशि
वांसमीमहेसनोमुंचत्वंहसः॥ यस्येदंप्राणन्निमिषद्यदेजतियस्य
जातंजनमानंचकेवलं॥ स्तौम्यग्निंनाथितोजोहवीमिसनोमुंचत्वं
हसः॥१॥ इंद्रस्यमन्ये प्रथमस्यप्रचेतसोवृत्रघ्नःस्तोमाउपमामुपागुः॥ रम
योदाशुषःसुकृतोहवमुपगंतासनोमुंचत्वंहसः॥ यःसंग्रामंनयति ९३

संवृज्ञीयुधेयः पुष्टानिसंसृजतित्रयाणि। स्तौमीइंद्रंनाथितोजोह
वीमिसनोमुंचत्वंहसः॥२॥ मन्वेवांमित्रावरुणाऋतस्यविद्वांसयो
जसाहंहणायंनुदेथे॥ याराजानंसरथंयाथउग्रातानोमुंचतमा
गसः॥ योवांरथंऋजुरश्मिःसत्यधर्मामिथुश्चरंतमुपयातिदूषयन्।
स्तौमिमित्रावरुणानाथितोजोहवीमितौनोमुंचतमागसः॥३॥ वा
योःसवितुर्विदथानिमन्महेयावात्मन्वद्विशतोयौचरक्षतः॥ योविश्व
स्यपरिभूर्बभूवतुस्तौनोमुंचतमागसः॥ उपश्रेष्ठानआशिषोदेवयो

उदक॰ ०५ धेमैं अस्त्विरन॥ स्तोमिवायुंसवितारंनाथितोजोहवीमितौनोमुंच
तमागसः॥४॥रथीतमौरथीनामह्वऊतयेशुभंगमिष्ठौसुयमेभिरश्वैः॥
ययोर्वांदेवौदेवेषुनिशितमोजस्तौनोमुंचतमागसः॥यदयातंवह
तुंसूर्यायात्रिचक्रेणसंसदमिच्छमानौ॥स्तोमिदेवावश्विनौना
थितोजोहवीमितौनोमुंचतमागसः॥५॥मरुतांमन्वेअधिनोब्रुवंतु
प्रेमांवाचंविश्वामवंतुविश्वे॥आशून्हुवेसुयमानूतयेतेनोमुंचंत्वेन एम
सः॥तिग्ममायुधंवीडितंसहस्वद्दिव्यंशर्द्धःपृतनासुजिष्णु॥स्तो ०५

मिदेवान्मरुतोनाथितोजोहवीमितेनोमुंचंत्वेनसः॥६॥देवानोम
न्वेअधिनोब्रुवंतुप्रेमांवाचंविश्वामवंतुविश्वे॥आशून्हुवेसुयमानू
तयेतेनोमुंचंत्वेनसः॥यदिदंमाभिशोचतिपौरुषेयेणदैव्येन॥स्तो
मिविश्वान्देवान्नाथितोजोहवीमितेनोमुंचंत्वेनसः॥७॥अनुनो
द्यानुमतिर्यज्ञंदेवेषुमन्यतां॥अग्निश्चहव्यवाहनोभवतांदाशुषेम
यः॥अन्विदनुमतेत्वंमन्यासैशंचनःकृधि॥क्रत्वेदक्षायनोहिनुप्र
णआयूंषितारिषः॥८॥वैश्वानरोनऊत्याप्रयातुपरावतः॥अग्निरु

उदक ९५ क्थेनुवाहंसा॥पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीर
विवेश।वैश्वानरःसहंसापृष्टोअग्निःसनोदिवासरिषःपातुनक्तं॥८॥
येअप्रथेताममितेभिरोजोभिर्येप्रतिष्ठेअभवतांवसूनां॥स्तौमिद्या
वापृथिवीनाथितोजोहवीमितेनोमुंचतमंहसः॥उर्वीरोदसीवरि
वःकृणोतुंक्षेत्रस्यपत्नीअधिनोब्रूयातं॥स्तौमिद्यावापृथिवीनाथि
तोजोहवीमितेनोमुंचतमंहसः॥१०॥यत्तेवयंपुरुषत्रायविष्ठावि राम
द्वांसश्चकृमाकच्चनागः॥कृधीस्वस्मांअदितेरनागाव्येनांसि ९५

श्रिश्रथोविष्वगग्ने॥यथाहत्तद्वसवोगौर्यंचित्पदिषिताममुंचतायज
त्राः।एवात्वमस्मत्प्रमुंचाव्यंहःप्रातार्यग्नेप्रतरंनआयुः॥ ॥समी
चीनामासिप्राचीदिक्तस्यास्तेअग्निरधिपतिरसितोरक्षितायश्चाधि
पतिर्यश्चगोप्तानाभ्यांनमस्तौनोमृडयतांतेयंद्विष्मोयश्चनोद्वेष्टितं
वांजंभेदधामि॥ओजस्विनीनामासिदक्षिणादिक्तस्यास्तइंद्रोधि
पतिःपृदाकूरक्षितायश्चाधिपतिर्यश्चगोप्तानाभ्यांनमस्तौनो०॥प्रा
चीनामासिप्रतीचीदिक्तस्यास्तेसोमोधिपतिःस्वजोरक्षितायश्चा

उदक०
९६

द॥ अवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोधिपतिस्तिरश्चिरा
जी रक्षिता यश्चा०॥ अधिपत्नी नामासि बृहती दिक्तस्यास्ते बृहस्प
तिरधिपतिः श्वित्रो रक्षिता यश्चा०॥ वशिनी नामासीयं दिक्तस्यास्ते य
मोधिपतिः कुल्माषग्रीवो रक्षिता यश्चा०॥द॥ हेतयो नाम स्थ ते षां वः
पुरो गृहा अग्निर्व इषवः सलिलो वात नामं तेभ्यो वो नमस्ते नो मृडय
त ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि। निलिंपा नाम स्थ ते षां वो एम
दक्षिणा गृहाः पितरो व इषवः सगरो वात नामं तेभ्यो०॥ वज्रिणो नाम ९६

स्थ ते षां वः पश्चाद्गृहाः स्वप्नो व इषवो गह्वरो वात नामं तेभ्यो वो नमः॥०
अवस्थावानो नाम स्थ ते षां व उत्तराद्गृहा आपो व इषवः समुद्रो वात
नामं तेभ्यो०॥ अधिपतयो नाम स्थ ते षां व उपरि गृहा वर्षं व इषवो व
स्वान्वात नामं तेभ्यो वो०॥ क्रव्या नाम स्थ पार्थिवास्ते षां व इह गृहा
अन्नं व इषवो निमिषो वात नामं तेभ्यो वो०॥द॥ तता युधाय ततवी
र्याय ततो तं ये भिमातिषाहे॥ तत्तं यो नः शरदो अजीतानि दंने पु
दत्तिडरित्तानि विश्वा॥ ये चत्वारः पथयो देवयाना अंतरा द्यावापृथि

उदक ९७ वीवृयंति।तेषांयोअज्यानिमजीतिमावहात्तस्मैनोदेवाःपरिदत्तेहस
र्वे॥ग्रीष्मोहेमंतउतनोवसंतःशरद्वर्षाःसुवितन्नोऽअस्तु॥तेषामृतूनां
ंशतशारदानांनिवातएषामभयेस्याम॥इद्वत्सरायपरिवत्सराय
संवत्सरायकृणुताबृहन्नमः॥तेषांवयंसुमतौयज्ञियानांज्योग
जीताअहतास्याम॥भद्रान्नःश्रेयःसमनैष्टदेवास्त्वयावसेनसमशी
महित्वा॥सनोमयोभूःपितोआविशस्वशंतोकायतनुवेस्योनः॥५॥ राम
भूतंभव्यंभविष्यद्वषट्स्वाहानमऋक्सामयजुर्वषट्स्वाहानमो ९७

गायत्रीत्रिष्टुप्जगतीवषट्स्वाहानमःपृथिव्यंतरिक्षंद्यौर्वषट्स्वा
हानमोग्निर्वायुःसूर्योवषट्स्वाहानमःप्राणोव्यानोपानोवषट्स्वा
हानमोन्नंकृषिर्वृष्टिर्वषट्स्वाहानमःपितापुत्रःपौत्रोवषट्स्वा
हानमोभूर्भुवःसुवर्वषट्स्वाहानमः॥६॥इंद्रोदधीचोअस्थभिः।
वृत्राण्यप्रतिष्कुतः।जघाननवतीर्नव॥इच्छन्नश्वस्ययच्छिरः।पर्वते
ष्वपश्रितं॥तद्विदच्छर्यणावति॥अत्राहगोरमन्वत॥नामत्वष्टुरपी
च्यं॥इत्थाचंद्रमसोगृहे॥इंद्रमिद्गाथिनोबृहत॥इंद्रमर्केभिरर्किणः

उदक॰ ९८ ॥इंद्रंवाणीरनूषत॥इंद्र इद्धर्योः सचा॥संमिश्ल आवचोयुजा॥इंद्रो
वज्रीहिरण्ययः॥इंद्रोदीर्घायचक्षसे॥आसूर्यंरोहयद्दिवि॥वि
गोभिरद्रिमैरयत्॥इंद्रवाजेषुनोअव॥सहस्रप्रधनेषुच॥उग्रउ
ग्राभिरूतिभिः॥तमिंद्रंवाजयामसि॥महेवृत्रायहंतवे॥सवृषावृ
षभोभुवत्॥इंद्रः सदामनेकृतः॥ओजिष्ठः सबलेहितः द्युम्नीश्लो
कीससोम्यः॥गिरावज्रोनसंभृतः॥सबलोअनपच्युतः॥ववक्ष एम
उग्रोअस्तृतः॥चक्षुषोहेतेमनसोहेते॥वाचोहेतेब्रह्मणोहेते। ९८

योमाघायुरभिदासति॥तमग्नेमेन्यामेनिंकृणु॥योमाचक्षुषायोमनसा
॥योवाचाब्रह्मणाघायुरभिदासति॥तयाग्नेत्वंमेन्या॥अमुममेनिं
कृणु॥यत्किंचासौमनसायच्चवाचा॥यज्ञैर्जुहोतियजुषाहविर्भिः
।तन्मृत्युर्निरृत्यासंविदानः॥पुरादिष्टादाहुतीरस्यहंतु॥यातुधा
नानिरृतिरादुरक्षः॥तेअस्यघ्नंत्वनृतेनसत्यं॥इंद्रेषिताआज्य
मस्यमथ्नंतु॥मातत्समृद्धियदसौकरोति॥हन्मितेहंकृतंहविः॥
योमेघोरमचीकृतः॥अपाचौतउभौबाहू॥अपनह्याम्यास्यं॥अप

३८क
९९ रक्ष्यामि ते बाहू ॥ अपनह्याम्यास्यं ॥ अग्नेर्देवस्य ब्रह्मणा ॥ सर्वे ते व
धिषं कृतं ॥ पुरामुष्य वषट्कारात ॥ यज्ञं देवेषु नस्कृधि ॥ स्विष्टम
स्माकं भूयात् ॥ मास्मान्प्रापन्नरातयः ॥ अंति दूरे सतो अग्ने ॥ भ्रातृव्य
स्याभिदासतः ॥ वषट्कारेण वज्रेण ॥ कृत्यां हन्मि कृतामहं ॥ यो मा
नक्तं दिवा सायं ॥ प्रातश्चाह्नो निपीयति ॥ अद्यातमिंद्र वज्रेण ॥ भ्रातृ
व्यं पादयामसि ॥ प्राणो रक्षति विश्वमेजत् ॥ इर्यो भूत्वा बहुधा बहू एम
नि ॥ स इत्सर्वं व्यानशे ॥ यो देवो देवेषु विभूरंतः ॥ आवृदूदाक्षेत्रि ९९

यं ध्वग हृषो ॥ तमित्प्राणं मनसोपशिक्षत ॥ अग्रं देवानामिदमत्तु नो
हविः ॥ मनसश्चित्तेदं ॥ भूतं भव्यं च गुप्यते ॥ तद्धि देवेष्वग्रियं ॥ आ न
एतु पुरश्चरं ॥ सह देवैरिमं हवं ॥ मनः श्रेयसि श्रेयसि ॥ कर्मन्यज्ञप
तिं दधत् ॥ जुषतां मे वागिदं हविः ॥ विराड् देवी पुरोहिता ॥ हव्य
वाडनपायिनी ॥ यया रूपाणि बहुधा वदंति ॥ पेशांसि देवाः पर
मे जनित्रे ॥ सा नो विराडनपस्फुरंती ॥ वाग्देवी जुषतामिदं हविः ॥
चक्षुर्देवानां ज्योतिरमृते न्यक्तं ॥ अस्य विज्ञानाय बहुधा निधीयते ॥

उदक॰
१०० तस्यसुम्नमशीमहि॥मानोहासीद्विचक्षणं॥आयुरिन्नःप्रतीर्यतां॥
अनंधाश्चक्षुषावयं॥जीवाज्योतिरशीमहि॥सुवर्ज्योतिरुतामृतं॥
श्रोत्रेणभद्रमुतशृण्वंतिसत्यं॥श्रोत्रेणवाचंबहुधोद्यमानां॥श्रोत्रे
णमोदश्चमहश्चश्रूयते॥श्रोत्रेणसर्वादिशआशृणोमि॥येनप्राच्या
उतदक्षिणा॥प्रतीच्यैदिशःशृण्वंत्युत्तरात॥तदिच्छ्रोत्रंबहुधोद्यमा
नं॥अरान्ननेमिःपरिसर्वंबभूव॥ ॥सिंहेव्याघ्रउतयापृदाकौ॥त्वि एम
षिरग्नौब्राह्मणेसूर्येया॥इंद्रंयादेवीसुभगाजजान॥सानआगन्वर्च १००

सासंविदाना॥याराजन्येदुंदुभावायतायां॥अश्वस्यक्रंदेपुरुषस्यमा
यौ॥इंद्रंयादेवीसुभगाजजान॥सानआगन्वर्चसासंविदाना॥याहु
स्तिनिद्वीपिनियाहिरण्ये॥त्विषिरश्वेषुपुरुषेषुगोषु॥इंद्रंयादेवीसु
भगाजजान॥सानआगन्वर्चसासंविदाना॥रथेअक्षेषुवृषभस्यवा
जे॥वातेपर्जन्येवरुणस्यशुष्मे॥इंद्रंयादेवीसुभगाजजान॥सानआ
गन्वर्चसासंविदाना॥राडसिविराडसि॥सम्राडसिस्वराडसि॥इंद्राय
त्वातेजस्वतेतेजस्वंतंश्रीणामि॥इंद्रायत्वौजःस्वतओजस्वंतंश्री

णामि।इंद्रीयस्त्वापयस्वतेपयस्वंतं श्रीणामि॥इंद्रीयस्त्वायुष्मत आयुष्मं
तं श्रीणामि॥तेजोसि।तत्तेप्रयच्छामि।तेजस्वदस्तुमेमुखं॥तेजस्वछिरो
अस्तुमे।तेजस्वाविश्वतःप्रत्यङ्॥तेजसासंपिपृग्धिमा॥ओजोसितत्ते
प्रयच्छामि॥ओजस्वदस्तुमेमुखं॥ओजस्वछिरोअस्तमे॥ओजस्वान्
विश्वतःप्रत्यङ्॥ओजसासंपिपृग्धिमा॥पयोसि॥तत्तेप्रयच्छामि॥प
यस्वदस्तमेमुखं॥पयस्वछिरोअस्तुमे॥पयस्वान्विश्वतःप्रत्यङ्।पय
सासंपिपृग्धिमा॥आयुरसि॥तत्तेप्रयच्छामि॥आयुष्मदस्तमेमुखं।

आयुष्मछिरोअस्तुमे॥आयुष्मान्विश्वतःप्रत्यङ्॥आयुषासंपिपृग्धि
मा।इममग्न आयुषेवर्चसेकृधि॥प्रियं रेतोवरुणसोमराजन्॥मातेवा
स्मा अदितेशर्मयच्छ॥विश्वेदेवाजरदृष्टिर्यथासत्॥आयुरसिविश्वा
युरसि॥सर्वायुरसिसर्वमायुरसि॥यतोवातोमनोजवाः।यतःक्षरंति
सिंधवः॥तासांत्वासर्वासांरुचा॥अभिषिंचामिवर्चसा॥समुद्रइवा
सिगम्भना॥सोमइवास्यदाभ्यः॥अग्निरिवविश्वतःप्रत्यङ्॥सूर्यइ
वज्योतिषाविभूः॥अपांयोद्रवणेरसः॥तमहमस्मा आयुष्यायणाय।

उदक· तेजसेब्रह्मवर्चसायगृह्णामि॥अपांयदूर्मौरसः॥तमहमस्मा आमुष्या
१०२ यणाय॥ओजसेवीर्यायगृह्णामि॥अपांयोमध्यतोरसः॥तमहमस्मा आ
मुष्यायणाय॥पुष्ट्यैप्रजननायगृह्णामि॥अपांयोयज्ञियोरसः॥तम
हमस्मा आमुष्यायणाय॥आयुषेदीर्घायुत्वायगृह्णामि॥ ॥अहम
स्मिप्रथमजाऋतस्य॥पूर्वंदेवेभ्यो अमृतस्यनाभिः॥योमाददातिस
इदेवमावाः॥अहमन्नमन्नमदन्तमद्मि॥पूर्वमग्नेरपिदहत्यन्नं॥यत्तो एम
हास्माते अहमुत्तरेषु॥व्यात्तमस्यपशवःसुजंभं॥पश्यन्तिधीराःप्रचरं १०२

न्तिपाकाः॥जहाम्यन्यंनजहाम्यन्यं॥अहमन्नंवशमिच्चरामि॥समानम
र्थंपर्येमिभुंजत्॥कोमामन्नंमनुष्योदयेत॥पराकेअन्नंनिहितंलोक
एतत्॥विश्वैर्देवैःपितृभिर्गुप्तमन्नं॥यदद्यतेलुप्यतेयत्परोप्यते॥श
ततमीसातनूर्मेबभूव॥महान्तौचरूसकृद्दुग्धेनपप्रौ॥दिवंचपृश्नि
पृथिवींचसाकं॥तत्संपिबन्तोनमिनन्तिवेधसः॥नैतद्भूयोभवतिनो
कनीयः॥अन्नंप्राणमन्नमपानमाहुः॥अन्नंमृत्युंतमुजीवातुमाहुः
अन्नंब्रह्माणोजरसंवदन्ति॥अन्नमाहुःप्रजननंप्रजानां॥मोघमन्नंवि

उदक० दतेअप्रचेताः॥सत्यंब्रवीमिवधइत्सतस्य॥नार्यमणंपुष्यतिनोसखा
१०३ यं॥केवलाघोभवतिकेवलादी॥अहंमेघस्तनयन्वर्षन्नस्मि।मामं
दंत्युदमसन्यान॥अहंसदमृतोभवामि॥मदोदित्याअधिसर्वेन
पंति॥देवींवाचमजनयंतदेवाः॥तांविश्वरूपाःपशवोवदंति॥सानो
मंद्रेषमूर्जंदुहाना॥धेनुर्वागस्मानुपसुष्टुतैतु॥यद्वाग्वदंत्यविचेत
नानि॥राष्ट्रीदेवानांनिषसादमंद्रा॥चतस्रऊर्जंदुदुहेपयांसि॥क्व एम
स्विदस्याःपरमंजगाम॥अनंतामंतादधिनिर्मितांमही॥यस्यांदेवा १०३

अदधुर्भोजनानि॥एकाक्षरांद्विपदांषट्पदांच॥वाचंदेवाउपजी
वंतिविश्वे॥वाचंदेवाउपजीवंतिविश्वे॥वाचंगंधर्वाःपशवोमनुष्याः॥
वाचीमाविश्वाभुवनान्यर्पिता॥सानोहवंजुषतामिंद्रपत्नी॥वाग
क्षरंप्रथमजाऋतस्य॥वेदानांमातामृतस्यनाभिः॥सानोजुषाणोप
यज्ञमागात्॥अवंतीदेवीसुहवामेअस्तु॥यामृषयोमंत्रकृतोमनी
षिणः।अन्वैच्छंदेवास्तपसाश्रमेण।तांदेवींवाचंहविषायजामहे॥
सानोदधातुसुकृतस्यलोके॥चत्वारिवाक्परिमितापदानि॥तानिवि

३८ का० ड्ब्रोह्मणायेमनीषिणः॥गुहात्रीणिनिहितानेंगयंति॥तुरीयंवाचोम
१९४ नुष्यांवदंति॥श्रद्धयाग्निःसमिध्यते॥श्रद्धयाविंदतेहविः॥श्रद्धांभग
स्यमूर्द्धनि॥वचसावेदयामसि॥प्रियंश्रद्धेददतः॥प्रियंश्रद्धेदिदा
सतः॥प्रियंभोजेषुयज्वसु॥इदंमउदितंकृधि॥यथादेवाअसुरेषु॥
श्रद्धामुग्रेषुचक्रिरे॥एवंभोजेषुयज्वसु॥अस्माकमुदितंकृधि॥श्र
द्धांदेवायजमानाः॥वायुगोपाउपासते॥श्रद्धांहृदय्ययाकूत्या॥श्र एम
द्धयाहूयतेहविः॥श्रद्धांप्रातर्हवामहे॥श्रद्धांमध्यंदिनंपरि॥श्रद्धां १९४

सूर्यस्यनिमुचि॥श्रद्धेश्रद्धापयेहनः॥श्रद्धादेवानधिवस्ते॥श्रद्धाविश्व
मिदंजगत्॥श्रद्धांकामस्यमातरं॥हविषावर्द्धयामसि॥ब्रह्मजज्ञानंप्र
थमंपुरस्तात्॥विसीमतःसुरुचोवेनआवः॥सबुध्न्याउपमाअस्य
विष्ठाः॥सतश्चयोनिमसतश्चविवः॥पिताविराजामृषभोरयीणां॥अंत
रिक्षंविश्वरूपआविवेश॥तमर्कैरभ्यर्चंतिवत्सं॥ब्रह्मसंतंब्रह्मणा
वर्द्धयंतः॥ब्रह्मदेवानजनयत्॥ब्रह्मविश्वमिदंजगत्॥ब्रह्मणः
क्षत्रंनिर्मितं॥ब्रह्मब्राह्मणआत्मना॥अंतरस्मिन्निमेलोकाः॥अंतर्विश्व

३२कं॰ मिदंजगत्॥ब्रह्मैवभूतानांज्येष्ठं।तेनकोर्हतिस्पर्धितुं॥ब्रह्मंदेवास्त्र
१०५ यस्त्रिंशत्॥ब्रह्मन्निंद्रप्रजापती॥ब्रह्मन्हविश्वाभूतानि॥नावी
वांतःसमाहिता॥चतस्रआशाःप्रचरंत्वग्नयः॥इमंनोयज्ञंनयतुप्रजा
नन्॥घृतंपिन्वन्नजरंसुवीरं॥ब्रह्मसमिद्भवत्याहुतीनां॥आगावो
अग्मंनुतभद्रमक्रन्॥सीदंतुगोष्ठेरणयंत्वस्मे॥प्रजावतीःपुरुरूपाइ
हस्युः॥इंद्रायपूर्वीरुषसोदुहानाः॥इंद्रोयज्वनेपृणतेचशिक्षति॥उ राम
पेद्ददातिनस्वंमुषायति॥भूयोभूयोरयिमिदस्यवर्द्धयन्॥अभिन्नेखि १०५

ल्येनिदधातिदेवयुं॥नतानशंतिनदभातितस्करः॥नैनाअमित्रोव्य
थिरादधर्षति॥देवांश्चयाभिर्यजतेददातिच॥ज्योगित्ताभिःसच
तेगोपतिःसह॥नताअर्वारेणुककाटोअश्नुते॥नसंस्कृतत्रमुपयं
तिताअभि॥उरुगायमभयंतस्यताअनु॥गावोमर्त्यस्यविचरंति
यज्वनः॥गावोभगोगावइंद्रोमेअच्छान्॥गावःसोमस्यप्रथमस्यभ
क्षः॥इमायागावःसजनासइंद्रः॥इच्छामीद्धृदामनसाचिदिंद्रं॥यू
यंगावोमेदयथाकृशंचित्॥अश्रीलंचित्कृणुथासुप्रतीकं॥भ

उदकं० इंगृहंकृणुथभद्रवाचः॥ बृहद्वोवयउच्यतेसभासु॥ प्रजावतीःसूय
१०६ वसंरिशंतीः॥ शुद्धाअपःसुप्रपाणेपिबंतीः॥ मावःस्तेनईशतमा
घशंसः॥ परिवोहेतीरुद्रस्यवृंज्यात॥ उपेदमुपपर्चनं॥ आसुगो
षुपृच्यतां॥ उपर्षभस्यरेतसि॥ उपेंद्रतववीर्ये॥ तासूर्याचंद्रमसा
विश्वभृत्तमामहत॥ तेजोवसुमद्राजतोदिवि॥ सामात्मानाचरतः
सामचारिणा॥ ययोर्व्रतंनमेजातुदेवयोः॥ उभावंतौपरियात राम
अर्म्या॥ दिवोनरश्मींस्तनुतोव्यर्णवे॥ उभाभुवंतीभुवनाकविक्र १०६

तू॥ सूर्यानचंद्राचरतोहतामती॥ पतीद्युमद्विश्वविदाउभादिवः।
सूर्याउभाचंद्रमसाविचक्षणा॥ विश्ववाराववरिवोभावरेण्या॥ तानो
वतंमतिमंतामहिव्रता॥ विश्ववपरीप्रतरणातरंता॥ सुवर्विदादृश
येभूरिरश्मी॥ सूर्याहिचंद्रावसुत्वेषदर्शता॥ मनस्विनोभानुचरतो
नुसंदिवं॥ अस्यश्रवोनद्यःसप्तबिभ्रति॥ द्यावाक्षामापृथिवीदर्शतं
वपुः॥ अस्मेसूर्याचंद्रमसाभिचक्षे॥ श्रद्धेकमिंद्रचरतोविचर्तुरं॥
पूर्वापरंचरतोमाययैतौ॥ शिशूक्रीडंतौपरियातोअध्वरं॥ विश्वा

उदक· २०७ न्यन्यो भुवनाभिचष्टे। ऋतूनन्यो विदधज्जायते पुनः॥ हिरण्यवर्णाः शु
चयः पावका यासु जातः कश्यपो यास्विन्द्रः॥ अग्निं या गर्भं दधिरे विरू
पास्ता न आपः शं स्योना भवन्तु॥ यासां राजा वरुणो याति मध्ये सत्या
नृते अवपश्यं जनानां॥ मधुश्चुतः शुचयो याः पावकास्ता न आपः शं
स्योना भवन्तु॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भ
वंति॥ याः पृथिवीं पयसोंदंति शुक्रास्ता न आपः शं स्योना भवन्तु॥ शि राम
वेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे॥ सर्वां अ २०७

ग्नीं रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥ आपो भद्रा घृतमि
दाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः॥ तीव्रो रसो मधुपृचामरंगम आ
मा प्राणेन सह वर्चसा गमन्॥ आदित्पश्याम्युत वा शृणोम्या मा घोषो ग
च्छति वाङ्न आसां॥ मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं य
दा वः॥ नासदासीन्नो सदासीत्तदानीं॥ नासीद्रजो नो व्योमा परो यत्॥
किमावरीवः कुह कस्य शर्मन्॥ अंभः किमासीद्गहनं गभीरं॥ न मृत्यु
रमृतं न तर्हि न॥ रात्र्या अह्न आसीत्प्रकेतः॥ आनीदवातं स्वधया त

उदक देकं॥तस्माद्धान्यन्नपरःकिंचनास॥तमआसीत्तमसागूढमग्रेऽप्रकेतं॥
१०८ सलिलं॑सर्वमाइदं॥तुच्छेनाभ्वपिहितंयदासीत॥तमसस्तन्महिना
जायतैकं॥कामस्तदग्रेसमवर्त्तताधि॥मनसोरेतःप्रथमंयदासीत्॥
सतोबंधुमसतिनिरविंदन॥हृदिप्रतिष्याकवयोमनीषा॥तिरश्ची
नोविततोरश्मिरेषां॥अधःस्विदासी३दुपरिस्विदासी३त॥रेतोधाआ
सन्महिमानआसन॥स्वधाअवस्तात्प्रयतिःपरस्तात॥कोअद्धावेद राम
कइहप्रवोचत॥कुतआजाताकुतइयंविसृष्टिः॥अर्वाग्देवाअस्यवि १०८

सर्जनाय॥अथाकोवेदयतआबभूव॥इयंविसृष्टिर्यतआबभूव॥
यदिवादधेयदिवान॥योअस्याध्यक्षःपरमेव्योमन॥सोअंगवेद
यदिवानवेद॥किंस्विद्वनंकउसवृक्षआसीत॥यतोद्यावापृथिवी
निष्टतक्षुः॥मनीषिणोमनसापृच्छतेदुतत्॥यदध्यतिष्ठद्भुवनानि
धारयन्॥ब्रह्मवनंब्रह्मसवृक्षआसीत॥यतोद्यावापृथिवीनिष्टत
क्षुः॥मनीषिणोमनसाविब्रवीमिवः॥ब्रह्माध्यतिष्ठद्भुवनानिधार
यन्॥प्रातरग्निंप्रातरिंद्रं॑हवामहे॥प्रातर्मित्रावरुणाप्रातरश्विना॥

उदक
१०१

प्रातर्भगंपूषणंब्रह्मणस्पतिं॥प्रातःसोममुतरुद्रंहुवेम॥प्रातर्जितं
भगमुग्रंहुवेम।वयंपुत्रमदितेर्योविधर्ता॥आध्रश्चिद्यंमन्यमान
स्तुरश्चित॥राजाचिद्यंभगंभक्षीत्याह॥भगप्रणेतर्भगसत्यराधः।
भगेमांधियमुदवददन्नः।भगप्रणोजनयगोभिरश्वैः॥भगप्रनृभि
र्नृवंतःस्याम॥उतेदानींभगवंतःस्याम॥उतप्रपित्वउतमध्येअ
ह्नां॥उतोदितामघवन्सूर्यस्य॥वयंदेवानांसुमतौस्याम॥भगए रम
वभगवांअस्तुदेवाः॥तेनवयंभगवंतःस्याम॥तंत्वाभगसर्वइज्जो १०१

हवीमि॥सनोभगपुरएताभवेह॥समध्वरायोषसोनमंत॥दधिक्रा
वेवशुचयेपदाय॥अर्वाचीनंवसुविदंभगंनः॥रथमिवाश्वावाजि
नआवहंतु॥अश्वावतीर्गोमतीर्नउषासः॥वीरवतीःसदमुच्छंतुभ
द्राः॥घृतंदुहानाविश्वतःप्रपीताः॥यूयंपातस्वस्तिभिःसदानः॥अग्नि
र्नःपातुकृत्तिकाः॥नक्षत्रंदेवमिंद्रियं॥इदमासांविचक्षणं॥हविरा
संजुहोतन॥यस्यभांतिरश्मयोयस्यकेतवः॥यस्येमाविश्वाभुवना
निसर्वा॥सकृत्तिकाभिरभिसंवसानः॥अग्निर्नोदेवःसुवितेदधातु॥१

उदकं० प्रजापते रोहिणी वेतु पत्नी ॥ विश्वरूपा बृहती चित्रभानुः ॥ सा नो यज्ञ
११० स्य सुविते दधातु ॥ यथा जीवेम शरदः सवीराः ॥ रोहिणी देव्युदगा
त्पुरस्तात् ॥ विश्वा रूपाणि प्रतिमोदमाना ॥ प्रजापतिं हविषा वर्ध
यंती ॥ प्रिया देवानामुपयातु यज्ञं ॥ २ ॥ सोमो राजा मृगशीर्षेण आ
गन् ॥ शिवं नक्षत्रं प्रियमस्य धाम ॥ आप्यायमानो बहुधा जनेषु ॥
रेतः प्रजां यजमाने दधातु ॥ यत्ते नक्षत्रं मृगशीर्षमस्ति ॥ प्रियं राजन् राम
प्रियतमं प्रियाणां ॥ तस्मै ते सोम हविषा विधेम ॥ शं न एधि द्विपदे शं च ११०

तुष्पदे ३ ॥ आर्द्रया रुद्रः प्रथमान एति ॥ श्रेष्ठो देवानां पतिरघ्नियानां ॥
नक्षत्रमस्य हविषा विधेम ॥ मा नः प्रजां रीरिषन्मोत वीरान् ॥ हेती रु
द्रस्य परि णो वृणक्तु ॥ आर्द्रा नक्षत्रं जुषतां हविर्नः ॥ प्रमुंचमानौ दुरि
तानि विश्वा ॥ अपाघशंसं नुदतामरातिं ॥ ४ ॥ पुनर्नो देव्यदितिः स्पृ
णोतु ॥ पुनर्वसू नः पुनरेतां यज्ञं ॥ पुनर्नो देवा अभियंतु सर्वे ॥ पुनः पु
नर्वो हविषा यजामः ॥ एवा न देव्यदितिरनर्वा ॥ विश्वस्य भर्त्री जगतः
प्रतिष्ठा ॥ पुनर्वसू हविषा वर्धयंती ॥ प्रियं देवानामप्येतु पाथः ॥ ५ ॥ बृ

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

उद्क॰ ११९ हस्पतिः प्रथमंजायमानः॥ तिष्यंनक्षत्रमभिसंबभूव॥ श्रेष्ठोदेवानां
पृतनासुजिष्णुः॥ दिशोनुसर्वाअभयन्नोअस्तु॥ तिष्यःपुरस्तादुतम
ध्यतोनः॥ बृहस्पतिर्नःपरिपातुपश्चात्॥ बाधेतांद्वेषोअभयंकृणु
तां॥ सुवीर्यस्यपतयःस्याम॥६॥ इदंꣳसर्पेभ्योहविरस्तुजुष्टं॥ आश्रे
षायेषामनुयंतिचेतः॥ येअंतरिक्षंपृथिवींक्षियंति॥ तेनःसर्पासोहव
मागमिष्ठाः॥ येरोचनेसूर्यस्यापिसर्पाः॥ येदिवंदेवीमनुसंचरंति॥ ये एम
षामाश्रेषाअनुयंतिकामं॥ तेभ्यःसर्पेभ्योमधुमज्जुहोमि॥७॥ उपहूताः ११९

पितरोयेमघासु॥ मनोजवसःसुकृतःसुकृत्याः॥ तेनोनक्षत्रेहवमा
गमिष्ठाः॥ स्वधाभिर्यज्ञंप्रयतंजुषंतां॥ येअग्निदग्धाये नग्निदग्धाः॥
येमुंलोकंपितरःक्षियंति॥ यांꣳश्चविद्मयांꣳउचनप्रविद्म॥ मघासुय
ज्ञंसुकृतंजुषंतां॥८॥ गवांपतिःफल्गुनीनामसित्वं॥ तदर्यमन्वरुण
मित्रचारु॥ तंत्वावयंꣳसनितारꣳसनीनां॥ जीवाजीवंतमुपसंविशेम
॥ येनेमाविश्वाभुवनानिसंजिता॥ यस्यदेवाअनुसंयंतिचेतः॥ अर्य
माराजाजरस्तुविष्मान्॥ फल्गुनीनामृषभोरोरवीति॥९॥ श्रेष्ठोदेवानां

उदक ११२

भगवो भगासि तत्वा विदुः फल्गुनीस्तस्य वित्तात्॥ अस्मभ्यं क्षत्रमज

रं सुवीर्यं॥ गोमदश्ववदुप संनुदेह॥ भगो ह दाता भग इत्प्रदाता॥ भ

गो देवीः फल्गुनीराविवेश॥ भगस्येत्तं प्रसवं गमेम॥ यत्र देवैः सधमा

दं मदेम॥१०॥ आयातु देवः सवितोपयातु॥ हिरण्ययेन सुवृता रथेन

॥ वहन्हस्तं सुभगं विद्मनापसं॥ प्रयच्छन्तं पपुरिं पुण्यमच्छ॥ हस्तः

प्रयच्छत्वमृतं वसीयः॥ दक्षिणेन प्रतिगृभ्णीम एनत्॥ दातारमद्य स एम

विता विदेय॥ यो नो हस्ताय प्रसुवाति यज्ञं॥११॥ त्वष्टा नक्षत्रमभ्येति ११२

चित्रां॥ सुभं ससं युवतिं रोचमानां॥ निवेशयन्नमृतान्मर्त्यांश्च

॥ रूपाणि पिंशन्भुवनानि विश्वा॥ तन्नस्त्वष्टा तदु चित्रा विचष्टां॥

तन्नक्षत्रं भूरिदा अस्तु मह्यं॥ तन्नः प्रजां वीरवतीं सनोतु॥ गोभि

र्नो अश्वैः समनक्तु यज्ञं॥१२॥ वायुर्नक्षत्रमभ्येति निष्ट्यां॥ तिग्मशृ

ङ्गो वृषभो रोरुवाणः॥ समीरयन्भुवना मातरिश्वा॥ अप द्वेषांसि

नुदतामरातीः॥ तन्नो वायुस्तदु निष्ट्या शृणोतु॥ तन्नक्षत्रं भूरिदा अ

स्तु मह्यं॥ तन्नो देवासो अनुजानन्तु कामं॥ यथा तरेम दुरितानि वि

उदक श्रो॥३॥दूरमस्मछत्रवोयंतुभीताः॥तदिंद्राग्नीकृणुतांतद्विशाखे
११२ ॥तन्नोदेवाअनुमदंतुयज्ञं॥पश्चात्पुरस्तादभयन्नोअस्तु॥नक्षत्रा
णामधिपत्नीविशाखे॥श्रेष्ठाविंद्राग्नीभुवनस्यगोपौ॥विषूचःशत्रू
नपबाधमानौ॥अपक्षुधन्नुदतामरातिं॥४॥पूर्णापश्चादुतपूर्णा
पुरस्तात्॥उन्मध्यतःपौर्णमासीजिगाय॥तस्यांदेवाअधिसंवसं
तः॥उत्तमेनाकइहमादयंतां॥पृथ्वीसुवर्चायुवतिःसजोषाः॥पौ एम
र्णमास्युदगाच्छोभमाना॥आप्याययंतीदुरितानिविश्वा॥उरुंदुहां ११३

यजमानाययज्ञं॥५॥ऋध्यास्महव्यैर्नमसोपसद्य॥मित्रंदेवंमित्र
धेयंनोअस्तु॥अनूराधान्हविषावर्द्धयंतः॥शतंजीवेमशरदःस
वीराः॥चित्रंनक्षत्रमुदगात्पुरस्तात्॥अनूराधासइतियद्वदंति॥
तन्मित्रएतिपथिभिर्देवयानैः॥हिरण्ययैर्विततैरंतरिक्षे॥६॥इं
द्रोज्येष्ठामनुनक्षत्रमेति॥यस्मिन्वृत्रंवृत्रतूर्येततार॥तस्मिन्वयम
मृतंदुहानाः॥क्षुधंतरेमदुरितिंदुरिष्टिं॥पुरंदरायवृषभायधृष्ण
वे॥अषाढायसहमानायमीढुषे॥इंद्रायज्येष्ठामधुमद्दुहाना॥

उदक॰ उरुं कृणोतु यजमानाय लोकं ॥७॥ मूलं प्रजां वीरवतीं विदेय । परा
११५ च्येतु निर्ऋतिः पराचा ॥ गोभिर्नक्षत्रं पशुभिः समक्तं ॥ अहर्भूयाद्य
जमानाय मह्यं ॥ अहर्नो अद्य सुविते दधातु ॥ मूलं नक्षत्रमिति यद्
वदंति ॥ पराचीं वाचा निर्ऋतिं नुदामि ॥ शिवं प्रजायै शिवमस्तु मह्यं
॥८॥ या दिव्या आपः पयसा संबभूवुः ॥ या अंतरिक्ष उत पार्थिवी
र्याः ॥ यासामषाढा अनुयंति कामं ॥ ता न आपः शं स्योना भवंतु ॥ एम
याश्च कूप्या याश्च नाद्याः समुद्रियाः ॥ याश्च वैशंतीरुत प्रासचीर्याः ॥ ११५

यासामषाढा मधु भक्षयंति ॥ ता न आपः शं स्योना भवंतु ॥९॥ तन्नो
विश्व उपशृण्वंतु देवाः ॥ तदषाढा अभिसंयंतु यज्ञं ॥ तन्नक्षत्रं प्रथतां
पशुभ्यः ॥ कृषिर्वृष्टिर्यजमानाय कल्पतां ॥ शुभ्राः कन्या युवतयः
सुपेशसः ॥ कर्मकृतः सुकृतो वीर्यावतीः ॥ विश्वान्देवान्हविषा व
र्द्धयंतीः ॥ अषाढाः काममुपयांतु यज्ञं ॥१०॥ यस्मिन्ब्रह्माभ्यजय
त्सर्वमेतत् ॥ अमुं च लोकमिदमू च सर्वं ॥ तन्नो नक्षत्रमभिजिद्वि
जित्य ॥ श्रियं दधात्वहृणीयमानं ॥ उभौ लोकौ ब्रह्मणा संजितेमौ ॥

उदक. ११५ तन्नो नक्षत्रमभिजिद्विचष्टां॥ तस्मिन्वयं पृतनाः संजयेम॥ तन्नो देवासो
अनुजानंतु कामं॥२१॥ शृण्वंति श्रोणाममृतस्य गोपां॥ पुण्यामस्या
उपशृणोमि वाचं॥ मही देवीं विष्णुपत्नीमजूर्यां॥ प्रतीचीमेनां हवि
षा यजामः॥ त्रेधा विष्णुरुरुगायो विचक्रमे॥ महीं दिवं पृथिवीमंतरिक्षं
॥ तच्छ्रोणैति श्रव इच्छमाना॥ पुण्यं श्लोकं यजमानाय कृण्वती॥२२॥
अष्टौ देवा वसवः सोम्यासः॥ चतस्रो देवीरजराः श्रविष्ठाः॥ ते यज्ञं पांतु रा
रजसः पुरस्तात्॥ संवत्सरीणममृतं स्वस्ति॥ यज्ञं नः पांतु वसवः पुर ११५

स्तात्॥ दक्षिणतोभियंतु श्रविष्ठाः॥ पुण्यं नक्षत्रमभिसंविशाम॥ मा
नो अरातिरघशंसागन्॥२३॥ क्षत्रस्य राजा वरुणोधिराजः॥ नक्ष
त्राणां शतभिषग्वसिष्ठः॥ तौ देवेभ्यः कृणुतो दीर्घमायुः॥ शतं
सहस्रा भेषजानि धत्तः॥ यज्ञं नो राजा वरुण उपयातु॥ तन्नो विश्वे अ
भिसंयंतु देवाः॥ तन्नो नक्षत्रं शतभिषग्जुषाणं॥ दीर्घमायुः प्रतिरद्भे
षजानि॥२४॥ अज एकपादुदगात्पुरस्तात्॥ विश्वा भूतानि प्रतिमो
दमानः॥ तस्य देवाः प्रसवं यंति सर्वे॥ प्रोष्ठपदासो अमृतस्य गोपाः॥

उदक
११६

विभ्राजमानःसमिधानउग्रः॥आंतरिक्षमरुहदगंद्यां॥तंसूर्यंदेवमज
मेकपादं॥प्रोष्ठपदासोअनुयंतिसर्वे॥२५॥अहिर्बुध्नियःप्रथमान
एति॥श्रेष्ठोदेवानामुतमानुषाणां॥तंब्राह्मणाःसोमपाःसोम्यासः॥प्रो
ष्ठपदासोअभिरक्षंतिसर्वे॥चत्वारएकमभिकर्मदेवाः॥प्रोष्ठपदासइ
तियान्वदंति॥तेबुध्नियंपरिषद्यंस्तुवंतः॥अहिंरक्षंतिनमसोपस
द्य॥२६॥पूषारेवत्यन्वेतिपंथां॥पुष्टिपतीपशुपावाजबस्त्यौ॥इमानि
हव्याप्रयताजुषाणा॥सुगैर्नोयानैरुपयातांयज्ञं॥क्षुद्रान्पशून्रक्षतुरे राम ११६

वतीनः॥गावोनोअश्वांअन्वेतुपूषा॥अन्नंरक्षंतौबहुधाविरूपं॥
वाजंसनुतांयजमानाययज्ञं॥२७॥तदश्विनावश्वयुजोपयातां॥शु
भंगमिष्ठौसुयमेभिरश्वैः॥स्वंनक्षत्रंहविषायजंतौ॥मध्वासंपृक्तौ
यजुषासमक्तौ॥यौदेवानांभिषजौहव्यवाहौ॥विश्वस्यदूतावमृ
तस्यगोपौ॥तौनक्षत्रंजुजुषाणोपयातां॥नमोश्विभ्यांकृणुमोश्वयु
ग्भ्यां॥२८॥अपपाप्मानंभरणीर्भरंतु॥तद्यमोराजाभगवान्विचष्टां॥
लोकस्यराजामहतोमहान्हि॥सुगंनःपंथामभयंकृणोतु॥यस्मिन्नक्ष

उदक त्रेयमगन्तिराज्ञो।यस्मिन्नेनमभ्यषिंचंतदेवाः।तदस्यचित्रंहविषाय
११७ जाम।अपपाप्मानंभरणीर्भरंतु॥९॥निचेरणीसंगमनीवसूनांविश्वा
रूपाणिवसून्यावेशयंती॥सहस्रपोषंसुभगारराणासानआग
न्वर्चसासंविदाना॥यत्तेदेवाअदधुर्भागधेयममावास्येसंवसंतो
महित्वा॥सानोयज्ञंपिपृहिविश्ववारेरयिंनोधेहिसुभगेसुवीरं॥
१०॥नवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रे॥भागंदेवे एम
भ्योविदधात्यायन्प्रचंद्रमास्तिरतिदीर्घमायुः॥यमादित्याअंशुमा ११७

प्याययंतियमक्षितमक्षितयःपिबंति॥तेनेनोराजावरुणोबृहस्प
तिराप्याययंतुभुवनस्यगोपाः॥११॥येविरूपेसमनसासंव्ययंती॥
समानंतंतुंपरितातनाते॥विभूप्रभूअनुभूविश्वतोहुवे॥तेनोन
क्षत्रेहवमागमेतं॥वयंदेवीब्रह्मणासंविदानाः॥सुरत्नासोदेव
वीतिंदधानाः॥अहोरात्रेहविषावर्द्धयंतः॥अतिपाप्मानमतिमु
क्त्यागमेम॥१२॥प्रत्युवदृश्यायती॥व्युछंतीदुहितादिवः॥अपोम
हीवृणुतेचक्षुषा॥तमोज्योतिष्कृणोतिसूनरी॥उदुस्रियाःसचतेसू

उदकः र्येः॥ सचानुयन्नक्षत्रमर्चिमत्॥ तवेदुषोव्युष्टिसूर्यस्यच॥ संभक्तेनग
११८ मेमहि॥३३॥ तन्नोनक्षत्रमर्चिमत्॥ भानुमत्तेजउच्चरत्॥ उपयज्ञ
मिहागमत्॥ प्रनक्षत्रायदेवाय॥ इंद्रायेंदुंहवामहे॥ सनःसविता
सुवत्सनिं॥ पुष्टिदांवीरवत्तमं॥३४॥ उदुत्यंजातवेदसंदेवंवहंति
केतवः॥ दृशेविश्वायसूर्यं॥ चित्रंदेवानामुदगादनीकं चक्षुर्मित्र
स्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगत राम
स्तस्थुषश्च॥३५॥ अदितिर्नउरुष्यत्वदितिःशर्मयच्छतु॥ अदितिः ११८

पांत्वंहसः॥ महीमूषुमातरंसुव्रतानामृतस्यपत्नीमवसेहुवेम॥ तु
विक्षत्रामजरंतीमुरूचींसुशर्माणमदितिंसुप्रणीतिं॥३६॥ इदंवि
ष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समूढमस्यपांसुरे॥ प्रतद्विष्णुःस्तवते
वीर्याय॥ मृगोनभीमःकुचरोगिरिष्ठाः॥ यस्योरुषुत्रिषुविक्रमणेषु
॥ अधिक्षियंतिभुवनानिविश्वा॥३७॥ अग्निर्मूर्धादिवःककुत्पतिः
पृथिव्याअयं॥ अपांरेतांसिजिन्वति॥ भुवोयज्ञस्यरजसश्चनेता
यत्रानियुद्भिःसचसेशिवाभिः॥ दिविमूर्धानंदधिषेसुवर्षांजिह्वामग्ने

उदक० चक्षुषेहव्यवाहं ॥३८॥ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां ॥ अग्निश्च
२२९ हव्यवाहनोभवतांदाशुषेमयः ॥ अन्विदनुमतेत्वंमन्यासैशंचनःकृ
धि ॥ क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषः ॥३९॥ हव्यवाहमभि
मातिषाहं ॥ रक्षोहणंपृतनासुजिष्णुं ॥ ज्योतिष्मंतंदीद्यतंपुरंधिं ॥ अ
ग्निंस्विष्टकृतमाहुवेम ॥ स्विष्टमग्ने अभितत्पृणाहि ॥ विश्वादेवपृ
तनाअभिष्य ॥ उरुंनःपंथांप्रदिशन्विभाहि ॥ ज्योतिष्मद्धेह्यजरंन एम
आयुः ॥४०॥ अग्नयेस्वाहा ॥ कृत्तिकाभ्यःस्वाहा ॥ अंबायैस्वाहा ॥ दुलायै २२९

स्वाहा ॥ नितत्न्यैस्वाहाभ्रयंत्यैस्वाहा ॥ मेघयंत्यैस्वाहा ॥ वर्षयंत्यैस्वा
हा ॥ चुपुणीकायैस्वाहा ॥१॥ प्रजापतयेस्वाहा ॥ रोहिण्यैस्वाहा ॥ रोच
मानायैस्वाहा ॥ प्रजाभ्यःस्वाहा ॥२॥ सोमायस्वाहा ॥ मृगशीर्षायस्वा
हा ॥ इन्वकाभ्यःस्वाहौषधीभ्यःस्वाहा ॥ राज्यायस्वाहाभिजित्यैस्वा
हा ॥३॥ रुद्रायस्वाहार्द्रायैस्वाहा ॥ पिन्वमानायैस्वाहा ॥ पशुभ्यःस्वा
हा ॥४॥ अदित्यैस्वाहा ॥ पुनर्वसुभ्यांस्वाहा ॥ भूत्यैस्वाहा ॥ प्रजात्यैस्वा
हा ॥५॥ बृहस्पतयेस्वाहा ॥ तिष्यायस्वाहा ॥ ब्रह्मवर्चसायस्वाहा ॥६॥

उदक० सर्पेभ्यः स्वाहाश्रेषाभ्यः स्वाहा। दंदशूकेभ्यः स्वाहा॥७॥ पितृभ्यः
१२० स्वाहा मघाभ्यः स्वाहानघाभ्यः स्वाहागदाभ्यः स्वाहारुंधतीभ्यः स्वा
हा॥८॥ अर्यम्णे स्वाहा फल्गुनीभ्यां स्वाहा॥ पशुभ्यः स्वाहा॥९॥
भगाय स्वाहा फल्गुनीभ्यां स्वाहा॥ श्रैष्ठ्याय स्वाहा॥१०॥ सवित्रे स्वा
हा हस्ताय। स्वाहा ददते स्वाहा पृणते स्वाहा प्रयच्छते स्वाहा प्रतिगृ
भ्णते स्वाहा॥११॥ त्वष्ट्रे स्वाहा चित्रायै स्वाहा चैत्राय स्वाहा प्रजायै राम
स्वाहा॥१२॥ वायवे स्वाहा निष्ट्यायै स्वाहा॥ कामचाराय स्वाहाभि १२०

जित्यै स्वाहा॥१३॥ इंद्राग्निभ्यां स्वाहा विशाखाभ्यां स्वाहा॥ श्रैष्ठ्या
य स्वाहाभिजित्यै स्वाहा॥१४॥ पौर्णमास्यै स्वाहा कामाय स्वाहागत्यै
स्वाहा॥१५॥ मित्राय स्वाहानूराधेभ्यः स्वाहा॥ मित्रधेयाय स्वाहा
भिजित्यै स्वाहा॥१६॥ इंद्राय स्वाहा ज्येष्ठायै स्वाहा। ज्यैष्ठ्याय स्वाहा
भिजित्यै स्वाहा॥१७॥ प्रजापतये स्वाहा मूलाय स्वाहा॥ प्रजायै स्वा
हा॥१८॥ अद्भ्यः स्वाहाषाढाभ्यः स्वाहा॥ समुद्राय स्वाहा कामाय स्वा
हा॥ अभिजित्यै स्वाहा॥१९॥ विश्वेभ्यो देवेभ्यः स्वाहाषाढाभ्यः स्वाहा।
अ

३२क अनुपज्य्यायु स्वाहा। जित्यै स्वाहा॥२०॥ ब्रह्मणे स्वाहा। अभिजिते स्वाहा

२२१ ॥ब्रह्मलोकायु स्वाहा। अभिजित्यै स्वाहा॥२१॥ विष्णवे स्वाहा। श्रोणायै

स्वाहा॥ श्लोकायु स्वाहा। श्रुतायु स्वाहा॥२२॥ वसुभ्यः स्वाहा। श्रविष्ठाभ्यः

स्वाहा॥ अग्रायु स्वाहा। परीत्यै स्वाहा॥२३॥ वरुणायु स्वाहा। शतभि

षजे स्वाहा॥ भेषजेभ्यः स्वाहा॥२४॥ अजायैकपदे स्वाहा। प्रोष्ठपदेभ्यः

स्वाहा॥ तेजसे स्वाहा। ब्रह्मवर्चसायु स्वाहा॥२५॥ अहये बुध्नियायु स्वा रम

हा। प्रोष्ठपदेभ्यः स्वाहा॥ प्रतिष्ठायै स्वाहा॥२६॥ पूष्णे स्वाहा। रेवत्यै स्वा २२१

हा। पशुभ्यः स्वाहा॥२७॥ अश्विभ्यां स्वाहा। अश्वयुग्भ्यां स्वाहा॥ श्रोत्रा

यु स्वाहा। श्रुत्यै स्वाहा॥२८॥ यमायु स्वाहा। अपभरणीभ्यः स्वाहा॥ राज्यायु

स्वाहा। अभिजित्यै स्वाहा॥२९॥ अमावास्यायै स्वाहा। कामायु स्वाहा। आग

त्यै स्वाहा॥३०॥ चन्द्रमसे स्वाहा। प्रतीदृश्यायै स्वाहा॥३१॥ अहोरात्रे

भ्यः स्वाहा। अर्धमासेभ्यः स्वाहा। मासेभ्यः स्वाहा। ऋतुभ्यः स्वाहा॥ संवत्सरा

यु स्वाहा। अह्ने स्वाहा। रात्रियै स्वाहा। अतिमुक्त्यै स्वाहा॥३२॥ उषसे

स्वाहा। व्युष्ट्यै स्वाहा। व्यूषुष्यै स्वाहा। व्युच्छन्त्यै स्वाहा। व्युष्टायै स्वाहा॥३३॥

उदक·नक्षत्राय स्वा हौदेष्युते स्वाहा। तुद्युते स्वाहा। दिताय स्वाहा। हर
१२२ से स्वाहा। भरसे स्वाहा॥ भ्राजसे स्वाहा। तेजसे स्वाहा॥ तपसे स्वाहा। ब्रह्म
वर्चसाय स्वाहा॥३४॥ सूर्याय स्वाहा। नक्षत्रेभ्यः स्वाहा। प्रतिष्ठायै स्वा
हा॥३५॥ अदित्यै स्वाहा। प्रतिष्ठायै स्वाहा॥३६॥ विष्णवे स्वाहा। यज्ञाय
स्वाहा। प्रतिष्ठायै स्वाहा॥३७॥ ॥दधिक्राव्णो अकारिषं जिष्णोरश्व
स्य वाजिनः॥ सुरभि नो मुखा करत्प्रण आयूंषि तारिषत्॥ आपो हि राम
ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ यो वः शिवतमो र १२२

सस्तस्य भाजयतेह नः॥ उशतीरिव मातरः॥ तस्मा अरंगमाम वो यस्य
क्षयाय जिन्वथ॥ आपो जनयथा च नः॥ यच्चिद्धि ते विशो यथा प्र देव
वरुण व्रतं॥ मिनीमसि द्यवि द्यवि। यत्किंचेदं वरुण दैव्ये जनेऽभि
द्रोहं मनुष्याश्चरामसि॥ अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादे
नसो देव रीरिषः॥ कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न
विद्म॥ सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः॥ हि
रण्यवर्णाः शुचयः पावकाः॰ भवंतु॥ यासां॰ राजा॰॥ भवंतु॥ यासां दे

उदक॰ वा॰ जैवंतु॥ जीवेनमा च॰ निधंत्र। पवमानः सुवर्जनः॥ पवित्रेण विचर्षे
२२३ णिः। यः पोता स पुनातु मा॥ पुनंतु मा देवजनाः। पुनंतु मनवो धिया॥ पु
नंतु विश्व आयवः॥ जातवेदः पवित्रवत्॥ पवित्रेण पुनाहि मा॥ शु
क्रेण देव दीद्यत्॥ अग्ने क्रत्वा क्रतूंरनु॥ यत्ते पवित्रमर्चिषि॥ अग्ने
विततमंतरा॥ ब्रह्म तेन पुनीमहे॥ उभाभ्यां देव सवितः॥ पवित्रेण
सवेन च॥ इदं ब्रह्म पुनीमहे॥ वैश्वदेवी पुनती देव्यागात्॥ यस्यै ब॒ राम
ह्वीस्तनुवो वीतपृष्ठाः॥ तया मदंतः सधमाद्येषु॥ वयं स्याम पतयो र २२३

यीणां॥ वैश्वानरो रश्मिभिर्मा पुनातु॥ वातः प्राणेनेषिरो मयोभूः॥ द्या
वापृथिवी पयसा पयोभिः॥ ऋतावरी यज्ञिये मा पुनीतां॥ बृहद्भिः स
वितस्तृभिः॥ वर्षिष्ठैर्देव मन्मभिः॥ अग्ने दक्षैः पुनाहि मा॥ येन देवा
अपुनत॥ येनापो दिव्यं कशः॥ तेन दिव्येन ब्रह्मणा॥ इदं ब्रह्म पुनी
महे॥ यः पावमानीरध्येति॥ ऋषिभिः संभृतं रसं॥ सर्वं स पूतमश्ना
ति॥ स्वदितं मातरिश्वना॥ पावमानीर्यो अध्येति॥ ऋषिभिः संभृतं
रसं॥ तस्मै सरस्वती दुहे॥ क्षीरं सर्पिर्मधूदकं॥ पावमानीः स्वस्त्यय

उदक० १२४

नीः॥सुदुघाहिपयस्वतीः॥ऋषिभिःसंभृतोरसः॥ब्राह्मणेष्वमृतंहि
तं॥पावमानीर्दिशंतुनः॥इमंलोकमथोअमुं॥कामान्समर्द्धयंतुनः॥
देवीर्देवैःसमाभृता॥पावमानीःस्वस्त्ययनीः॥सुदुघाहिघृतश्चुतः॥
ऋषिभिःसंभृतोरसः॥ब्राह्मणेष्वमृतंहितं॥येनदेवाःपवित्रेण॥आ
त्मानंपुनतेसदा॥तेनसहस्रधारेण॥पावमान्यःपुनंतुमा॥प्राजाप
त्यंपवित्रं॥शतोद्यामंहिरण्मयं॥तेनब्रह्मविदोवयं॥पूतंब्रह्मपुनी राम
महे॥इंद्रःसुनीतीसहमापुनातु॥सोमःस्वस्त्यावरुणःसमीच्या॥य १२४

मोराजाप्रमृणाभिःपुनातुमा॥जातवेदामोर्जयंत्यापुनातु॥१॥ ॥ॐ
भूर्भुवःसुवः॥तच्छंयोरावृणीमहे॥गातुंयज्ञाय॥गातुंयज्ञपतये॥
दैवीस्वस्तिरस्तुनः॥स्वस्तिर्मानुषेभ्यः॥ऊर्ध्वंजिगातुभेषजं॥शंनो
अस्तुद्विपदे॥शंचतुष्पदे॥नमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथि
व्यैनमओषधीभ्यः॥नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृह
तेकरोमि॥पुनर्हविः३॥ओंशांतिःशांतिः॥ ॥ॐइत्युच्छ्वाप्य॥ॐ
भूर्भुवःसुवःइतिसंस्कार्यंप्रोक्षति॥अथयजमानऋत्विग्भ्यःप्राग

दिशा दक्षिणेन हिरण्यं रजतं कंसं वास इति च ददाति॥ एवं ज्वरगृही
तानां ग्रहग्रहीतानां भूतोपसृष्टानां मित्रबंधुसुहृज्ज्ञातिसंबंधिबां
धवानां राज्ञां च राजपुरोहितानां च बालवृद्धगर्भिणीपापरोगीदी
र्घरोगी कन्यातुराणां हस्त्यश्वोष्ट्रगोमहिष्याजाविकाश्वस्थानां धनधा
न्यानां च प्रोक्षणं च एकरात्रं त्रिरात्रं पंचरात्रं सप्तरात्रं नवरात्रं वोदक
शांतिं कुर्यात्॥ ॥अपमृत्युपरिहारार्थमपि कुर्यात्॥ छ॥ इत्युदक एम

शांतिः॥ अथ प्रतिसरबंधप्रयोगः॥ नांदीमुखवर्जं ने प्रदोषांते शुचिः २२५

समं देशं गोचर्ममात्रमुपलिप्य तत्र प्राङ्मुख आचार्य उपविश्य देशका
लौ स्मृत्वा ऽमुककर्मांगभूतं प्रतिसरबंधं करिष्यामीति संकल्प्य॥
स्थंडिलं हस्तमात्रं कृत्वा उल्लिख्याद्भिरवोक्ष्य तस्मिन्प्रागग्रान्दर्भान्सं
स्तीर्य चतुरो ब्राह्मणानशुचीन्प्रतिदिशमासने षूपवेश्य ततो दर्भै
ष्प्रोक्षणीः संस्कृत्योदकुंभं पात्रांतरे शालितंडुलस्योपरि प्रतिस
रसूत्रं च प्रोक्ष्य स्थंडिले दर्भोपरि कुंभं निधाय परिस्तीर्य भूर्भुवः सुवः
॥ इति शुद्धोदकैरापूर्य यवाक्षतफलैरवकीर्य गंधपुष्पधूपदीपैरभ्य

प्रतिसर०
उदक
१२६

कुंभमभ्यर्च्यकुशैर्दूर्वाभिःप्र च्छाद्यतंतुनातः शालितंडुलोपरिप्रति
सरसूत्रंगंधानुलिप्तंनिधायाचार्यप्रमुखास्त्रीन्प्राणायामांधारयि
त्वोद कुंभमन्वारभ्यसावित्र्यादीन्जपेयुः॥ वेदादयः॥ अग्निमीळे०
त्तमं॥ इतिऋग्वेदस्यादिः॥ इषेत्वोर्जेत्वा० कर्मणे० इतियजुर्वेदस्य॥
अग्नआयाहिवी०षि॥ इतिसामवेदस्य॥ शन्नोदेवी० तुनः॥ इत्यथर्व
वेदस्यजपित्वा॥ वक्ष्यमाणमंत्रांजपेयुः॥ छ॥ कृणुष्वपाजः०॥ हंसःशु एम
चि०॥ मदैविदस्य० अदेवीः॥ अग्नेयशस्विन०सर्वे॥ हिरण्यवर्णाःशुच १२६

सा०ं राजा० यासांदेवा० शिवेनमा०धेनु॥ यददःसंप्रयतीरहावनद
ताहते॥ तस्मादानद्योनामस्थतावोनामानिसिंधवः॥ यत्प्रेषिताव
रुणेनताःशीभंसमवल्गत॥ तदाप्नोदिंद्रोवोयतीस्तस्मादापोअ
नुष्ठन॥ अपकामंस्यंदमानाअवीवरतवोहिकं॥ इंद्रोवःशक्ति
भिर्देवीस्तस्माद्वार्णामवोहितं॥ एकोदेवोअप्यतिष्ठत्स्यंदमानाय
थावशं॥ उदानिषुर्महीरितितस्मादुदकमुच्यते॥ आपोभद्रा०॥ साग
त०॥ आदित्पश्यां० यदावः॥ आपोहिष्ठा० चनः॥ दिविश्रयस्वांतरिक्षे

यत्तस्त्वपृथिव्यासंभवब्रह्मवर्चसमसिब्रह्मवर्चसायत्वा॥पवमानः
सुवर्जनेश्च्येतमनुवाकं॥उदुत्तमंवरुणपाशमस्मदवाधमंविमध्य
मंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदितयेस्याम॥अ
स्तभ्नाद्यामृषभोअंतरिक्षममिमीतवरिमाणंपृथिव्या आसीदद्वि
श्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानि॥यत्किंचेदंवरु
णदैव्येजनेभिद्रोहंमनुष्याश्चरामसि॥अचित्तीयत्तवधर्मायुयो राम
पिममानस्तस्मादेनसोदेवरीरिषः॥कितवासोयद्रिरिपुर्नदीवियद्व १२७

घासत्यमुतयन्नविद्म॥सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरु
णप्रियासः॥अवतेहेडोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः॥
२ क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानि॥तत्त्वाया
मि॰ प्रमोषीः॥परिणोरुद्रस्यहेतिं॰ मृडय।स्तुहिश्रुतं॰सेनाःमी
ढुष्टमशिं॰दागहि॥अर्हन्बिभर्षिसायकानिधन्व र्हन्निष्कंय
जतंविश्वरूपं॥अर्हन्निदंदयसेविश्वंभ्भुवं नवाओजीयोरुद्र
त्वदस्ति॥त्वमग्नेरुद्रोअसुरोमहोदिवः॰ नुत्मना॥आवोराजान

प्रतिसर०
उदक०
१२९

मध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः॥अग्निंपुरातनयित्नोर
चित्ताद्धिरण्यरूपमवसेकृणुध्वं॥ब्रह्मजज्ञानंप्र०॥ब्रह्मसमिद्धव
स्वाहुतीनांइत्यंतं॥विष्णोर्नुकं०गायः॥तदस्य०उरुः॥प्रतद्विष्णु०
विरूपाःपुरोमात्रया०विष्णो॥विचक्रमे०चकार॥त्रिर्देवः०विचक्रमे
गृतर्चे संमहित्वा॥प्रविष्णुरस्तुतवसस्तवीयांत्वेषंह्यस्यस्थवि
रस्यनाम॥जातवेदसे०त्वग्निः॥तामग्नि०तरसेनमः॥अग्नेत्वंपारया० एम
शंयोः॥विश्वानिनो०तनूनां॥पृतनाजितंसहमा० अग्निः॥छ॥ ॥ १२९

हिरण्यवर्णामितिपंचदशर्चंपुरुषानहमित्यंतं॥भूर्भुवःसुवः॥त
च्छंयोरावृणीमहे॥गातुंयज्ञाय॥गातुंयज्ञपतये॥दैवीस्वस्तिर
स्तुनः॥स्वस्तिर्मानुषेभ्यः॥ऊर्ध्वंजिगातुभेषजं॥शन्नोअस्तुद्वि
पदे॥शंचतुष्पदे॥ नमोब्रह्मणेनमोअस्त्वग्नये नमः पृथिव्यै
नमओषधीभ्यः॥नमोवाचेनमोवा चस्पतयेनमोविष्णवेबृहते
करोमि।इतित्रिः॥सर्वेप्रणवे
नोदकुंभमुत्थाप्य॥व्याहृतिभिःसुरभिमत्याअ लिंगाभिः सूत्रं

प्रतिसर०

२२९ यजमानंचप्रोक्षंति॥ततः सूत्रमादायतत्रवासुकीं ध्यात्वात्र्यंबक
मंत्रेणत्रिर्भस्मना संमृज्य॥यजमानस्यदक्षिणकरंगृहीत्वा॥अग्नि
रायुष्मान्त्सवनस्पतिभिरायुष्मांतेनत्वायुषायुष्मंतंकरोमि॥सो
मृत्र्या०५बृहत्सामक्षत्रभृ द्वृद्धवृष्णियंत्रिष्टुभौजः शुभितमुग्र
वीरं॥इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्ष॥इति
बध्नीयात्॥स्त्रीणांवामकरेत्र्या युष्मतींविशेषः॥तस्मिन्घृ एम
तसूक्तेनरक्षांकुर्यात्॥तच्च॥योब्रह्माब्रह्म णउज्जभारप्राणैस्त्र्यं २२९

मिति२

रः कृत्तिवासाः पिनाकी॥ईशानोदेवः सनआयुर्दधातुतस्मैजुहो
मिहविषाघृतेन॥विभ्राजमानः सरिरस्यमध्या द्रो चमानोघ
र्मरुचिर्यआगात्॥समृत्युपाशादपनुद्यघोरादिहायुषेघृतमं
तुदेवः॥ब्रह्मज्योतिर्ब्रह्मपत्नीषुगर्भंयमादधात्पुरुरूपंजयंतं
सुवर्णरंभग्रहमर्कमर्च्यंतमायुषेवर्द्धयामोघृतेन॥श्रियंलक्ष्मी
मौपलामंबिकांगांषष्ठींजयामिंद्रसेनेत्युदाहुः॥तांविद्यांब्रह्म
योनिंसरूपामिहायुषेतर्पयामोघृतेन॥दाक्षायण्यः सर्वयोन्यः सर्वोन्यः

त

सहस्रशो विश्वरूपा विरूपाः ॥ ससूनवः सपत्नयः स्त पृथ्व्या आयुषेनो
घृतमिदं जुषंतां ॥ विद्या गुणा बहुरूपाः पुराणा आयुश्छिदो नः प्र
मथंतु वीरान् ॥ तेभ्यो जुहोमि बहुधा घृतेन मानः प्रजां रीरिषो
मोत वीरान् ॥ एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गो
पाः ॥ यमप्येति भुवनं सांपराये स नो हविर्घृतमिहायुषेत्तु देवः ।
वसूंत्रुद्रानादित्यान्मरुतोथ साध्यानृभूक्षान् गंधर्वांश्च पितृंश्च एम
विश्वान् ॥ भृगून्सर्पाश्चांगिरसोथ सर्वान् घृतं हुत्वा स्वायुषे म १३०

न्यू२

हया मह्यामश्वत् ॥ इत्यष्टर्चेन रक्षां कुर्यात् ॥ सर्वे प्रणवेनोदकुंभमु
त्थाप्य यजमानं व्याहृतिभिः सुरभिमत्या लिंगाभिर्वारुणीभिः
पावमानीभिर्हिरण्यवर्णाभिर्व्याहृतिभिः प्रोक्षंति ॥ तैरेव तं प्र
भाते स्नापयेत्क्रमेतः ॥ १३ ॥ आचार्यविरहे कर्ता [illegible]ध्वर्युरेव रो
मूह वा ॥ आयुष्मतीमिति न्याहरुद्रं विदस्त्रियइति गोपालः ॥ अथ द
क्षिणां ददाति ॥ सुवर्णं रजतं कांस्यं वा सश्चैव यथाक्रमं ॥ विप्रेभ्य उ
पविष्टेभ्यो दद्यात्स्वतिदिक्षां बुधः ॥ पुरस्तादुपविष्टाय हिरण्यं दक्षि

प्रतिसर॰

२३१ णतोरजतं पश्चात्कंसमुत्तरतोवासः॥आचार्यायदक्षिणांददाति
॥ग्रहगृहीतानांज्वरगृहीतानांभूतानांभूतोपसृष्टानांमित्रबंधुसु
श्रा हृदितिसंबंधिबांधवानांराज्ञांचराजपुरोहितानांबालवृद्धानांतर्ष
ल्लीपापरोगीदीर्घरोगीकृशातुरान्प्रोक्षतिदस्यश्वोवृगोमहिष्या
जाविकप्रभृत्यांश्चधनधान्यानिचप्रोक्षत्येवमेकरात्रंत्रिरात्रंपंच
रात्रंसप्तरात्रंनवरात्रंचैकादशरात्रंवेत्यपमृत्युंजयतीत्याहभ एम
गवान्बौधायनः॥छ॥इतितंत्रेणोदकशांतिसमानप्रतिसरबंध २३१

प्रयोगः॥छ॥श्रीरस्तु॥ ॥अथश्वोभूतेप्रातरौपासनंहुत्वापवना
दिविधायपुण्याहंवाचयेत्।तत्राग्न्यादयःप्रीयंतामितिविशेषः
ततऔपासनस्यपश्चाद्दर्भपाणिर्दर्भेषूपविशतिदक्षिणापत्नी
यजमानस्योत्तरतऋत्विजःप्राङ्मुखाउपविशंति॥यजमानः॥प
त्न्यासहप्राणानायम्यविष्णुंध्यात्वादेशकालौसंकीर्त्ययाःपुर
स्तादित्यादिनिविष्टमित्यंतेसर्वकामसिद्धिद्वाराश्रीपरमेश्वरप्री
तिकामोवसंतेऽमुकनक्षत्रेऽमुकपर्वणिअग्नीनाधा .स्यइतित्रि

१३२ रूपांश्चत्रिरुच्चैर्वदेत्॥तन्मऋध्यतामित्याद्युक्तेवरणार्हाःतत्तऋ
ध्यतामितिप्रतिब्रूयुः॥ॐतथेत्यंतेस्वशाखयावरणमधुपर्कौ
कुर्यात्॥ब्रह्माणमेवप्रथमंवृणीते॥अथहोतारं॥अथाध्वर्युं
॥अथाग्नीध्रं॥चंद्रमामेब्रह्मासमेब्रह्माब्रह्माणंत्वादेवदत्तश
र्माणंवृणे इतिब्रह्माणं॥सवृतोजपति॥महन्मेवोचोभर्गो
मेवोचोभर्गोमेवोचोयशोमेवोचुःस्तोमंमेवोचुःक्लृप्तिंमेवोचोभु राम
क्तिंमेवोचुस्तृप्तिंमेवोचुःसर्वंमेवोचइति॥चंद्रमास्तेब्रह्मासते

ब्रह्माब्रह्माहंतेमानुषइतिप्रतिजानीते॥अग्निर्मेहोतासमेहोता
होतारंत्वामुकशर्माणंवृणे इतिहोतारं॥सजपति॥महन्मेवो
चइति॥अग्निष्टेहोतासतेहोताहोताहं तेमानुषइतिप्रतिजा
नीते॥आदित्योमेध्वर्युःसमेध्वर्युरध्वर्युंत्वारामचंद्रशर्माणं
वृणे इत्यध्वर्युं॥महन्मेवोचो०॥आदित्यस्तेध्वर्युःसतेध्वर्यु
रध्वर्युरहंतेमानुषइति॥अस्मिन्नग्न्याधानकर्मणिआग्नीध्रं
त्वावृणे इत्याग्नीध्रं॥अहंवृतोस्मीति॥अथमधुपर्कः॥पाद्या

२३२ थेंअर्घ्यार्थमंत्रवत्त्रिराचमनार्थंशुद्धाचमनीयार्थंचजलपात्र
चतुष्टयंमधुदधियुक्तंमधुपर्कपात्रंपंचविंशतिदर्भात्मकंवाम
वर्त्तनावेष्टितंविष्टरंगांचेतिप्रत्यृत्विजंसंपाद्य॥विष्टरोविष्टरो
विष्टरइतियजमानेनप्रत्येकंनिवेदिते॥ऋत्विजःस्वहस्तेगृही
त्वा॥अहंवर्ष्मसजातानांविद्युतामिवसूर्यः॥इदंतमधितिष्ठा
मियोमाकश्चाभिदासतिइत्यग्रेविष्टरंउपवेशयेयुः॥पाद्यमिति एम
त्रिर्निवेदितेदक्षिणंपादंपूर्वंप्रक्षालयेयुःपश्चात्सव्यं॥लौकिके २३३

नजलेनाचम्य।अर्घ्यमितित्रिरुक्तेतदंजलिनाप्रतिगृह्य।आच
मनीयमितित्रिर्निवेदितेतदेकदेशंगृहीत्वाअमृतोपस्तरणम
सीतिपीत्वाचम्यमधुपर्कइतित्रिर्निवेदितेमित्रस्यत्वाचक्षुषा
प्रतीक्षेइतितंसमीक्ष्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंजलिनाप्रतिगृह्यमधुवाता
ऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नःसंत्वोषधीः॥मधुनक्तमु
तोषसोमधुमत्पार्थिवंरजः॥मधुद्यौरस्तुनःपिता॥मधुमान्नोव

१३४ नुस्पतिर्मधुमांअस्तुसूर्यः। माध्वीर्गावोभवंतुनः॥ इतितृचेनावे
क्ष्यसव्येपाणौकृत्वाअनामिकयाचांगुष्ठेनचत्रिःप्रदक्षिणमा
लोड्यवसवस्त्वागायत्रेणछंदसाभक्षयंत्वित्यंगुलिलेपंपात्रस्य
पुरस्तान्निमृज्य॥रुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंत्विति दक्षिण
तः॥अपउपस्पृश्य॥आदित्यास्त्वाजागतेनछंदसाभक्षयंत्विति
पश्चात्॥विश्वेत्वादेवाआनुष्टुभेनछंदसाभक्षयंत्वित्युत्तरतः॥ एम
भूतेभ्यस्त्वेतिमध्यात्त्रिःपात्रांतरेउद्धृत्यमधुपर्कपात्रंभूमौनिधा १३४

ति

यं विराजोदोहोसीप्रथमगृहीतंप्राश्याचंम्य॥ विराजोदोहम
शीयेति द्वितीयंप्राश्याचम्य॥ मयिदोहःपद्यायैविराजइतितृ
तीयंप्राश्याचंम्यपात्रस्थंब्राह्मणायदत्वाप्सुवाक्षिपेत्‌अमृता
पिधानमसीत्याचमनीयंपीत्वाचंम्य॥ सत्यंयशःश्रीर्मयिश्रीःश्र
यतामितिपुनःपीत्वाचंम्य॥ गौर्गौर्गौः इतित्रिरुक्तेमातारुद्राणा
मित्यस्यभार्गवोजमदग्निर्गौस्त्रिष्टुप्॥ गोरुत्सर्जनेवि॰॥ मातारु
द्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः॥ प्रनुवोचं

आ०

१३५ चिकितुषेजनायमागामनागामदितिंवधिष्टेतिजपित्वाओमुत्सृ
ते जेतिब्रूयुः॥यजमानोमधुपर्कांगपूजनंकुर्यात्॥तत्रगंधमाल्यव
स्त्रोपवीताभरणादीनीतिक्रमः॥छ॥इतिमधुपर्कःसमाप्तः॥छ॥
अथऋत्विजोजघनेनगार्हपत्यमुपविश्यजपंति॥इडादेवहूर्म
नुर्यज्ञनीर्बृहस्पतिरुक्थामदानिशंसिषद्विश्वेदेवाःसूक्तवाचः
पृथिविमातर्मामाहिंसीर्मधुमनिष्येमधुजनिष्येमधुवक्ष्यामिम
धुवदिष्यामिमधुमतींदेवेभ्योवाचमुद्यासंशुश्रूषेण्यांमनुष्ये १३५

भ्यस्तंमादेवाअवंतुशोभायैपितरोनुमदंतु॥इतिततोयजमा
नःपत्न्यासहतीर्थेनप्रपद्यास्तेब्रह्मातीर्थेनप्रविश्यमंत्रेणनिर
सनोपवेशनेकुर्यान्नब्रह्मजपं॥अथाध्वर्युःस्फ्यमादायवेद्यु
त्करयोर्मध्येनप्रपद्ययजमानपत्नीभ्यामन्वारब्धोजघनेनगार्ह
पत्यंतिष्ठन्प्रागवसानंस्फ्येनगार्हपत्यायतनमुद्धंति॥उद्धन्य
मानमस्याअमेध्यमपपाप्मानंयजमानस्यहंतु॥शिवानःसंतुप्र
दिशश्चतस्रःशंनोमातापृथिवीतोकसाता॥इतिआयतनसंस्को

आ॰ १३६ ष्मंत्रान्यजमानोपिब्रूयात॥अपउपस्पृश्य॥आयतनमद्भिरवो
क्षति॥न्युब्जपाणितलेनसेकोवोक्षणं॥शन्नोदेवीरभिष्टयआपो
भवंतुपीतये॥शंयोरभिस्रवंतुनः इति॥उद्धननप्रभृतिविराजक्र
मोपस्थानांतंसर्वंयाजमानं॥एवंदक्षिणाग्न्याहवनीययोरुद्धन
नावोक्षणेकृत्वावेद्युत्करावंतरेणोदङ्निष्क्रम्यपुरुषांतरेसहा
यःसंभारानाहरति॥पूर्वमेवाहृतान्वांतत्रवेदिनिधायमंत्रैःसंभर
ति॥वैश्वानरस्यरूपंपृथिव्यांपरिस्रुताःस्योनमाविशंतुनः॥इति १३६

सिकताः।यदिदंदिवोयददःपृथिव्याःसंजज्ञानेरोदसीसंबभूव
तुः॥ऊषान्कृष्णमवतुकृष्णमूषाइहोभयोर्यज्ञियमागमिष्ठाः।इ
त्यूषान॥ऊतीःकुर्वाणोयत्पृथिवीमचरोगुहाकारमाखुरूपंप्र
तीत्य॥तत्तेन्यक्तमिहसंभरंतःशतंजीवेमशरदःसवीराः।इत्या
खूत्करं॥ऊर्जंपृथिव्यारसमाभरंतःशतंजीवेमशरदःपुरूचीः।
वम्रीभिरनुवित्तंगुहासुश्रोत्रंतउर्व्यबधिराभवामः॥इतिवल्मी
कवपां॥प्रजापतिसृष्टानांप्रजानांक्षुधोपहत्यैसुवितंनोअस्तु॥

उपप्रभिन्नमिषमूर्जं प्रजाभ्यः सूदं गृहेभ्यो रसमाभरामि॥ इति सू
दं॥ यस्य रूपं बिभ्रदिमामविन्दद्गुहा प्रविष्टां सरिरस्य मध्ये। त
स्येदं विहतमाभरंतोऽच्छंबट्कारमस्यां विधेम॥ इति वराहविहतं
॥ यत्पर्यपश्यत्सरिरस्य मध्य उर्वीमपश्यज्जगतः प्रतिष्ठां॥ तत्पु
ष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनं हरामि॥ इति पुष्क
रपर्णं॥ याभिरदृंहज्जगतः प्रतिष्ठामुर्वीमिमां विश्वजनस्य भ
र्त्रीं॥ ता नः शिवाः शर्कराः संतु सर्वाः॥ इति शर्कराः॥ अग्नेरेतश्चं

इदं हिरण्यमद्भ्यः संभूतममृतं प्रजासु॥ तत्संभरन्नुत्तरतो निधायाऽ
ति प्रयच्छं दुरितिं तरेयं॥ इति हिरण्यशकलानि॥ अश्वो रूपं कृत्वा
यदश्वत्थेऽतिष्ठः संवत्सरं देवेभ्यो निलाय॥ तत्ते न्यक्तमिह संभर
तः शतं जीवेम शरदः सवीराः॥ इत्यश्वत्थं॥ ऊर्जः पृथिव्या अध्यु
त्थितोऽसि वनस्पते शतवल्शो विरोह॥ त्वया वयमिषमूर्जं म
दंतो रायस्पोषेण समिषा मदेम॥ इत्यौदुंबरं॥ गायत्रिया ह्रियमा
णस्य यत्ते पर्णमपतत्तृतीयस्यै दिवोऽधि॥ सोऽयं पर्णः सोमपर्णाद्धि

आ· २३८ ज्ञातस्ततोहरामिसोमपीथस्यावरुध्यै॥देवानांब्रह्मवादंवद
तांयदुपाशृणोःसुश्रवावैश्रुतोसि॥ततोमामाविशतुब्रह्मव
र्चसंतत्संभरंस्तदवरुंधीयसाक्षात्॥इतिद्वाभ्यांपर्णमयं॥
ययातेसृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिः॥तामिमामप्रदाहा
यशमींशांत्यैहराम्यहं॥इतिशमीं॥यत्तेसृष्टस्ययतोविकं
कतंभाआर्छज्जातवेदः॥तयाभासासंमितउरुन्नोलोकम
नुप्रभाहि॥इतिविकंकतं॥यत्तेतांतस्यहृदयमाच्छिंदंजातवेदो २३८

मरुतोद्भिस्तमयित्वा॥एतत्तेतदरणेःसंभरामिसात्माअग्नेसहृ
दयोभवेह॥इत्यशनिहतं॥चित्रियादश्वत्थात्संभृताबृहत्यः
शरीरमभिसंस्कृतास्थ॥प्रजापतिनायज्ञमुखेनसंमितास्तिस्र
स्त्रिवृद्भिर्मिथुनाःप्रजात्यै॥इतिचित्रियाश्वत्थस्यसमिधः॥यातेअ
ग्नओजस्विनीतनूरोषधीषुप्रविष्टातांतइहसंभरामि॥इतिमुं
जकुलायं॥अश्वत्थाद्धव्यवाहाद्द्विजातामग्नेतनूंयज्ञियांसं
भरामि॥शांतयोनिंशमीगर्भमग्नयेप्रजनयितवै॥योश्वत्थः

२३९ शमीगर्भश्रारुरोहत्वेसचा॥ तंतेहरामिब्रह्मणायज्ञियैःकेतुभिः
सह॥ इतिद्वाभ्यांअरणीस्फ्यादीनिच॥ संभृतान्संभारानपुनर्मं
त्राहृत्याक्रमेणसंभरति॥ यंत्वासमभरंजातवेदोयथाशरीरंभू
तेषुन्यक्तं॥ ससंभृतःसीदशिवःप्रजाभ्यउरुन्नोलोकमनुनेषि
विद्वान्॥ इतिअरणीस्फ्यादिमुंजकुलायचित्रियाश्वत्थसमिद्धि
रण्यशकलभिन्नांस्त्रेधाविभज्यनिदधाति॥ छ॥ ॥अथगोपि
तृयज्ञः॥ अध्वर्युः॥ विहारस्यदक्षिणतःपरिश्रितेदेशेप्राङ्मुख २६९

उषांप्रज्ञातांनिदधाति २

स्यासीनस्ययजमानस्यश्मश्रुवपनंकृत्वोपपक्षानुस्यादक्षिण
गोदानप्रदेशेतुर्ध्वाग्राणित्रीणिदर्भपिंजूलानिनिधायकेशवप
नादिनखनिकृंतनांतंकरोति॥ केशवपनेमंत्रः॥ वपुस्तुवपेदेवे
नसवित्राप्रसूतोब्रह्मणासंशितोदं॥ इतियजमानःपूर्ववदुप
विशति॥ इतियजमानेउप्तदेशमनुमंत्रयते॥ यानिमइत्तउर्ध्वेलो
मानितानिमेस्वस्तयेसंतु॥ इतिपत्न्याअपिमंत्रवर्जंकेशव्यतिरि
क्तोपपक्षादिवापनमितिकेचित्नेत्यन्ये॥ यजमानमुदकुंभेनाभिषिं

१४० चन्वाचयति॥इमामुआपंशिवाःसंतुदुष्कृतंप्रवहंतुमे॥शुद्धाःप्र
युंजीमहिक्रतून्नइति॥पत्नीचतूष्णींस्नापयति॥स्नातौपत्नीय
जमानौस्नानस्थानात्प्रागदेशंगत्वाहतेवाससीपरिधायमानुषेण
ऽलंकारेणालंकृत्यांजाते॥हेमभूषणसंपन्नःशुभ्रवस्त्रानुलेपनः
।सुगंधिकुसुमैर्जुष्टोदिव्योलंकारउच्यते॥सएवपुष्परहितःसां
जनोमानुषःस्मृतः॥अथाध्वर्युरेकविंशत्यादर्भपिंजूलैस्त्रेधा
विभक्तैर्यजमानयोःशिरोनाभिगुल्फदेशंतूष्णींक्रमात्पावयित्वो १४०

दपात्रमादायनैर्ऋत्यांदिशिगत्वाचतुष्पथेशुचिप्रदेशेनिहि
तोदपात्रेआत्मानमवेक्षमाणंयजमानंवाचयति॥सिंऽहेमैमनु मे
रित्यनुवाकं॥पत्न्यपितूष्णीमवेक्षते॥ब्रह्माचनिरसनोपवेशा
नेकृत्वादक्षिणतआसीत॥अथैनाआपोंजलिनोपगृह्णाति।
सुमित्र्यानआपओषधयःसंतु इति॥नैर्ऋत्यांनिरस्यति॥दुर्मि
त्र्यास्तस्मैऽहिष्मइति॥अपउपस्पृश्य॥पात्रंपरास्यानवेक्षमाणा
आयंति॥अनुवाकांतेध्वर्युर्निर्ऋत्यामापोनिनीयपात्रंपरास्य

१४२ तीतिकेशवः॥अपसव्यमाहृत्यगमनेप्रदक्षिणमाहृत्यागमनं।
गृहमागत्यहस्तपादौप्रक्षाल्याचामति॥अथाध्वर्युःपवमानःसु
वर्जनइत्यनुवाकंयजमानंवाचयन्नात्मानंपत्नीयजमानौचा
द्भिःप्रोक्षति॥ततोयजमानःप्राचीनावीतीगोपितृयज्ञंकरिष्य
इतिसंकल्प्यश्रोत्रियागारादग्निमाहृत्यान्वाहार्यपचनेनिधाय
परिषिच्यपरिस्तीर्याज्यंसंस्कृत्यस्रुवंसंमृज्याग्नौसमिधमाधा
यस्रुवाहुतिंजुहुयात्॥वनेत्वादित्यारुद्रावसवःसमिंधतांपु १४२

नरंब्रह्माणोवसुनीथयज्ञैः॥घृतेनत्वंतनुवोवर्द्धयस्वसत्याःसंतु
यजमानस्यकामाःस्वाहा॥आदित्येभ्योरुद्रेभ्योवसुभ्यइदं॥
अथाग्निंज्वालयित्वापरिस्तीर्यपवित्रेकृत्वाग्नेरुत्तरतआज्य
स्थालींस्रुवंचसादयित्वाप्रोक्ष्याज्यंसंस्कृत्यतदग्नेरुत्तरतःस्रु
वंचचतुरुदकुंभानौडुंबरींदर्वींचसादयेत्॥अग्नेर्दक्षिणतः
सकृदाच्छिन्नंबर्हिः॥एरकोपबर्हणे॥अंजनाभ्यंजने।लौकिका
ज्यंपात्रांतरेस्पंदेशाव्यतिरिक्तंसूत्रंप्रक्षालितेनोलूखलमुस

१४२ लेकृष्णाजिनं शूर्पं च स्थालीमेक्षणं आज्यस्थालीं प्रोक्षणीमिति
दक्षिणापवर्गमासादयेत्॥ क्षत्रियकर्तृके त्वेरकादीनां दक्षि
णतः स्फ्येनोद्धृत्यावोक्ष्यैकोनपंचाशद्दक्षान् वैभीतकानासाद
येदिति विशेषः॥ एरकादीनां मेक्षणांतानां ब्राह्मणकर्तृके एरका
दीनां क्षत्रियकर्तृके न दक्षिणस्था — ः॥ दक्षिणत इति व्यवस्था
दक्षिणतः स्फ्येन दक्षिणापवर्गं सकृद्देवरेखारूपेणोद्धंति। अ
पहता असुरा रक्षांसि पिशाचा ये क्षयंति पृथिवीमनु॥ अन्यत्रेतो १४२

गच्छंतु यत्रैतेषां गतं मनः॥ इति तत्राङ्गिरवोक्षति॥ उदीरतामवर
उत्परास उन्मध्यमाः पितरः सोम्यासः॥ असुं य ईयुरवृका ऋतज्ञा
स्ते नोवंतु पितरो हवेषु॥ अथोल्मुकमादत्ते॥ य आददाना स्वध
या नवानि पित्र्याणि रूपाण्यसुराश्चरंति॥ पुरापुरो निपुरो ये भरं
त्यग्निष्टान् स्मात्प्रणुनोक्तु यज्ञादिति॥ तेनोद्धतं देशमभितपति।
अग्निः पावकः सुदिनो निकृण्वन्नितो असुरान्नुदतादूरमोकसः। पि
तॄणां ये वर्णकत्वे दभागमिच्छंतः इति॥ उल्मुकमग्निसमीपे पृथङ्कि

१४३ दध्यात्॥तस्मिन्नाज्यबिंदून्प्रश्चोतयति॥ततउद्धृतदेशे दक्षिणा
ग्रं बर्हिस्तृणाति॥मुक्ताच्छिन्नं बर्हिरूर्णामृदुस्योनं पितृभ्यस्त्वा
स्तृणाम्यहं॥अस्मिन्सीदंतु मे पितरः सोम्याः पितामहाः प्रपिताम
हाश्चानुगैः सह॥अथ बर्हिर्दत्तः प्रह्वः प्रांजलिरुत्थाय दक्षिणा
मुखः पितॄन्नावाहयति॥उदीरणादिह संतु नः सोम्याः पितरः पि
तामहाः प्रपितामहाश्चानुगैः सह॥असुंगमाः सत्ययुजो वृकास
आनो हवं — पितरो घागमंतु॥एहगच्छंतु पितरो हविषे अत्तवे। १४३

अस्मिन्यज्ञे बर्हिष्या निषद्य मावीरः प्रमायुनक इति॥बर्हिर्निधाय
पितृणां पुरस्ताद्दक्षिणतो वा एरकोपबर्हणे दक्षिणोत्तरे निदधा
ति॥आसनं स्नायनं चेमं तयोः सोम्यास आगताः॥प्रियजनाय
नो भूत्वा शिवा भवथ शंकराः इति॥उदकुंभादित्येकोदकुंभार्द्धे
न तूष्णीं बर्हिर्मार्जयति॥अथैभ्यः पानमाहरति॥सक्तूनद्भिः पय
सा वा मिश्रयित्वा द्वेधा विभज्यार्द्धं ब्राह्मणेभ्यो दत्त्वार्द्धं पितृभ्यो
दद्यात्॥एतद्वः पितरः पितामहाः प्रपितामहाः पानमिति।पूर्वमा

गोपि॰

श्रा॰ २४४ र्जितशेषोदकुंभादीनतल्लीमार्जयंति॥अथक्षत्रियश्चेत्पूर्वोत्सा
दिताक्षैर्दिव्यति।तद्विधिश्चेदृशः आसादिताक्षाणांपरितःपिता
पुत्राःपूर्वादिक्रमेणप्रादक्षिण्येनपरस्पराभिमुखायथाज्येष्ठमु
पविशंति॥त्रिभ्योधिकाःपुत्राश्चेत्तदुत्तरतः॥तेनैवक्रमेणाक्षा
नपकर्षंति॥तत्र१पिताद्वादशद्वादशान्यो॥१३॥इतरः।सवि
षमाकर्षणात्पराजितः।उदगुपविष्टाबहवश्चेत्तेभागिनः॥य एम
दिद्वावेवपुत्रौप्राक्दक्षिणपश्चिमादुपविश्य॥चतुर्विंशतिद्वि २४५

एहृत्यापिताकर्षति द्वादशज्येष्ठः॥अतिशिष्टानितरः॥यद्येकः
पुत्रोजायाहृतीयाचतुर्विंशतिःपतिः॥द्वादशजायापराजयःपुत्र
स्यैव।यदिनपुत्रःजायापतीआहृत्याकर्षतःपत्नीपराजिता॥य
द्येकःपुत्रोबह्व्यःपत्न्यःभगिन्योभवंति॥यद्यपुत्रेद्वेपत्न्यौभा
गिन्यावेव।अपत्नीकाधानेतुपितापुत्राः।पितापुत्रौ॥पुत्राभावे
न्यःकश्चिदितिकेचित्॥नद्यूतमित्यन्ये॥द्यूतावसानेकृतंहत
मितिजपंति॥एवंत्रिरा हृत्याकुर्वंति॥ततोद्यूतओदनइत्युक्तो

स्थायपरएजितादोदनपर्याप्तंद्रव्यंगृहीत्वाचरुंनिर्वपेत्॥ब्राह्म
णकर्तृकेघृताभावान्मार्जनोत्तरमेव॥शूर्पेसकृदेव॥पितृभ्य
स्त्वापितामहेभ्यस्त्वाप्रपितामहेभ्यस्त्वाजुष्टमुपाकरोमीति॥त
भ्यं तःप्रोक्षणीभिःसकृदेवपितृस्त्वापितामहेभ्यस्त्वाप्रपितामहेभ्य
जुष्टं स्त्वाप्रोक्षामीतिप्रोक्षति॥निर्वापप्रोक्षणेतूष्णींवा॥अथकृष्णा
जिनेउलूखलंकृत्वामुसलेनावहत्यसुपत्नीकृतान्प्रक्षाल्यतंडु
लोदकंपात्रांतरेनिधायचरुमधिश्रित्याज्यंचोभयंपर्यग्निकृत्वा १४५

चरोरुपरिप्रभूतमाज्यमानीयदर्वीस्रुवौसंमृज्याज्यस्थाल्याज्ये
नचरुमभिघार्योदगुद्वास्यहोमार्थंचरोरेकंपिंडमाहुतित्रयप
र्याप्तंपात्रांतरउद्धृत्यआज्यस्थाल्याज्येनपंचस्रुवाहुतीर्जुहो
ति॥याःप्राचीःसंभवंत्यापउत्तरतश्चयाः॥अद्भिर्विश्वस्यभुवने
स्यधर्त्रीभिरंतरन्यंपितुर्दधेस्वधानमःस्वाहा॥पित्रइदं०॥अंत
र्दधेपर्वतैरंतर्मह्यापृथिव्या॥दिवादिग्भिरनंताभिरूतिभिरंत
रन्यंपितामहाद्दधेस्वधानमःस्वाहा॥पितामहायेदं०॥अंतर्दध

श्रा॰ १४६ ऋतुभिः सर्वैरहोरात्रैः ससंधिकैः। अर्द्धमासैश्च मासैश्चांतरन्त्यं प्रपि
तामह हा दद्धे स्वधा नमः स्वाहा॥ प्रपितामहायेदं॰॥ यन्मे माता प्रलु
लोभ चरत्यननुव्रता॥ तन्मे रेतः पिता वृङ्क्तामाभुरन्योपपद्यतां स्व
धा नमः स्वाहा॥ पित्र इदं॰॥ यहंः क्रव्यादं गमदवल्लोकान्प्रणु
णयं जातवेदाः॥ तद्वो अहं पुनरावेशयाम्यरिष्टाः सर्वैरंगैः संभवं
तु पितरः स्वधा नमः स्वाहा॥ पितृभ्य इदं॰॥ तत उद्धृतं पिंडं त्रेधा वि
भज्यौडंबर्या दर्व्या जुहोति॥ सोमाय पितृमते शुष्मिणे जुहुमो ह् १४६

विः। वाजिन्निदं जुषस्व नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः
स्वाहा॥ सोमाय पितृमत इदं न मम इति प्रथमं॥ अंगिरस्वंत मूतये २
युमं पितृमंतमाहुवे॥ वैवस्वतेदमह्निनः स्वजा हव्यं देवेभ्यः पि
तृभ्यः स्वधा नमः स्वाहा॥ यमायांगिरस्वते पितृमत इदं॰॥ यदग्ने
कव्यवाहन पितॄन्यक्षस्यृ तावृधः॥ प्रदेवेभ्यो वह हव्यं पितृभ्यः
स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा॥ अग्नये कव्यवाह
नायेदं॰॥ इति तृतीयां हुत्वा दर्वीमग्नौ निधाय स्थालीस्थ चरुतः

पिंडत्रयंकृत्वाद्वितीयोदकुंभार्द्रोदकेनकुशेषुस्थानत्रयेतूष्णीं
मार्जयित्वाहस्तेस्रुवेणोपस्तीर्यतत्रप्रथमंपिंडंनिधायाभिघार्यो
स्तीर्णेबर्हिषिदद्यात्॥एतत्तेतत्तदेवशर्मन्येचत्वामनुयांश्चत्व दत्त
मत्रान्वस्यैषातेततस्वधाक्षिति यावतीपृथिवीतावतीतेमात्रा
तावतीतएतांमात्रांभूतांददामिपृथिव्यामितमसित्ततायमाक्षे
ष्ठाइति॥एतत्तेपितामह अमुकशर्मन्येचत्वामनुयांश्चत्वमत्रा
न्वस्यैषातेपितामहस्वधाक्षितिर्यावदंतरिक्षंतावतीतेमात्रातावं १४७

तीतएतांमात्रांभूतांददा मुं तरिक्षेणमितमसिपितामहाय
महा माक्षेष्ठाइतिद्वितीयं।एतत्तेप्रपितामुकशर्मन्•एषातेप्रपितामह
स्वधाक्षितिर्यावतीद्यौस्तावतीतेमात्रा•दामिदिवामितमसिप्रपि
तामहायमाक्षेष्ठाइतितृतीयं॥यथादैवतंत्यागः॥अत्रपितरोय
थाभागंमंदध्वमित्युक्त्वाद्वितीयकुंभोदकशेषेणपूर्ववत्मा
र्जयति॥पूर्वस्त्तापितृतंडुलोदकंतृतीयकुंभेसमानीयपिंडस
मीपेश्मैप्रवाहयेत्॥यानिरक्षांस्यसृग्भागानियेचापिपितरो

हरंतां विहरंतां त्वप्यं तु रुधिरस्य ते ॥ येनःपतिता गर्भा असृग्भाज
उपासते । तेभ्यः स्वजाः स्वधानमस्तु पृण्वंतु मदंतु च ॥ य आमा ये च
पुक्का ये चुडुष्टाः पतंति नः ॥ तेभ्यः स्वजाः स्वधानमं० ॥ ये कुमार्या
स्त्रियो ये विजाताः पतंति नः ॥ तेभ्यं० तु चेति ॥ अथाजनं ददाति ।
आंजंतां पितर आंजंतां पितामहा आंजंतां प्रपितामहा इ
ति ॥ अभ्यंजनं ददाति ॥ अभ्यंजंतां पितर अभ्यंजंतां पितामहा अ
भ्यंजंतां प्रपितामहा इति ॥ वासांसि ददाति ॥ एतानि वः पितरो वा

साꣳसि एतानि वः पितामहा वासाꣳसि एतानि वः प्रपितामहा वा
साꣳसि । अथ तृतीयपिंडानुसंधानपूर्वकं प्रपितामहादिक्रमेण
षड्भिर्नमस्कारैरुपतिष्ठते ॥ नमो वः पितरो रसाय पितरो नमो वो
य एतस्मिंल्लोके स्थ युष्माꣳस्ते नु येऽस्मिंल्लोके मां ते नु य एतस्मिन्
लोके स्थ यूयं तेषां वसिष्ठा भूयास्त येऽस्मिंल्लोकेऽहं तेषां वसिष्ठो भू
यासं । नमो वः पितरः शुष्माय० नमो वः पितरो जीवाय० नमो वः
पितरः स्वधायै० नमो वः पितरो मन्यवे० नमो वः पितरो घोराय० भू

श्रा॰ १४९ यासमिति॥ अथ छत्रं याचते॥ वीरं मे पितरो दत्त पितृमानहं यु
ष्माभिर्भूयासं स्वप्रजसो मया यूयं भूयास्त। वीरं मे पितामहा द
त्त॰॥ वीरं मे प्रपितामहा दत्त पितृमानहं॰ भूयास्त॥ अथ पितॄनु
त्थापयति॥ उत्तिष्ठत पितरः प्रेतशूरा यमस्य पंथामनु याता पुरा
णं। धत्तादस्मासु द्रविणं यच्च भद्रं प्रणो ब्रूताद्भागधां देवतासु।
न अथ पितॄन्स्वस्थानं यन्मनसानुगच्छति॥ यंतु पितरो यथालोकं
मनसा जवेन॥ परेत पितरः सोम्या गंभीरैः पथिभिः पूर्व्यैः॥ अ १४९

थां पितॄन्स्वविदत्राँ अपीत यमेन ये सधमादं मदंति॥ अथानुगतं
मन आह्वयति। मनोन्वाहुवामहे नाराशंसेन सोमेन पितॄणां
च मन्मभिः॥ आन एतु मनः पुनः क्रत्वे दक्षाय जीवसे॥ ज्योक्च सू
र्यं दृशे॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः॥ जीवं व्रातं सचे
महि॥ इति अथ यजमानः स्वपरिहितं वासो गोपितृयज्ञविदे ब्रा
ह्मणाय दद्यात्॥ अन्यत्परिधायाचम्य दक्षिणतो गत्वा चतुर्थो
दकुंभेन मार्जयति॥ यासु गंधा रसा वर्णा बलं च निहितं उभे। ता

श्रा· २५० मुआपःशिवाःसंतुदुष्कृतंप्रवहंतुमे।याउर्जमभिषिंचतिदेवप्रे
षितामही।तामु०॥यासांनिष्क्रमणेसर्वमिदंजायतेजगत्।ता
म०॥यासामिमेत्रयोलोकास्तेजसायशसावृताः॥ताम०।याःप्रा
चीरेवतीर्मधुमतीरापःस्रवंतिशुक्राः॥ताम०॥यादक्षिणारेव
तीर्मधुमतीरापःस्रवंतिशुक्राः॥ताम०॥याःप्रतीचीरेवतीरापः र्मधुमती
स्रवंतिशुक्राः॥ताम०॥याउदीचीरेवतीरापःस्रवंतिशुक्राः॥ताम०
याऊर्ध्वारेवतीर्मधुमतीरापःस्रवंतिशुक्राः॥ताम०॥इतिमार्जयि २५०

र्मधुमतीः

त्वाचम्यतदपिवासःपरित्यज्यक्षौमंवासःपरिधायाचम्यप्राजाप
त्ययर्चायज्ञोपवीत्यग्नेःसमीपमुपगच्छंति॥प्रजापतेनत्वदेतान्य
न्योविश्वाजातानिपरिताबभूव॥यत्कामास्तेजुहुमस्तन्नोअ
स्तुवयंस्यामपतयोरयीणामिति॥पूर्वंपृथक्कृतमुल्मुकमग्नौ
प्रक्षिपति।अभूद्दूतोहविषोजातवेदाअवाड्ढव्यानिसुरभीणि
कृत्वी॥प्रादात्पितृभ्यःस्वधयातेअक्षन्प्रजानन्नग्नेपुनरणेहि
देवानइति॥ब्राह्मणेभ्यःपिंडानोदनंचदत्वाअध्वर्युर्यजमानो

वान्तस्मिन्नेवाग्नावाज्यस्थाल्याज्येन जयानभ्यातानांश्च राष्ट्रभृतो मा त्यांश्च स्रुवेण जुहोति॥ चित्तं च स्वाहा। चित्तायेदं॰॥ चित्तिश्च स्वाहा। चित्त्या इदं॰॥ आकूतं च स्वाहा॥ आकूतायेदं॰॥ आकूतिश्च स्वाहा॥ आकूत्या इदं॰॥ विज्ञातं च स्वाहा। विज्ञातायेदं॰॥ विज्ञानं च स्वाहा॥ विज्ञानायेदं॰॥ मनश्च स्वाहा॥ मनस इदं॰॥ शक्वरीश्च स्वाहा॥ शक्वरीभ्य इदं॰॥ दर्शश्च स्वाहा॥ दर्शायेदं॰॥ पूर्णमासश्च स्वाहा॥ पूर्णमासायेदं॰॥ बृहच्च स्वाहा॥ बृहत इदं॰ १५२

रथंतरं च स्वाहा॥ रथंतरायेदं॰॥ प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमंत सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा॥ प्रजापतय इदं॰॥ इति त्रयोदश जयाहुतयः॥ अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा। अग्नये भूतानामधिपतय इदं॰॥ इंद्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्म

२५२ न्नस्यां देवहूत्यां स्वाहा॥ इंद्राय ज्येष्ठानामधिपतय इदं॰॥ यमः
पृथिव्या अधिपतिः स मावतु॰॥ यमाय पृथिव्या अधिपतय इदं॰॥ वायुरं
तरिक्षस्याधिपतिः स मावतु॰॥ वायवेऽन्तरिक्षस्याधिपतय इदं॰
सूर्यो दिवोऽधिपतिः स मावतु॰॥ सूर्याय दिवोऽधिपतय इदं॰॥ चंद्र
मा नक्षत्राणामधिपतिः स मावतु॰॥ चंद्रमसे नक्षत्राणामधिपतय
इदं॰॥ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावतु॰॥ बृहस्पतये ब्रह्मणो ये
धिपतय॰॥ मित्रः सत्यानामधिपतिः स मावतु॰॥ मित्राय सत्यानाम २५२

धिपतय इदं॰॥ वरुणोऽपामधिपतिः स मावतु॰॥ वरुणायाऽपामधिप
तय इदं॰॥ समुद्रः स्रोत्यानामधिपतिः स मावतु॰॥ समुद्राय स्रोत्या
नामधिपतय॰॥ अन्नं साम्राज्यानामधिपति तन्मावतु॰॥ अ
न्नाय साम्राज्यानामधिपतिन इदं॰॥ सोम ओषधीनामधिपतिः
स मावतु॰॥ सोमाय ओषधीनामधिपतय इदं॰॥ सविता प्रस
वानामधिपतिः स मावतु॰॥ सवित्रे प्रसवानामधिपतय इदं॰
रुद्रः पशूनामधिपतिः स मावतु॰॥ रुद्राय पशूनामधिपतय इदं॰

श्री॰

१५३ अपजपस्तन्य॥त्वष्टारूपाणामधिपतिःसमावतु॰॥त्वष्ट्रेरूपा
णामधिपतयइदं॰॥विष्णुःपर्वतानामधिपतिःसमावतु॰॥वि
ष्णवेपर्वतानामधिपतयइदं॰॥मरुतोगणानामधिपतयस्तेमा
वंतु॰॥मरुद्भ्योगणानामधिपतिभ्यइदं॰॥यजमानकर्तृकहोमप
क्षेअध्वर्युःप्रतिहोमंसप्तदशांतेवायजमानंवाचयेत्॥पित
रःपितामहाःपरेवरेततास्ततामहाइहमावत ॥अध्वर्युक
र्तृकेतुहोमे नवाचनं॥इतिसप्तदशाभ्यातानाः॥ऋताषाडृ १५३

२ अस्मिन्ब्रह्मन्नु॰॥पितृभ्यःपितामहेभ्यःपरेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यइदं॰।२

तधामाग्निर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॥ऋतसाह
ऋतधाम्नेग्नयेगंधर्वायेदं॰॥तस्यौषधयोप्सरसऊर्जोनामताइ
दंब्रह्मक्षत्रंपातुताभ्यःस्वाहा॥ओषधीभ्योप्सरोभ्यऊर्ग्भ्यइदं॰
संहितोविश्वसामासूर्योगंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मै स्वा
हा॥संहितायविश्वसाम्नेसूर्यायगंधर्वायेदं॰॥तस्यमरीचयो
प्सरसआयुवोनामताइदंब्रह्मक्षत्रंपातुताभ्यःस्वाहा॥मरीचि
भ्योप्सरोभ्यआयुभ्यइदं॰॥सुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वःसइ

श्री॰ २५४

दं॰तस्मैस्वाहा॥सुषुम्नायसूर्यरश्मयेचंद्रमसेगंधर्वायेदं॰॥त
स्यनक्षत्राण्यप्सरसोबेकुरयोनामताइदं॰ताभ्यःस्वाहा॥नक्ष
त्रेभ्योप्सरोभ्योबेकुरिभ्यइदं॰॥भुज्युःसुपर्णोयज्ञोगंधर्वःसइ
दं॰तस्मैस्वाहा॥भुज्यवेसुपर्णाययज्ञायगंधर्वायेदं॰॥तस्यद
क्षिणाअप्सरसस्तवानामताइदंब्रह्मक्षत्रंपांतुताभ्यःस्वाहा॥
दक्षिणाभ्योप्सरोभ्यस्तवाभ्यइदं॰॥प्रजापतिर्विश्वकर्मामनो
गंधर्वःसइदंब्रह्मक्ष॰तस्मैस्वाहा॥प्रजापतयेविश्वकर्मणेमन २५४

सेगंधर्वायेदं॰॥तस्य ऋक्सामान्यप्सरसोवन्हयोनामता॰ ता
भ्यःस्वाहा॥ऋक्सामेभ्योप्सरोभ्योवन्हिभ्यइदं॰॥इषिरोविश्व
व्यचावातोगंधर्वःसइदंब्रह्मक्ष॰तस्मैस्वाहा॥इषिरायविश्वव्य
चसेवातायगंधर्वायेदं॰॥तस्यापोप्सरसोमुदानामताइदं॰ ता
भ्यःस्वाहा॥अद्भ्योप्सरोभ्योमुदाभ्यइदं॰॥भुवनस्यपतेयस्यतउ
परिगृहाइहच॥सनोराज्योस्वोनिंरायस्पोषंसुवीर्यंसंवत्स
राणांस्वस्तिंस्वाहा॥भुवनस्यपतयइदं॰॥परमेष्ठ्यधिपतिर्मृत्यु

२५५ गंधर्वः स इदं॰ तस्मै स्वाहा॥ परमेष्ठिनेधिपतये मृत्यवे गंधर्वायेदं॰॥
तस्य विश्वमप्सरसो भुवो नाम ता॰ ताभ्यः स्वाहा॥ विश्वस्या अप्सरोभ्यो
भुव्य इदं॰॥ सुक्षितिः सुभूतिर्भद्रकृत्सुवर्वान्पर्जन्यो गंधर्वः स॰ इदं
तस्मै स्वाहा॰॥ सुक्षितये सुभूतये भद्रकृते सुवर्वते पर्जन्याय गं
धर्वायेदं॰। तस्य विद्युतो प्सरसो रुचो नाम ता॰ ताभ्यः स्वाहा॥ विद्यु
द्भ्यो प्सरोभ्यो रुग्भ्य इदं॰॥ दूरेहेतिरमृडयो मृत्युर्गंधर्वः स इदं॰ त
स्मै स्वाहा॥ दूरेहेतये अमृडयाय मृत्यवे गंधर्वायेदं॰॥ तस्य प्रजा अ २५५
या

प्सरसो भीरुवो नाम ता॰ ताभ्यः स्वाहा॥ प्रजाभ्यो प्सरोभ्यो भीरुभ्य इदं॰
। चारुः कृपणकाशी कामो गंधर्वः स॰ तस्मै स्वाहा॥ चारवे कृपण
काशिने कामाय गंधर्वायेदं॰॥ तस्याधयो प्सरसः शोचयंतीर्नाम
ता इदं॰ ताभ्यः स्वाहा॥ आधिभ्यो प्सरोभ्यः शोचयंतीभ्य इदं॰॥
स नो भुवनस्य पते यस्य त उपरि गृहा इह च॥ उरु ब्रह्मणे स्मै क्षत्रा
य महि शर्म यच्छ स्वाहा॥ भुवनस्य पत्य इदं॰॥ इति राष्ट्रभृतः॥ यद्दे
वा देवहेडनं॰ इत्यनुवाकेन प्रत्यृचममाज्यहोमः॥ गोपितृयज्ञ

आ·
गो॰

१५६ स्यएतस्यांगत्वंनिरूढत्वंवेतिकल्पः॥ अंगमेकेवदंत्यन्येनिरूढंफ
लवत्त्विदं॥ अंगपक्षेद्वितीयादावाधानेवश्यभावित्वा। अनित्य
त्वंनिरूढत्वेफलसंबंधहेतुत्तइति। निरूढत्वेजीवत्पितुर्भवति
। अजीवत्पितुरपिपुनराधाने॥ अंगत्वेतुयस्यपिताजीवतिसद्वा
भ्यां ददाति॥ जीवत्पितामहएकस्मै॥ यदिपित्रादिजीवत्पिताम
हस्यात्तद्वाभ्यांददाति॥ यदिपितामहएकस्मा इतिकेशवः। य
दिनामानिनजानीयात् एतत्तेततासौयेचत्वामन्वित्येवददातीति १५६

च। गोपितृयज्ञाभावेतुसंभारसंभरणानंतरंयजमानःकेशानो
प्यस्नात्वाहतंवासःपरिधायालंकृत्यांद्रेः इतिकेचित्॥ वपनादि
नेत्यन्ये॥ ॥इतिगोपितृयज्ञः॥ ॥ततोदंपतीदर्शपौर्णमासवद
श्नीयातां। अथभूमिंमुक्त्वावृक्षाधिरोहणेनदृश्यमानसूर्यकिर
णेकालेसर्वौषधंसमुच्चित्यप्रक्षाल्याज्यस्थालींस्रुवांस्रुचंब
र्हिर्वासोदीप्ताग्निशकलानिचसमादायतेनवाससाप्रच्छन्नाअ
ध्वर्युब्रह्मपत्नीयजमानाःऔपासनाग्निंव्रजंति॥ तमहंसर्वंब्रह्मसो
वा

श्री॰
१५७

दनिकंकुर्युः॥ ब्रह्मादक्षिणतोग्नेर्निरसनोपवेशनेकुर्यात्॥ अध्व
र्युः॥ तानिशकलान्यग्नौप्रक्षिप्यपरिसमुह्यपरिस्तीर्यपात्रासादना
द्याज्यसंस्कारांतंकुर्यात्।पात्रप्रोक्षणकालेसर्वौषध मपिप्रोक्षेत्
॥ततोयजमानोध्वर्युणोपस्तीर्णाभिघारितेनांजलिनासर्वौषधंजु
होति॥अग्नयेसर्वौषधायपुष्ट्यैप्रजननायस्वाहेति॥अग्नयेसर्वौ
षधायपुष्ट्यैप्रजननायेदं०॥अथाध्वर्युः तस्मिन्नेवाग्नौजयान
भ्याताँन्राष्ट्रभृतोमंत्रांश्चस्रुवेणजुहोति॥अथस्रुचिचतुर्गृहीतं १५७
ना

गृहीत्वाप्राजापत्यांजुहोति।यजमानःप्रजापतयइदं०॥अपरंचतु
र्गृहीतंगृहीत्वानुमत्यांजुहोति॥अन्वग्निरुषसामग्रमख्यदन्वहा
निप्रथमोजातवेदाः॥अनुसूर्यस्यपुरुत्राचरश्मीननुद्यावापृथि
वीआततानस्वाहा॥अग्नयइदं०॥अथयजमानः सतेवाशरा
रा वेवांगाँन्गृह्णाति॥आयुषेवोगृह्णामितेजसेवोगृह्णामितपसे
वोगृह्णामिवीर्यायवोगृह्णामिब्रह्मवर्चसायवोगृण्हामिइति॥
अथैतानादायोपोत्तिष्ठति॥आयुर्मामाविशत्पुष्टिर्मामाविश

श्रा० तुब्रह्मवर्चसंमामाविशंतु॥इतितानध्वर्यवेसंप्रदायोपोदायं ब्रह्मो०
१५८ ति॥अध्वर्युर्यजमानान्वारब्धःसंप्रयच्छन्नेवोत्तरतोगत्वायथेत
मेत्योत्तरेणाग्न्यगारंपरीत्यपूर्वयाद्वाराप्रविश्यवेद्युत्करयोरंतरे
णगत्वागार्हपत्यायतनेंगारान्न्युप्योपसमाधाय।परिसमुह्यप
र्युक्ष्यपरिस्तृणाति॥अथोत्तरतोदर्भेषुपात्राण्यासादयति॥चरु
स्थालीमेक्षणंमुसलोलूखलेशूर्पंनिर्वापपात्रंघृतपात्रंअनुडु
हंचर्मप्रोक्षणीपात्रंव्युद्धरणपात्रंचित्रियाश्वत्थसमिधइति॥द १५८

क्षिणतोब्रह्मयजमानावुपवेश्यतूष्णींपवित्रेकृत्वाप्रोक्षणीःसं
स्कृत्येतराणिपात्राण्युत्तानानिकृत्वात्रिस्तूष्णींप्रोक्ष्याग्नेःपश्चात्
प्राचीनग्रीवमुत्तरलोमचर्मास्तीर्यतस्यपृष्ठग्रीवायांवाचतुरःपुरु
षाहारान्सपवित्रेणपात्रेणव्रीहीणांनिर्वपति॥ब्रह्मणेजुष्टंनि
र्वपामि॥प्रतिपात्रंमंत्रावृत्तिः॥ताननभिमृशति॥आकूत्यैत्वाका
मायत्वासमृधेत्वेति॥चर्मस्थान्व्रीहीनशूर्पेसमोप्यचर्माङ्गिरप्यु
क्ष्यनिरस्यापउपस्पृश्यव्रीहीन्प्रोक्षतिब्रह्मणेजुष्टंप्रोक्षामीति॥

न्
ब्रं०

श्री १५९ ष्वनश्चर्मण्युलूखलंनिधायतस्मिन्व्रीहीनोप्यमुसलेनावहत्यत्रिः
फलीकृत्यत्रिःप्रक्षाल्यपवित्रवत्यांस्थाल्यांनिर्वापपात्रेणचतुर्वा
रंक्षीरमपोवानयेत्॥अपर्याप्तावन्यदपि॥स्थालीमग्नावधिश्रि
त्यतिरःपवित्रंतंडुलानावपति॥तंकुशलःपरीधेनश्रपयति॥
अध्वर्युराज्यंसंस्कृत्या धिश्रित्यमाज्यंचरुंपर्यग्निकृत्वामेक्ष
णंसंमृज्यसंस्कृताज्यान्मेक्षणेनचरुमभिघार्योदंचमुद्वासय
ति॥अथायतिगवेकालेपरिकर्मिणऋत्विग्भ्यःप्रादुःश्रुतोब्रह्मौ १५९

दनइति॥अथर्त्विजोविहारस्योत्तरतोनुदिशमन्योन्याभिमु
खाउपविशंति॥अध्वर्युःपूर्वस्यांब्रह्मादक्षिणस्यांपश्चाद्धो
तोदगन्यइति॥अथयजमानोव्युद्धरणपात्रीनिर्णिज्यसंस्कृ
ताज्यान्मेक्षणेनोपस्तीर्यतस्यांब्रह्मौदनमचालयन्नुद्धृत्यम
ध्येगर्त्तंकृत्वाप्रभूतमाज्यमानीयमेक्षणेनोपघातंजुहोति॥
प्रवेधसेकवयेमेध्यायवचोवंदारुवृषभायवृष्णे॥यतोभयम
भयंतन्नोअस्त्ववदेवान्यजेहेड्यान्स्वाहेति॥ब्रह्मणइदं॥

श्री श्रौ०
१६० अथानुदिशमुपविष्टानानुपूर्व्ये णाचमय्यपात्रीमाकर्षन्ति
वत्तेषांमध्येभूमिंचरुंप्रवेशयति॥युक्तोमोपनमन्तु इति।ततः
प्रवर्त्यपात्रेषुपृथगुपोहति॥तेमध्यात्प्रत्ययंप्राश्ययजमानेप्र
शंसंति॥राद्धस्तेब्रह्मोदन इति॥यजमानस्तेभ्यःसांवत्सतरंद डं
दाति॥तेभुक्त्वाचम्यतंप्रतिगृह्णंति॥रुद्रायगांतेनामृतत्वमश्या
मिति॥उत्तरतआसीनःकश्चित्ब्राह्मणःक्षामकाषमश्नाति।यज
मानस्तस्मैयत्किंचिद्ददाति॥पात्र्यामवशिष्टाज्येनचित्रियाश्वत्थ १६०

समिधोभ्यज्यादधाति॥समिधाग्निंदुवस्यतघृतैर्बोधयतातिथिं।
आस्मिन्हव्याजुहोतनस्वाहा॥अग्नयइदं॥उपत्वाग्नेहविष्म
तीर्घृताचीर्यन्तुहर्यत॥जुषस्वसमिधोममस्वाहा॥अग्नयइदं॥
या तंत्वासमिद्भिरंगिरोघृतेनवर्द्धयामसि॥बृहच्छोचायविष्ठयस्वाहा॥
अग्नयइदं॥समित्स्वाहितास्वध्वर्यवेवत्सतरींददाति॥अध्व
ते र्यवेवत्सतरींददामीति॥रुद्रायगांतयेतिप्रतिग्रहः॥अथास्मैय
जमानायाध्वर्युररणीप्रयच्छन्नाह॥वाचंयमोभविष्यसिसंशि

२६१ ष्ठायत्तेसंशिष्यमिति॥यजमानःपरिकर्मिणआह॥ब्राह्मणाना
ज्ञयतांश्वंगोपायतसंभारान्निधत्तेति॥अस्मिन्कालेदधिदुग्धघृ
तभूयिष्ठान्नेनब्राह्मणान्भोजयेत्॥यजमानःअध्वर्योरणीप्र
तिगृण्हन्नाह॥महीविश्पत्नीसदनेऋतस्यार्वाचीएतंधरुणेरयी
णां॥अंतर्वत्नीजन्यंजातवेदसमध्वराणांजनयथःपुरोगां॥
आरोहतंदशतंशक्वरीर्ममर्तेनाग्नआयुषावर्चसासह॥ज्योग् राम
जीवंतउत्तरामुत्तरांसमांदर्शमहंपूर्णमासंयज्ञंयथायजै॥इ २६१

य
तिअरणीउपसिश्लेषयति॥ऋत्विंवतीस्थोअग्निरेतसौगर्भंदधा
थांतेवामहंददे॥तत्सत्यंयद्वीरंबिभृथोवीरंजनयिष्यथः॥ते
थे मत्प्रातःप्रजनिष्यैतेमाप्रजातंप्रजनयिष्यथः॥प्रजयापशुभिर्ब्र
ह्मवर्चसेनस्वर्गे लोके॥इतिअध्वर्युर्यजमानमाह॥अनृतं
विहायसत्यंवाच्यं॥मानुषंविहायदैवंकर्मकार्यमिति॥यज
मानः॥इदमहमनृतात्सत्यमुपैमिमानुषाद्दैव्यमुपैमिदैवींवा
चंयच्छामीति॥तंवाचंयमंपरिकर्मिणस्तांरात्रिंजागर्यंतआसते॥
र

श्री·
१६२

यजमानः॥आराच्यवसानंसमिंधनयोर्गृहेउल्कैरग्निंज्वलयति॥श
ल्कैरग्निमिंधानउभौलोकौसनेमहं॥उभयोर्लोकयोर्ऋध्वातिमृ
त्युंतराम्यहमिति॥अध्वर्युर्गार्हपत्यस्योत्तरतःकृष्णमजंबध्वा
तेनयजमानमीक्षयति॥प्रजाअग्नेसंवासयाश्चपशुभिःसह॥
राष्ट्राण्यस्माआधेहियान्यासंत्सवितुःसवे॥इतिअरणीदानाये
२ तदंतंवापैरात्रे॥अरणीदानोपश्लेषवर्जंसर्वंपूर्वरात्रेवाकुर्यात्
॥अथाध्वर्युरपैरात्रेयजमानहस्तादुपव्युषंदक्षिणहस्तेनोत्तरा १६२
र

अ·प्र·

रणींसव्येनाधरारणीमादायब्रह्मौदनिकेनिष्टपेत्॥जातवेदोभु
वनस्यरेतइहसिंचतपसोयज्जनिष्यते॥अग्निमश्वत्थादधिहृ
व्यवाहंशमीगर्भाज्जनयन्योमयोभूः॥अयंतेयोनिरृत्वियोय
तोजातोअरोचथाः॥तंजानन्नग्नआरोहाथानोवर्द्धयारयिमिति
।अथलौकिकीभूतमग्निंसंतंसमोप्य गार्हपत्यायतनंशकृता
परिलेपयति॥अपेतवीतविचसर्पतातोयेत्रस्थपुराणायेचनू
तनाः।अदादिदंयमोवसानंपृथिव्याअक्रन्निमंपितरोलोकमस्मै।

श्रौ०
९६३ एवमन्वाहार्यपचनाहवनीययोः॥ इति तूष्णीं वा॥ अथ यजमानप
त्नीभ्यामन्वारब्धः संभाराणां तृतीयभागानादाय मंत्रावृत्या प्रवृ
त्तिक्रमेण गार्हपत्यायतने निवपति॥ यत्पृथिव्या अनाधृतं सं
बभूवुत्वे सचा॥ तदग्निरग्नये ददत्तस्मिन्नाधीयतामयमिति॥ यदो
षान्पश्यति तदाभिमंत्रयते॥ यदुदश्वं दमसि कृष्णं तदपीदेति॥ मं
त्रार्थमवधारयेत्॥ सर्वान्स्पृष्ट्वा जपति॥ अग्नित्वेनावधारयत्ति वा॥
दिवस्त्वा वीर्येण पृथिव्यै महिम्ना॥ अंतरिक्षस्य पोषेण सर्वपशुमाद ९६३

धे इति॥ तान्विश्रयति॥ संवः सृजामि हृदयानि संसृष्टं मनो अस्तु वः॥
संसृष्टः प्राणो अस्तु वः॥ संया वः प्रिया स्तनुवः संप्रिया हृदयानि वः।
आत्मा वो अस्तु संप्रियः संप्रिया स्तनुवो मम॥ इति समीकरोति॥ क
ल्पेतां द्यावापृथिवी कल्पंतामाप ओषधीः॥ कल्पंतामग्नयः पृथङ्म
मज्यैष्ठ्याय सव्रताः॥ येग्नयः समनसोंतरा द्यावापृथिवी॥ वासंतिका
वृतू अभिकल्पमाना इंद्रमिव देवा अभिसंविशंत्विति॥ ऋत्वंतरे
प्याधाने वासंकावित्येव प्रयोगः॥ अतिशिष्टानामर्द्धानादाय दक्षिणा

श्री

१६४ द्वारागत्यान्वाहार्यपचने निवपति॥यदंतरिक्षस्यानामृतं संबभूव
त्वे सचा॥तद्वायुरग्नये दधात्वस्मिन्नाधीयंतामयमिति॥शेषं पूर्वव
त्॥अपसव्यमावृत्य पूर्वया द्वारागत्य तृतीयभागमाहवनीये निव
पति॥यद्दिवो नामृतं संबभूव त्वे सचा॥तदादित्यो ग्नये दधात्वस्मि
न्नाधीयंतामयमिति॥शेषं पूर्ववत्॥अथाध्वर्युर्गोप्तारमाह॥अग्नी
न्रक्षस्वेति॥स आह॥विहृता अग्नयो माकश्चनांतरेण संचारीदि १६४
ति॥अथाध्वर्युः प्रदक्षिणमावृत्य गार्हपत्यस्य पश्चात्कृष्णाजिने मुं

जकुलायं निधाय तस्मिन्नधरारणीं प्रागायतामुदगायतां वा प्रत्यग्रा
ग्रां निधाय पश्चिमे मंथनप्रदेश उत्तरारणीन्निदधाति॥चित्तिस्त्रुक्
चित्तमाज्यं।वाग्वेदिः॥आधीतं बर्हिः॥केतो अग्निः॥विज्ञातमग्निः॥
वाक्पतिर्होता॥मन उपवक्ता॥प्राणो हविः॥सामाध्वर्युः॥वाचस्प
ते विधे नामन्॥विधेम ते नाम॥विधेस्त्वमस्माकं नाम॥वाचस्पतिः
सोमं पिबतु॥अस्मासु नृम्णं धात्स्वाहेति॥उत्तरारण्या मूलभागे ष्टां
गुलप्रमाणं वा मंथाग्रशकलं छित्वा तीक्ष्णं विधाय द्वादशांगुलस्य षोड
न

आ० ग्रांगुळस्यवामंथनदंडस्यसुषिरेमंथनशकलंमूलतःकीलयित्वा
१६५ अधरारण्यामूलभागेगुळद्वयंमुक्त्वापार्श्वयोश्चत्रीणित्रीणिमु
क्त्वांतरादेवयोनिस्तत्रनिम्नंविधायतस्मिन्दंडंस्थापयित्वामंथनप्र
मितेनैवोपमंथेनोपरिपीडयित्वायजमानादीन्ब्रूयात्॥मंथतेति।
यजमानःप्रथमोमंथति॥यजमानउत्तमः॥अग्नौबलवतिजातेय
जमानोवाचंविसृजते॥अध्वर्योवरंतेददामीति॥वरोगौःसर्वत्र
रुद्रायगामितिप्रतिग्रहः॥साध्वर्युर्यजमानोजातमग्निमुपतिष्ठते॥ १६५

अजीजनन्नमृतंमर्त्यासोस्रेमाणंतरणिंवीडुजंभं॥दशस्वसारो
अग्रुवःसमीचीःपुमांसंजातमभिसंरभंतामिति॥यजमानएवा
ग्नेरुपरिनासिकाभ्यांवायुंनिष्क्रामयति॥प्रजापतेस्त्वाप्राणेनाभि
प्राणिमि॥पूष्णःपोषेणमह्यंदीर्घायुत्वायशतशारदाय॥शतं
शरद्भ्यआयुषेवर्चसे॥जीवात्वैपुण्याय॥प्राणेत्वामृतमादधा
मि॥अन्नादमन्नाद्याय॥गोप्तारंगुप्त्यैइति॥अध्वर्युराह॥ब्रह्मन्
छंदांसिब्रूहीति।ब्रह्मात्रिर्हिंइतिवदेत्॥अथाध्वर्युर्मथितम

अ०
१६६ ग्निंप्रांचमुद्धृत्यगार्हपत्यायतनआदधाति॥भूर्भुवोधर्मःशिरस्तद्
यमग्निःसंप्रियःपशुभिर्भुवत्॥छर्दिस्तोकायतनेयाययच्छ॥भृगूणां
त्वाव्रतपतेव्रतेनादधामिभार्गवोगायत्रेणछंदसा॥इतिभृगूणां
अंगिरसांत्वाव्रत०म्यांगिरोगायत्रेणछंदसा॥इतिचांगिरसां॥आ
दित्यानांत्वादेवानांव्रतपते०काश्यपोगायत्रेणछंदसा॥इतिका
श्यपानांइत्येवंचान्येषां॥अग्नेरुत्तरतोग्नावेवहिरण्यशकलंनि
दधातिस्वयांतत्रवासंभवेत्ति॥रजतशकलंशूद्रायमूर्खायब्राह्म १६६

णायवा प्रयच्छति॥अथसाध्वर्युर्यजमानोगार्हपत्यमुपति
ष्ठते॥अहंत्वदस्मिमदसित्वमेतन्मेऽसियोनिस्तवयोनिरस्मि॥म मा
मैवसन्त्वदहव्यान्यग्नेपुत्रःपित्रेलोककृज्जातवेदः॥सुगार्हप
त्योविदहन्नरातीरुषसःश्रेयसीःश्रेयसीर्दधत्॥अग्नेसपत्नां
अपबाधमानोरायस्पोषमिषमूर्जमस्मासुधेहिइति॥अथगार्ह
पत्यैकदेशमादायदक्षिणयाद्वारोपनिष्क्रम्यदक्षिणाग्निमादधा
ति॥भूर्भुवोवातःप्राणस्तदयमग्निःसंप्रियःपशुभिर्भुवत्॥स्वदितं

श्रा॰ १६७ तोकायतनंयाय   प्रितुंपच॥रजतदानांतंपूर्ववत्कृत्वोपति
ष्ठते॥इमानुमामुपतिष्ठंतुरायआभिःप्रजाभिरिहसंवसेय॥इहो
इडोतिष्ठतुविश्वरूपीमध्येवसोदीदिहिजातवेदइति॥आहवनी
याधानार्थमपसव्यंगार्हपत्यमेत्यत्रिःप्रादेशप्रमाणैःसमिद्भिरपरि
मितैरिध्मंगार्हपत्येप्रदीपयतियथाज्योदितेसूर्येप्रणयनयोग्योभ
वति॥उपयमनंमृत्पूर्णपात्रंसमीपेस्थापयति॥स्नापितंयुवानम
श्वंतदभावेगामजमविकमंडलुंवागार्हपत्यस्यपुरस्तात्स्थापयति। १६७

थ
अंकालेप्रणयनायाग्निमुपयमनेनाददानआह॥ब्रह्मन्छंदांऽसि
ब्रूहीति॥सआहहिंइतित्रिः॥तमादित्यमग्निंपात्रेनिधायोपयम
नेनोपयम्योद्गच्छति॥ओजसेबलायत्वोद्गच्छेवृषणेशुष्मायायुषेव
र्चसे॥सपत्नतूरसिवृत्रतूर्यस्तेदेवेषुमहिमासुवर्गःयस्तआत्माप
शुषुप्रविष्टःपुष्टिर्यातेमनुष्येषुपप्रथे॥तयानोअग्नेजुषमाणएहि॥
दिवःपृथिव्याःपर्यंतरिक्षाद्वातात्पशुभ्योअध्योषधीभ्यः॥यत्रय
त्रजातवेदःसंबभूथततोनोअग्नेजुषमाणएहीति॥इध्ममादद्य

आप्र·

आ· नोजानुदघ्नंग्रीवादघ्नमुद्धृत्यागच्छेत्॥पुरस्तान्नीयमानमश्व

१६८ मनुमंत्रयते॥प्राचीमनुप्रदिशंप्रेहिविद्वानग्नेरग्नेपुरोअग्निर्भवेह

।विश्वाआशादीद्यानोविभाह्यूर्जंनोधेहिद्विपदेचतुष्पदइति॥म दे

ध्येगमनादुपरमंति॥विक्रमस्वमहाँअसिवेदिषन्मानुषेभ्यः।

त्रिषुलोकेषुजागृहिइति॥अन्वग्निरुषसामग्रमख्यदन्वहानि

प्रथमोजातवेदाः॥अनुसूर्यस्यपुरुत्राचरश्मीननुद्यावापृथि

वीआततानेति॥अग्निमन्यहस्तेप्रदायप्राङ्मुखस्याश्वस्यदक्षि १६८

णेनपूर्वपादेनसंभाराणामुत्तरदेशमाक्रमयति॥यथाहितांगा

रमश्वपदमनुधावंति॥अश्वंप्रदक्षिणमावृत्याद्भिरभ्युक्ष्योदं

चंगमयित्वाध्वर्यवेदद्यात्॥वरुणायाश्वमितिप्रतिग्रहः॥ब्रह्म

णेन्यमश्वंदद्यात्॥अध्वर्युःप्रदक्षिणमावृत्यप्रत्यङ्मुखोऽर्द्धोदि

तेसूर्यइध्ममाहवनीयेसंभारेषुप्रतिष्ठापयति॥यदिदंदिवोय

ददःपृथिव्याःसंविदानेरोदसीसंबभूवतुः॥तयोःपृष्ठेसीदतु

जातवेदाःशंभूःप्रजाभ्यस्तनुवेस्योनः॥प्राणंत्वामृतआदधामि॥

आ० १६१ अन्नादमन्नाद्यायगोप्तारंगुप्त्यैइति॥ब्रह्मन्छंदांसिब्रूही ति॥स
आहृहे इतित्रिः॥हिंकारसमकालमाहवनीयमादधाति॥भूर्भु
वःस्वरर्कश्चक्षुस्तदसौसूर्यस्तदयमग्निःसंप्रियःपशुभिर्भुवत्"
यत्तेशुक्रशुक्रंवर्चःशुक्रातनूःशुक्रंज्योतिरजस्त्रंतेनमेदीदिहितेन दि
त्वादधे॥अग्निनाग्नेब्रह्मणा॥इतिइध्मप्रतिष्ठापनानंतरंकेवळ
मग्निमेवप्राधान्येनादधातिप्रतिष्ठितंकरोतीत्यर्थः॥पूर्ववदमी
षांत्वेतिरजतदानंतंकल्पोपतिष्ठते॥आनन्नोव्यानन्नोसर्वमायुर्व्या १६१

नशोइतिआहवनीयएवसभ्यावसथ्यौकल्पयति॥अथाग्नीन्प
रिसमुह्यपर्युक्ष्यपरिस्तीर्ययजमानःस्वाहाकारांताभिर्व्याहृति
भिरंजलिनासर्वौषधंसर्वेष्वग्निषुजुहोति॥अध्वर्युःआज्यंसं
स्कृत्यैकैकस्मिन्नग्नौपंचपंचनानावृक्षीयाःसमिधस्तेनाज्येनाभ्य
ज्याभ्यादधाति॥समिध्यमानःप्रथमोनुधर्मःसमक्तुभिरज्यते
विश्ववारः॥शोचिष्केशोघृतनिर्णिक्पावकःसुयज्ञोअग्निर्यज
थायदेवान्स्वाहेत्याश्वत्थीं॥घृतप्रतीकोघृतयोनिरग्निर्घृतैःसमि

ह्वो घृतमस्यान्नं॥ घृतप्रुषस्त्वा सरितो वहंति घृतं पिबन्सुयजा य
क्षि देवान्स्वाहेत्यौदुंबरीं॥ त्वामग्ने समिधानं यविष्ठ देवा दूतं च
क्रिरे हव्यवाहं॥ उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चो
दयन्वति स्वाहेति पालाशीं॥ त्वामग्ने प्रदिव आहुतं घृतेन सुम्नाय
वः सुषमिधा समीधिरे॥ स वावृधान ओषधीभिरुक्षित उरुज्र
यांसि पार्थिवा वितिष्ठसे स्वाहा॥ इति शमीमयीं॥ घृतप्रतीकं व ऋ
तस्य धूर्षदमग्निं मित्रं न समिधान ऋंजते॥ इंधानो अक्रो विदथे ८०

षुदीद्यच्छुक्रवर्णामुदु नो यंसते धियं स्वाहेति वैकंकतीं॥ एवमे
व दक्षिणाग्न्याहवनीययोः सर्वत्राग्नय इदमिति त्यागः॥ संभारनि
वपनादिसमिदाधानांतं यजमानेनान्वारंभः॥ ततः प्रदक्षिणमा
वृत्य गार्हपत्यस्य पश्चाद्यजमानः पत्न्या सहितस्तिष्ठन्गार्हपत्या
दीन्प्रत्येकमुपतिष्ठते॥ ये ते अग्ने शिवे तनुवौ विराट् च स्वराट् च ते मा
विशतां ते मा जिन्वतां॥ ये ते अग्ने शिवे तनुवौ सम्राट् चाभिभूश्च ते मा
विशतां ते मा जिन्वतां॥ ये ते अग्ने शिवे तनुवौ विभूश्च परिभूश्च ते
मा विशतां ते मा जिन्वतां॥ ये ते अग्ने शिवे तनुवौ प्रभ्वी च प्रभूतिश्च ते

२ + यास्तेअग्ने घोरास्तनुवः। क्षुच्च तृष्णा च। अस्नुक्चानाहुतिश्च। अशनया च पिपासा च। सेदिश्चामतिश्च। एतास्तेअग्ने घोरास्तनुवस्ताभिः पाप्मानं गच्छ योस्मान्द्वेष्टि यं च वयं द्विष्मः।

श्रा.
१७१

